विक्रमोर्वशीयम्

जीवानन्द विद्यासागर कृत

VIKRAMORBASHI

ADRAMA

BY

KALIDASA.

EDITED WITH A COMMENTARY

BY

PANDIT JIBANANDA VIDYASAGARA, B.A.

Superintendent Free Sanskrit College,

SECOND EDITION.

CALCUTTA

PRINTED AT THE SIDDHESWARA PRESS.

1895.

To be had From Pandit Jibananda Vidyasagara B. A.
Superintendent Free Sanskrit College, Calcutta.

एतानि मुद्रितसंस्कृतपुस्तकानि ।

१ आशुबोध व्याकरणम्	२
२ अष्टकम् पाणिनीयम्	॥०
३ उणादिसूत्रम् सटीक	२
४ कविकल्पद्रुम (धातुपा:)	।०
५ कलापव्याकरणं वा कातन्त्र	२
६ धातुरूपादर्श:	१॥०
७ परिभाषेन्दुशेखर सटीक	१
८ मुग्धबोधव्याकरणम् सटीक	१॥०
९ वाक्यमञ्जरी (वङ्गाक्षरै:)	।०
१० वैयाकरणभूषणसार	॥।०
११ लघुकौमुदीव्याकरणम्	॥०
१२ लिङ्गानुशासनं सटीक	।०
१३ शब्दरूपादर्श:	॥०
१४ शब्दार्थरत्नम्	॥।०
१५ सारस्वतव्याकरण सटीक पूर्वार्द्धम्	१
१६ सारस्वतव्याकरणं सटीक उत्तरार्द्धं	२
१७ सिद्धान्तकौमुदी सरलासहिता	१०
१८ ऋतुसंहार काव्य सटीक	।/
१९ काव्यसंग्रह मूलमात्र	५
२० काव्यसंग्रह सटीक प्रथमभाग:	३
२१ काव्यसंग्रह सटीक द्वितीयभाग:	२
२२ काव्यसंग्रह सटीक तृतीयभाग:	२
२३ किरातार्जुनीयकाव्य सटीक	१॥०
२४ कुमारसम्भवकाव्यपूर्वखण्ड सटीक	॥०
२५ कुमारसम्भवकाव्य उत्तरखण्डसटीक	॥
२६ गीतगोविन्द काव्य सटीक	॥०
२७ चन्द्रशेखरचम्पूकाव्य	३
२८ नलोदय काव्य सटीक	।/
२९ नैषधचरितम् काव्य सम्पूर्ण सटीक	५
३० नैषधकाव्य नवमसर्गपर्य्यन्त सटीक	२॥
३१ पुष्पबाणविलास काव्य सटीक	॥०
३२ विद्वन्मोदतरङ्गिणी (चम्पू काव्य)	॥०
३३ भट्टिकाव्य टीकाद्वयसहित	२
३४ भामिनीविलासकाव्य सटीक	॥०
३५ भामिनीविलास संक्षिप्तटीकासह	।०
३६ चम्पूरामायणम् सटीक	१
३७ (चम्पूरामायणम्) भोजचम्पू	॥०
३८ शतकावलि:	॥०
३९ माधवचम्पूकाव्य	।०
४० मेघदूत मल्लिनाथकृत टीकासहित	।/
४१ मेघदूत सटीक सुलभमूल्यकम्	/०
४२ रघुवंश काव्य सटीक	१॥०
४३ रघुवंश मूलमात्र ७,८,१२ सर्गा:	/०
४४ राजप्रशस्ति सटीक	/
४५ शिशुपालवधकाव्य सटीक (माघ)	२
४६ गद्यकथासरित्सागर सम्पूर्ण	६
४७ कादम्बरी विस्तृतव्याख्यासहिता	३
४८ दशकुमारचरितगद्यकाव्य सटीक	१
४९ द्वात्रिंशत्पुत्तलिकासिंहासन	१
५० पञ्चतन्त्रम् विष्णुशर्मकृत सटीक	१
५१ बहुविवाहवाद	।०
५२ वासवदत्ता गद्यकाव्य सटीक	१
५३ वेतालपञ्चविंशति: (सरलगद्य)	॥।०
५४ शङ्करविजय	१॥०
५५ भोजप्रबन्ध सरल गद्य	॥०
५६ हर्षचरित सटीक बाणभट्टकृत	२॥०
५७ हर्षचरितबाणभट्टकृतगद्य	१
५८ संस्कृतशिक्षामञ्जरी प्रथमभाग:	/
५९ संस्कृतशिक्षामञ्जरी द्वितीयभाग:	।०
६० संस्कृतशिक्षामञ्जरी तृतीयभाग:	॥०
६१ संस्कृतशिक्षामञ्जरी चतुर्थभाग:	।०
६२ हितोपदेश सटीक	॥।०
६३ अमरकोष	॥०
६४ वाचस्पत्यम् (वृहदभिधान)	१००
६५ मेदिनीकोष	१
६६ शब्दस्तोममहानिधि:	८
६७ अनर्घराघवनाटक सटीक [मुरारि]	२
६८ अनर्घराघवनाटक मूलमात्र	४

विक्रमोर्वशी

त्रोटकम् ।

महाकवि श्रीकालिदासविरचितम् ।

पण्डित कुलपतिना,
वि, ए, उपाधिधारिणा
श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण
विरचितया व्याख्यया समलङ्कृतम् ।
तेनैव संस्कृतम् ।


द्वितीय संस्करणम् ।

कलिकाताराजधान्याम् ।

सिद्धेश्वरयन्त्रे

मुद्रितम् ।

इं १८[illegible]



पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर वि, ए,

PANDIT JIBANANDA VIDYASAGARA B, A.

Superintendent Free Sanskrit College, Calcutta.

विक्रमोर्वशी ।

प्रथमोऽङ्कः ।

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥ (१)

नान्द्यन्ते (२) सूत्रधारः ।

---

(१) वेदान्तेष्विति । वेदान्तेषु उपनिषत्सु यं देवं रोदसी द्यावापृथिव्यौ व्याप्य स्थितं सर्वव्यापिनमित्यर्थः । एकपुरुषम् अद्वितीयमित्याहुः वर्णयन्तीत्यर्थः । 'अस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुः' । इति श्रुतिः । तथा, नास्ति अन्यस्तद्भिन्नः कश्चित् विषयो वाच्यो यस्य स तथाभूतः ईश्वर इति शब्दः यस्मिन् देवे यथार्थाक्षरः सार्थकः अणिमाद्यष्टैश्वर्य्यसद्भावादित्यर्थः । तथा, नियमिताः अन्तर्निरुद्धाः प्राणादयो प्राणापानसमानोदानव्यानाख्याः पञ्चशरीरवायवः यैस्तैस्तथाभूतैर्मुमुक्षुभिर्मुक्तिमिच्छुभिर्योगिभिरित्यर्थः । यश्च अन्तरात्मनि मृग्यते अन्विष्यते । 'एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति । तमात्मस्थं ये नु पश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषामिति" । तस्यात्मनि दर्शनोपदेशः । स्थिरा अचला या भक्तिस्तस्याः योगेन सम्पर्केण सुलभः सुप्रापः सुगम इत्यर्थः । स स्थाणुः शिवः वो युष्माकं निःश्रेयसाय मुक्तये अस्तु । मुक्तिप्रदो भवति इत्यर्थः । शार्दूलविक्रीड़ितं छन्दः ।

(२) नान्द्यन्ते इति । नान्दीलक्षणं यथा, "आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते देवद्विजनृपादीनां तस्मात् नान्दीति संज्ञिता" ।

सूत्र। अलमतिविस्तरेण। [नेपथ्याभिमुखमवलोक्य]। मारिष! परिषदेषा पूर्वेषां कवीनां दृष्टरसप्रबन्धा ; अहमस्यां कालिदासग्रथितवस्तुना नवेन त्रोटकेन उपस्थास्ये, तदुच्यतां पात्रवर्गः, स्वेषु स्थानेषु अवहितैर्भवितव्यं भवद्भिरिति। (३)

नटः। [प्रविश्य] यथाज्ञापयति देवः।

सूत्र। यावदस्यामार्य्यविदग्धमिश्रान् शिरसा प्रणिपत्य विज्ञापयामि।

प्रणयिषु दाक्षिण्यवशादथवा सद्वस्तुबहुमानात्।
शृणुत जना! अवधानात् क्रियामिमां कालिदासस्य॥ (४)

[नेपथ्ये। अज्जा! परित्ताअध परित्ताअध। (क)]

सूत्र। अये! किमयमकस्माद्विमानचारिणामाकाशे करुणध्वनिः श्रूयते? [विचिन्त्य] आं ज्ञातम्, भवतु।

ऊरूद्भवा नरसखस्य मुनेः सुरस्त्री
कैलासनाथमुपसृत्य निवर्त्तमाना।

(क) आर्य्याः! परित्रायध्वम् परित्रायध्वम्।

---

(३) मारिष इति सूत्रधारकृतं परिपार्श्विकसम्बोधनम्। "सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः। सूत्रधारी मारिषेति" इत्यादि दर्पणे। परिषत् सभा, दृष्टरसप्रबन्धा दृष्टो रसप्रबन्धः शृङ्गारादिरसबहुलः प्रबन्धः सन्दर्भो यया। त्रोटकेन त्रोटकाख्यदृश्यकाव्येन इत्यर्थः। तल्लक्षणं यथा "सप्ताष्टनव-पञ्चाङ्कं दिव्यमानुषसंश्रयम्। त्रोटकं नाम तत् प्राहुः प्रत्यङ्कं सविदूषकम्"। इति दर्पणकारधृतवचनम्। पात्रवर्गः नटसम्प्रदायः। स्वेषु स्थानेषु स्वकीयेषु कर्त्तव्यपदेषु इत्यर्थः। अवहितैः अप्रमत्तैः।

(४) प्रणयिषु सुहृत्सु याचकेषु वा। दाक्षिण्यं परच्छन्दानुवर्त्तित्वं, तद्वशात् तद्धेतोः अस्मासु अनुग्रहबुद्ध्येति भावः। सद्वस्तुबहुमानात् सत् दोष-रहितं यद्वस्तु इतिवृत्तं तस्मिन् बहुमानं समादरः तस्मात्।

बन्दीकृता विबुधशत्रुभिरर्द्धमार्गे
क्रन्दत्यतः शरणमप्सरसां गणोऽयम् ॥ (५)

इति निष्क्रान्तौ ।

प्रस्तावना (६) ।

[ततः प्रविशन्ति अपटीक्षेपेण अप्सरसः ।] (७)

अप्सरसः । अज्जा ! परित्ताअध परित्ताअध, जो अमर-पक्खवादी, जस्स वा अम्बरदले गदी अत्थि । (ख)

[ततः प्रविशति अपटीक्षेपेण रथारूढो राजा सूतश्च ।]

राजा । अलमाक्रन्दितेन ; सूर्य्योपस्थानसंनिवृत्तं पुरूरवसं मामेत्य कथ्यतां, कुतो भवत्यः परित्रातव्याः ? इति । (८)

(ख) आर्य्याः ! परित्रायध्वं परित्रायध्वं, योऽमरपक्षपाती, यस्य वा अम्बरतले गतिरस्ति ।

---

(५) नरस्य तन्नामधेयस्य मुनेः सखा तस्य मुनेः नारायणस्य ऊरूद्भवा ऊरोरुत्पन्ना सुरस्त्री अप्सराः उर्वशीत्यर्थः। कैलासनाथं कुवेरम् उपसृत्य स्तुतिवन्दनादिकं कृत्वेत्यर्थः निवर्त्तमाना प्रत्यागच्छन्ती अर्द्धमार्गे पथि विबुध-शत्रुभिः दानवैः वन्दीकृता धृता बद्धा वा, अतः कारणात् अयमप्सरसां गणः शरणं क्रन्दति । साहाय्यार्थं कमपि शरण्यमुद्दिश्य रोदिति इत्यर्थः। वसन्त-तिलकं छन्दः ।

(६) प्रस्तावनालक्षणं यथा। "नटी विदूषको वापि पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते । चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा" ।

(७) अपटीक्षेपेण यवनिकापसारणं विनैव। पात्रप्रवेशावसरे यव-निकापसारणनियमः, अत्र तु अप्सरसां सम्भ्रमसाध्वसद्योतनाय यवनिकापसारणं विनैव प्रवेशः । तदुक्तं, "पटीक्षेपो न कर्त्तव्यः आर्त्तराजप्रवेशने" ।

(८) सूर्य्योपस्थानात् संनिवृत्तं सूर्य्यमुपास्य प्रत्यागच्छन्तमित्यर्थः ।

रम्भा। असुरावलेवादो। (ग)

राजा। किमसुरावलेपेन भवतीनामपराद्धम् ?। (९)

रम्भा। सुणादु महाराओ; जा तवोविसेससङ्किदस्स सुउमारं पहरणं महेन्दस्स, पच्चादेसो रुवगव्विदाए सिरि-गौरिए, अलङ्कारो सग्गस्स, सा णो पिअसही कुवेरभवणादो णिअत्तमाणा केणावि दाणवेण चित्तलेहादुदिआ अद्धपध-ज्जेव णिग्गिहिदा। (घ)

राजा। परिज्ञायते कतमेन दिग्विभागेन गतः स जाल्मः ?

अप्सरसः। इसाणीए दिसाए। (ङ)

राजा। तेन हि मुच्यतां विषादः, यतिष्ये वः सखी-प्रत्यानयनाय।

अप्सरसः। [सहर्षं] सरिसम् एदं सोमवंससम्भवस्स। (च)

राजा। क्व पुनर्मां भवत्यः प्रतिपालयिष्यन्ति ?। (१०)

(ग) असुरावलेपात्।

(घ) शृणोतु महाराजः, या तपोविशेषशङ्कितस्य सुकुमारं प्रहरणं महेन्द्रस्य, प्रत्यादेशो रूपगर्वितायाः श्रीगौर्याः, अलङ्कारः स्वर्गस्य, सा नः प्रियसखी कुवेरभवनात् निवर्त्तमाना केनापि दानवेन चित्रलेखाद्वितीया अर्द्धपथ एव निगृहीता।

(ङ) ऐशान्या दिशा।

(च) सदृशमेतत् सोमवंशसम्भवस्य।

---

(९) असुराणामवलेपेन गर्वेण किमपराद्धं ? युष्माकं का बाधा सम्पादिता इत्यर्थः।

(१०) प्रतिपालयिष्यन्ति मां प्रतीक्ष्य वर्त्तिष्यन्ते इत्यर्थः।

अप्सरसः। एदस्सिं हेमकूड़सिहरे। (छ)

राजा। सूत! ऐशानीं दिशं प्रति प्रेरयाश्वानाशुगमनाय।

सूतः। यथा आज्ञापयति आयुष्मान्। [इति तथा करोति।]

राजा। [रथवेगं रूपयित्वा।] साधु साधु, अनेन रथवेगेन पूर्वप्रस्थितं वैनतेयम् (११) अपि आसादयेयम्।

मम हि

अग्रे यान्ति रथस्य रेणुपदवीं चूर्णीभवन्तो घना-
श्चक्रभ्रान्तिररान्तरेषु वितनोत्यन्यामिवारावलीम्।
चित्रारम्भविनिश्चलं हयशिरस्यायामवच्चामरं
यन्मध्ये समवस्थितो ध्वजपटः प्रान्ते च वेगानिलात्॥ (१२)

(छ) एतस्मिन् हेमकूटशिखरे।

---

(११) वैनतेयं विनतानन्दनं गरुड़मपि।

(१२) रथस्य अग्रे समीपे चूर्णीभवन्तो जवात् आपतद्भिः चक्रैः प्रतिघातेन अश्वखुरोल्लेखनेन वा क्षोदीभवन्तो घना मेघाः रेणुपदवीं धूलिसादृश्यं यान्ति प्राप्नुवन्ति। तथा चक्राणां भ्रान्तिर्भ्रमणम् अराणां चक्रमध्यगतकाष्ठखण्डानाम् अन्तरेषु मध्येषु अन्यां द्वितीयाम् अरावलीम् अरपंक्तिं वितनोति विस्तारयति क्षिप्रभ्रमणेन निरन्तरारपंक्तिपूरितमिव तच्चक्रं प्रतिभातीति भावः। तथा चित्रः अद्भुतः विस्मयकर इत्यर्थः य आरम्भः धावनक्रिया तेन निश्चलं निष्कम्पं चामरं हयशिरसि अश्वमूर्ध्नि आयामवत् दैर्घ्ययुक्तं वर्त्तते इति शेषः। वेगवशात् दीर्घतराकृतिर्लक्ष्यते इति भावः। तथा वेगानिलात् वेगजातमारुतवशात् ध्वजपटः यस्य रथस्य मध्ये प्रान्ते च उभयोः पार्श्वयोश्च समवस्थितः। महावेगसमुत्थेन वातेन ध्वजपटः कदापि रथमध्ये कदापि प्रान्तयोः पतन् लुठतीति भावः। शार्दूलविक्रीड़ितं छन्दः।

[निष्क्रान्तौ राजा सूतश्च ।]

सहजन्या । हला ! गदो राएसी ; ता अम्हेबि जधा-सन्दिट्टं पदेसं गच्छम्ह । (ज)

मेनका । सहि ! एव्वं करेम्ह । (झ)

[इति हेमकूटशिखरे नाट्येन अधिरोहन्ति ।]

रम्भा । अवि नाम सो राएसी उद्धरे णो हिअअ-सल्लम् ? । (ञ)

मेनका । सहि ! मा दे संसओ भोदु । (ट)

रम्भा । णं दुज्जआ दाणवा । (ठ)

मेनका । उअत्थिदसंपहारो महेन्दो बि मज्झमलो-आदो सबहुमाणमाणाविअ तं ज्जेव विवुधविजआअ सेणा-मुहे निओएदि । (ड)

रम्भा । सव्वदा विजई भोदु । (ढ)

मेनका । [क्षणमात्रं स्थित्वा] । हला ! समस्ससध समस्ससध, एस उल्लसिदहरिणकेदणो तस्स राएसिणो सोम-

---

(ज) अयि ! गतो राजर्षिः, तद्वयमपि यथासन्दिष्टं प्रदेशं गच्छामः ।

(झ) सखि ! एवं कुर्मः ।

(ञ) अपि नाम स राजर्षिः उद्धरेत् नो हृदयशल्यम् ?

(ट) सखि ! मा ते संशयो भवतु ।

(ठ) ननु दुर्जया दानवाः ।

(ड) उपस्थितसंप्रहारो महेन्द्रोऽपि मध्यमलोकात् सबहुमानमानाय्य तमेव विबुधविजयाय सेनामुखे नियोजयति । उपस्थितः संप्रहारः संग्रामो यस्य सः ।

(ढ) सर्वथा विजयी भवतु ।

हो सकती है तो चित्रशाला वा जादूघर देख आना भी असंभव नहीं होगा। इस बात को याद रखना होगा कि एक अच्छी शिल्पवस्तु को अपनी आँखों से देखने और समझने से शिल्पदृष्टि जितनी जाग्रत होती है, उतनी सौ भाषणों के सुनने से नहीं होती। छोटी वय से अच्छे चित्रों, अच्छी मूर्तियों को देखते-देखते कुछ समझकर, कुछ बिना समझे ही लड़कों की दृष्टि बनती रहेगी, अपने आप ही उनमें शिल्प के भले-बुरे का विचार करने की शक्ति पैदा होगी और धीरे-धीरे सौंदर्यबोध जाग्रत होगा।

पाँचवीं बात है, प्रकृति से लड़कों का सम्बन्ध स्थापित कराने के लिए भिन्न-भिन्न ऋतुओं में भिन्न-भिन्न उत्सवों का आयोजन करना होगा। उस आयोजन में होगा उन-उन ऋतुओं एवं फल-फूलों का संग्रह और शिल्प तथा काव्य में उन ऋतुओं के सम्बन्ध में जो सुन्दर रचनाएँ हुई हैं उनसे यथासंभव लड़कों से परिचय कराने की व्यवस्था।

छठी बात है, प्रकृति में जो ऋतु-उत्सव हो रहे हैं उनसे लड़कों का परिचय करा देना होगा। शरद् में धान के खेत और कमल के वन, बसंत में पलाश-सेमल का मेला को जिसमें अपनी आँखों से देखकर आनन्द पा सकें, इसकी व्यवस्था करनी होगी। विशेषकर नगरनिवासी लड़कों के लिए यह व्यवस्था अत्यावश्यक है; गाँव के लड़कों की दृष्टि इधर आकर्षित कर देने से ही काम चल जायगा। इन ऋतु-उत्सवों के लिए विशेषरूप से छुट्टी देकर वन-भोजन और ऋतु-उपयोगी वेष-भूषा तथा खेल-कूद की व्यवस्था करनी होगी। प्रकृति से एक बार सम्बन्ध स्थापित हो जाने पर, प्रकृति को वास्तविक प्रेम करना सीख लेने पर, लड़कों के हृदय में रस का उद्गम फिर कभी नहीं सूखेगा; क्योंकि, प्रकृति ही युग-युग से शिल्पी को शिल्पसृजन का उपादान जुटाती आई है।

अंतिम बात यह है, वर्ष के किसी समय विद्यालयों में शिल्पसृजन का एक उत्सव करना होगा। प्रत्येक शिक्षार्थी को कुछ न कुछ शिल्पवस्तु अपने हाथों से बनाकर इसमें श्रद्धा के साथ सम्मिलित होना होगा—वह शिल्पवस्तु चाहे कितनी भी सामान्य क्यों न हो। लड़कों की सर्जित शिल्पवस्तुएं

उत्सव के अर्घरूप में संगृहीत होकर सजाई रहेंगी। नृत्यगीत, जुलूस आदि के द्वारा उत्सव को सर्वाङ्गसुन्दर बनाने के लिए चेष्टा करनी चाहिए। उत्सव के लिए एक निश्चित समय ठीक कर देना कठिन है, देशभेद से वह बदलेगा। बंगाल में शरद्‌ऋतु ही ठीक मालूम पड़ता है।

हमें जहाँ तक मालूम है, भारत के शिक्षाक्षेत्र में एक मात्र रवीन्द्रनाथ ने ही कलाचर्चा को उपयुक्त स्थान दिया है। विश्वविद्यालय की वर्त्तमान शिक्षापद्धति की व्यवस्था से उन्हें पग-पग पर बाधाएँ मिलीं। विश्वविद्यालय में कलाचर्चा का स्थान न होने के कारण अभिभावकगण कलाचर्चा को अत्यन्त अनावश्यक समझते हैं; फलस्वरूप जिन लड़कों में बचपन में नाना कलाविद्याओं की चर्चा में विशेष अनुराग देखा गया है, वे भी प्रवेशिका परीक्षा के दो-एक वर्ष पहिले से कलाचर्चा की अनावश्यकता के बारे में सजग हो जाते हैं और इसी समय से उनका शिल्पानुराग कम होते-होते बिलकुल लुप्त हो जाता है। इस विषय में हमारे सभी प्रकार की ज्ञानचर्चा के केन्द्र विश्वविद्यालय के अवगत होने का समय आगया है।

इसी प्रसंग में और एक बात कहना चाहता हूँ। जिन सभी सामयिक पत्रिकाओं के सम्पादक अपरिणत हाथों के कच्चे काम को किस विशेष शैली के शिल्प के नाम से प्रकाशित करते हैं, उनकी रुचिहीनता के लिए निन्दा न कर केवल यही कहना यथेष्ट होगा कि अच्छे नए चित्रों के न मिलने पर वे बल्कि अच्छे पुराने चित्रों को छापें, लेकिन मित्रता वा आत्मीयता के लिए लोगों को गुमराह करने के अपराधी न बनें। चित्रों के चुनाव में मर्मज्ञ, सौंदर्यबोधसम्पन्न लोगों की जरूरत पड़ने पर सहायता लेनी होगी; क्योंकि, लोकशिक्षा के क्षेत्र में सामयिक पत्रों का भला वा बुरा प्रभाव फैलाने की शक्ति तुच्छ नहीं है।

निष्कर्ष यह है कि शिल्प के सम्बन्ध में शिक्षित समाज और विश्वविद्यालय की अवहेलना के कम होने पर तो शिल्पचर्चा का प्रसार होगा और फलस्वरूप देशवासियों का सौंदर्यबोध और पर्यवेक्षणशक्ति बढ़ेगी—इसमें संदेह नहीं।

उनके चले जाने से शिल्पसर्जना के कितने ही श्रेष्ठ निदर्शन चले जायँगे। निश्चितरूप से नहीं कह सकता कि पुरी और कोणार्क के भास्कर शिल्पियों ने इस विषय को क्यों चुना था। विभिन्न मनीषियों ने भिन्न-भिन्न व्याख्याएँ दे रखी हैं। मनुष्य के जीवन में नवरस की जो लीलाएँ हैं उनमें यह अन्यतम रस-आदिरस है। यह बात निःसंशयरूप से कही जा सकती है कि रससर्जन की दृष्टि से उपर्युक्त मूर्तियाँ बहुत ही उच्चकोटि की हैं।......

शिल्पी की चित्तवृत्ति भिन्न-भिन्न समयों पर भिन्न भिन्न भावावेगों से आन्दोलित होती है। ऐसा देखा जाता है कि एक ही शिल्पी की किसी एक रचना से रसिक के मन में दिव्य भाव जाग उठे और दूसरी रचना निम्नकोटि की हुई। लोग विस्मित होते हैं। लेकिन, विस्मय के लिए कोई कारण नहीं हैं; वातावरण के परिवर्त्तन से मानसिक अवस्था के परिवर्त्तन से वही शिल्पी भिन्न मनुष्य हो जाता है, रस की उपलब्धिकर, छन्द का रहस्य जान, जिस क्षण शिल्पी सर्जन करता है उस क्षण मनुष्य द्वारा प्राप्त करने योग्य सबसे उन्नत दशा उसकी मुट्ठी में होती है; लेकिन सदैव ऐसा ही नहीं होता। व्यावहारिक जीवन में पड़कर कभी-कभी स्मृति-भ्रंश होता है, समग्र जीवन आनन्द के छन्द में छन्दमय होगा, वास्तव में यही शिल्पी की साधना होने पर भी, सदा सिद्ध नहीं होती है।...

अद्वैत की साधना में परम उपलब्धि पर पहुँचने के लिए भिन्न-भिन्न दशाओं का अतिक्रमण करना पड़ता है। कलाकार का आत्म-विकास भी उसी प्रकार से होता है। किन्तु अद्वैतवादी सोच सकता है कि साधना के पथ पर जो कुछ छोड़ जाना होगा वह अनित्य है, वह तुच्छ है; उसीको लेकर शिल्पसर्जन का क्या अर्थ होता है? शिल्पी का उत्तर यह है कि शिल्प का सर्जन माया के ही आधार पर होता है। माया स्रष्टा को अभिभूत नहीं करती है। ठाकुर श्रीरामकृष्ण ने उपमा के बहाने कहा है कि साँप का बिष साँप पर असर नहीं करता। शिल्पी भी माया को जानकर माया का व्यवहार करता है इसीलिए वह लीला बन जाती है। देखने में तुच्छ हो या ऊँचा हो, अनित्य हो या नित्य हो, सब के अन्दर अनुस्युत 'एक' की एकता का ही अनुभव करना और प्रकट करना ही शिल्पी की साधना, शिल्पी की सिद्धि है। विषय के मोह में पड़ना ही भय

का कारण है। वही माया की दासता है। शिल्पी माया को 'एक' के बीच विचित्र छन्द के आन्दोलनरूप में देखता है।......

जिस कलाकार में समता और समग्रता का बोध नहीं हुआ है उसीको विशेष विषय चाहिए, विशेष संवेदना चाहिए। अगर इसका अभाव हुआ तो उसकी प्रेरणा काउद्गम सूख गया; क्योंकि रस के चिर उद्गम का पता नहीं चला है।......

हिन्दू घर में पैदा होकर हिन्दुओं की शिक्षा-दीक्षा में मैं पला हूँ। एक समय विशेषकर देव-देवियों के ही चित्र अंकित किए। किन्तु अब जिस प्रकार देवताओं के चित्र बनाता हूँ उसी प्रकार साधारण जीवन के चित्र भी बनाया करता हूँ; दोनों में बराबर आनन्द पाने की चेष्टा करता हूँ। देवताओं की रूप-कल्पना ही उच्चकोटि की वस्तु है; चारों ओर की साधारण वस्तुओं के रूप तुच्छ हैं—यह धारणा पहिले थी।मन की परिणति के साथ-साथ अब रूप को ही मुख्य नहीं समझता उनमें से प्रत्येक को एक ही सत्ता के भिन्न-भिन्न छन्द और मूर्ति के रूप में देखता हूँ। समग्र संसार, अन्दर और बाहर के सभी रूप जिस जीवन से निकलते हैं और जिस जीवन में स्पन्दमान हैं[१] सत्ता के उसी जीवन छन्द को सभी रूपों में ढूँढ़ता हूँ चाहे वह साधारण हो या असाधारण। अर्थात् पहिले देवता के रूप में ही देखता था, अब मनुष्य, वृक्ष, और पहाड़ में देखने की चेष्टा करता हूँ।

सभी देशों, सभी युगों में बड़ी कला के पीछे बड़ा आदर्श वा बड़ी कल्पना रहती है। जैसे यूरोप में ईसा का आदर्श था, भारत में था श्रीकृष्ण और बुद्ध का, चीन में तावो का। कल्पना की मूर्ति रूप में व्यक्ति की पूजा करते रहने पर कालान्तर में व्यक्ति कल्पना से बड़ा हो उठता है, धीरे-धीरे मनुष्य कल्पना को गलत समझने लगता है वा भूल जाता है; पारिपार्श्विक

---

[१]यदिदं किञ्च जगत् सर्वं प्राण एजति निःसृतम्। कठ २, ३, २ श्लोक।

शिल्पसाधना

उपनिषद् में कहा गया है, आनन्द से ही सारे संसार की उत्पत्ति हुई है। वह आनन्द सारे दुःख-सुखों को लेकर भी दुःख-सुख से परे है। कलाकार भी सृजन करता है सृजन के आनन्द में। कोई शिल्पवस्तु यथार्थ सृजन की कोटि में आती है वा नहीं उसका विचार भी उसी से होता है। आनन्द से अगर किसी भी चित्र वा मूर्ति का उद्भव हुआ है तो वह दूसरों को भी आनन्द का स्वाद देगी। यथार्थ शिल्पसर्जन सजीव होता है, वह अमर है। अगर अजन्ता-इलोरा के सारे चित्र और मुर्तियाँ नष्ट हो जाएँ तो भी वास्तव में उनका नाश नहीं होगा। कारण यह है कि रसिकों के चित्त में तब भी वह अमर बना रहेगा। अगर एक भी कलाकार ने उसे देखा है तो उसके कामों के अन्दर से उसका प्रभाव, उसकी सत्ता काम करेगी। अर्थात् निष्कर्ष यह निकला कि शिल्पसर्जन होने के कारण वह जीवधर्मी है। जीवों की ही भाँति उसके अस्तित्व की धारा वंशानुक्रम से प्रवर्तित होती है।......

बहुत दिन पहिले आचार्य पैट्रिक गेडिस शान्तिनिकेतन आए थे। तब हम लोगों ने दीवार पर चित्र बनाने की चेष्टा की थी, उपयुक्त उपकरणों के अभाव और करणकौशल को अच्छी तरह न जानने के कारण थोड़े समय के बाद उस चेष्टा को छोड़ दिया। आचार्य गेडिस इस बात को देखकर दुःखी हुए। उन्होंने कहा—"क्यों नहीं बनावोगे ? अगर लकड़ी के कोयले से भी बनाते हो और वह चित्र अच्छा बन पड़ता है, अगर उसे एक भी आदमी देखता है तो भी तुम्हारा काम करना सार्थक हो गया। निरूद्यम होकर अगर बैठे रहते हो तो तुम्हारे भाव कल्पना जो कुछ तुम्हारे अन्दर जाग उठते हैं तुम्हीं में लुप्त हो जायँगे, तुम भी उसे भलीभाँति नही जान पावोगे, वह दूसरों की दृष्टि के लिये अगोचर ही रह जायगा।'......

सभी शिल्पों का लक्ष्य एक है। कविता, मूर्ति, चित्र, नाच, गाना, सभी सर्जन के मूल आनन्द के छन्द को अपने-अपने छन्दों में पकड़ना चाहते हैं। इस दृष्टि से योगसाधना और शिल्पसाधना में समानता है। अध्यात्म साधना में सृष्टि के सारे वैचित्र्य के अन्तराल में ऐक्य को ढूँढ़ना है—'एक' की तलाश की जाती है, जिसके जानने से सब कुछ को जाना जा सकता है। शिल्प भी ठीक उसी प्रकार 'विराट एक' के दर्शन की अभिलाषा से चल रहा है। एक चीनी कलाकार ने कहा है, "देवता की मूर्ति और दूब का अंकुर, यथार्थ कलाकार के निकट दोनों का एकही मूल्य है, एकही रसप्रेरणा को जगाने की शक्ति दोनों में है।" इसी से समझा जा सकता है कि शिल्पी के लिए 'एक' की धारणा करना कहाँ तक संभव है। हाँ, देवमूर्ति के प्रति अश्रद्धा की कोई बात नहीं है, केवल दूब के अंकुर के प्रति भी समान श्रद्धा की आवश्यकता है।

शिल्पसाधना में शिल्पी सम्पूर्णरूप से निर्लिप्त हो जाता है। कलाकार का अपना व्यक्तिगत भावावेग आकांक्षा, संस्कार, सब कुछ है। किन्तु इसी क्षण वह एक भाव के आवेग से विचलित हो रहा है और दूसरे क्षण सर्जन करने बैठ अपने आवेग से अपने को मुक्त कर लेता है, तब विषयलिप्त उसकी अपनी कोई आकांक्षा या आसक्ति नहीं रहती है, व्यक्तिगत उपलब्धि की तीव्रता ने नैर्व्यक्तिक रूप धारण कर लिया है। सर्जन के समय शिल्पी अपने व्यक्तित्व से ऊपर चला जाता है और उसका विषय भी आवेग से, भावना से रस में पहुँच जाता है।

कलाकार हृदयविदारक दृश्य भी अंकित करता है और मन को मुग्ध करनेवाले विषयों के चित्र भी बनाता है। लेकिन दोनों की किसी भी वस्तु में लिप्त वा विचलित नहीं होता। शिल्पी सुखदाई या दुःखदाई वातावरण से ऊपर उठकर दोनों के मूल में सत्ता का जो आनन्द वा रस है उसीकी मूर्ति बनाता है। रस के पक्ष से सर्जन न होने से, रस में न पहुँचने से, रचना विकृत होती है—सुख में विकृत, दुःख में विकृत। इसीलिए देखा जाता है कि साधक की जो धारा है वही शिल्पी की भी धारा है, दोनों अपने-अपने

पथ पर चलकर सर्वगत एक विशुद्ध आनन्द को प्राप्त करते हैं। दूसरी उपासना वा व्रत आचार का पालन न करने पर भी शिल्पी अपने कलाकौशल की सहायता से ही साधना करता है ।...

एक विशेष दृष्टान्त लिया जाय। काली की मूर्ति वा नटराज शिव की मूर्ति जिसके ध्यान में पहिले आयी थी वह व्यक्ति शिल्पी है, साधक होने पर भी वह शिल्पी है, जिसके हाथों में पहिले आकार प्राप्त हुई थी वह शिल्पी होने पर भी साधक है। क्योंकि, दोनों ने ही किसी एक रस के अन्दर रंग रूप गति और छन्द की मूर्ति वा समष्टि रूप का सर्जन किया है—अथवा कहा जा सकता है कि उसका सर्जन दोनों ही के मन में हुआ है ।...

सामाजिक संस्कार के साथ मिलाकर सुनीति-दुर्नीति का अन्तर कला के क्षेत्र में अनावश्यक है। क्योंकि, सामाजिक संस्कार में जो निन्दनीय है हो सकता है कि वही शिल्पी को रसबोध के लिए उद्बुद्ध करके कोई ऐसी रचना करा सके जो शिल्परूप में हजारों लोगों को संस्कारयुक्त खंडित धारणा से परे विशुद्ध रसोपलब्धि पर ले जाय। विषय विशेष को लोग बुरा कहें पर मायावी तूलिका के स्पर्श से उसमें विषयातीत ऐसा कुछ निखर उठेगा जो अभिनव है। जो देखता है वा जो अनुभव करता है वही वस्तु विषयी के कमी-बेशी और चेतना के तारतम्य पर ही निर्भर करता है कि विषय सुनीति-दुर्नीति के स्तर पर ही रह जायगा या उसके ऊपर उठेगा। उपनिषद् में तो दृष्टिकोण है: आत्मा के द्वारा ही रूप, रस, गंध, शब्द, स्पर्श और मैथुन की उपलब्धि होती है, इस संसार में ऐसी कौन सी वस्तु है जिसे आत्मा नहीं जानता है।[1] अतएव विषय विशेष में दोष वा गुण नहीं है।

---

[1] येन रूपं रसं गंधं शब्दान् स्पर्शाश्च मैथुनान्। एतेनैव विजानाति किमत्र परिशिष्य ते ॥

ऊपर श्री अरविन्द के अंगरेजी अनुवाद के अनुसार श्लोक का हिन्दी अर्थ दिया गया है।

स्रष्टा निरन्तर जिस विशुद्ध आनन्द वा रस के अन्दर से अवगत होता है शिल्पी भी यदि उसी आनन्द वा रस के अन्दर से अवगत होता है; अगर शिल्पी भी उसी आनन्द या रस की ही दृष्टि से विषय को देखता और सर्जन करता है तो विष भी अमृततत्त्व का परिचय प्रदान करता है। विषय-वस्तु के मोह में ही जो कलाकार भूल जाता है, वह विषयवस्तु को रसवस्तु में परिणत नहीं कर पाता है—बाह्य वस्तु वा घटना ही मिलती है, रस के अन्दर मन को विस्तार वा मुक्ति नहीं मिलती है। जब डाक्टर की निगाह रोग से अधिक रोगी पर ही होती है तो आरोग्यलाभ दुर्लभ हो जाता है।

फिरभी प्रश्न उठता है, सामाजिक दृष्टि से जो कुछ दुर्नीतिपूर्ण है उसी को विषयवस्तु बनाने से समाज का क्या कोई अनिष्ट नहीं होता है। मेरा कथन है कि शिल्पी की रचना जहाँ भी सार्थक हुई है वहीं भावावेग इसमें परिणत हुआ है, खण्ड उपलब्धि एक अखंड के छंद की पकड़ में आ गई है; उसमें शिल्पी भी जैसे रसिक दर्शक है वैसे खण्डित वस्तु वा घटना से, मानसिक अभ्यास और सामाजिक संस्कार से, सम्पूर्णरूप से मुक्त हो गया है; अत्यंत गौणरूप में भी इसका फल सामाजिक शुभ ही हुआ अशुभ नहीं। हाँ, ऐसे रोगग्रस्त मन हैं, ऐसे कितने ही वयःप्राप्त शिशु भी देखे जाते हैं, जो उपलब्ध-स्वरूप वस्तु को ही देख पाते हैं, रस का आवेदन उनके लिए निष्फल है। इनकी अपरिणत वा विकृत मति के उपयोगी शिल्प का सर्जन नहीं किया जा सकता; बल्कि दूसरे प्रकार से चेष्टा करना अच्छा है, धीरे-धीरे इनका बोध, इनकी दृष्टि, जिसमें स्वस्थ और परिणत हो सके।......

कुछ समय पूर्व, पुरी और कोणार्क के मन्दिरों की बाहरी भीतों पर स्थित बन्धकाम मूर्तियों[1] को नष्ट करने की बात उठी थी। अत्यन्त घातक प्रस्ताव!

[1] उन्हें दुर्नितिपूर्ण न कहकर आदिरसात्मक कहना ही ठीक है। शिल्पवस्तु का वर्गीकरण नीति की दृष्टि से नहीं, रस की दृष्टि से ही संभव है। रस का व्यभिचार करने पर ही शिल्प के लिए वह 'दुर्नीति है।' रस के साथ व्यभिचार करने पर 'शिल्प' को सामाजिक सुनीति के प्रचार में भी लगाया जा सकता है; लेकिन वह यथार्थ शिल्प- र्जन नहीं है।

दत्तो रहो दीसदि ; ण एसो अकिदत्थो पड़िणिउत्तिस्सदित्ति तक्केमि। (ण)

[निमित्तं (१३) सूचयित्वा अवलोकयन्त्यः स्थिताः।]

[ततः प्रविशति रथारूढ़ो राजा सूतश्च, भयनिमीलिताक्षी चित्रलेखादक्षिणहस्तावलम्बिता उर्वशी च।]

चित्र। सहि! समस्सस समस्सस। (त)

राजा। सुन्दरि! समाश्वसिहि समाश्वसिहि।

गतं भयं भीरु! सुरारिसम्भवं,
त्रिलोकरक्षी महिमा हि वज्रिणः।
तदेतदुन्मीलय चक्षुरायतं
निशावसाने नलिनीव पङ्कजम्॥ (१४)

चित्र। अम्महे, उस्ससिदमेत्तसम्भाविदजीविदा अज्जवि सस्सम् एषा ण पड़िवज्जदि। (थ)

(ण) अयि! समाश्वसित समाश्वसित, एष उल्लसितहरिणकेतनः तस्य राजर्षेः सोमदत्तो रथी दृश्यते, नैषोऽकृतार्थः प्रतिनिवर्त्तिष्यते इति तर्कयामि।

(त) सखि! समाश्वसिहि समाश्वसिहि।

(थ) आश्चर्य्यं, उच्छ्वसितमात्रसम्भावितजीविता अद्यापि संज्ञा एषा न प्रतिपद्यते।

---

(१३) निमित्तं सूचयित्वा प्रियलाभद्योतकानि भूनासिकास्पन्दनादीनि मङ्गललक्षणानि निरूपयन्त्य इत्यर्थः।

(१४) हे भीरु भयशीले! उर्वसि! सुरारिसम्भवं दानवद्रोहजनितं भयं भयकारणं गतं निरस्तम्। हि यतः वज्रिणः इन्द्रस्य महिमा त्रिलोकरक्षी त्रिभुवनविपदुद्धारसमर्थ इत्यर्थः। तत् तस्मात् निशावशाने रात्रिशेषे नलिनी पङ्कजमिव पद्मपलाशमिव एतत् आयतं सुविशालं चक्षुरुन्मीलय। वंशस्थविलं छन्दः।

राजा। बलवदत्र ते सखी परित्रस्ता। (१५) तथाहि,

मन्दारकुसुमदाम्ना गुरुरस्याः सूच्यते हृदयकम्पः।
मुहुरुच्छ्वसता मध्ये परिणाहवतोः पयोधरयोः॥ (१६)

चित्र। [सकरुणम्]। हला उव्वसि! पज्जवत्थावेहि अत्ताणअम्, अणच्छरा विअ पड़िहासि। (द)

राजा।

मुञ्चति न तावदस्या भयकम्पः कुसुमकोमलं हृदयम्।
सिचयान्तेन कथञ्चित् स्तनमध्योच्छ्वासिना कथितः॥ (१७)

[उर्वशी चैतन्यं प्रत्यागच्छति।]

राजा। [सहर्षम्]। चित्रलेखे! दिष्ट्या वर्द्धसे, प्रकृतिमापन्ना (१८) ते प्रियसखी। पश्य,

आविर्भूते शशिनि तमसा रिच्यमानेव रात्रि-
र्नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठधूमा।

(द) अयि उर्वशि! पर्य्यवस्थापयात्मानं, अनप्सरा इव प्रतिभासि।

---

(१५) बलवत् परित्रस्ता नितरां भीतेत्यर्थः।

(१६) परिणाहवतोः सुविशालयोः पीनयोरित्यर्थः पयोधरयोः स्तनयोः मध्ये अन्तरप्रदेशे मुहुर्वारंवारं उच्छ्वसता प्रकम्पिना मन्दारकुसुमदाम्ना मन्दार-पुष्पविरचितया स्रजा अस्याः गुरुर्बलवान् हृदयकम्पः सूच्यते द्योत्यते। आर्य्या-छन्दः।

(१७) स्तनमध्योच्छ्वासिना स्तनान्तरे कम्पमानेन सिचयान्तेन वस्त्राञ्चलेन कथञ्चित् कृच्छ्रेण कथितः सूचितः भयकम्पः दानवत्रासजनितः कम्पः अस्याः कुसुमकोमलं पुष्पसुकुमारहृदयं न मुञ्चति तावत् अद्यापि न प्रशाम्यतीति भावः। आर्य्याछन्दः।

(१८) प्रकृतिमापन्ना चैतन्यं प्राप्ता।

(१९) अन्तर्मध्ये मोहेन मुच्यमाना शनैः शनैश्चैतन्यमधिगच्छन्तीत्यर्थः इयं वरतनुः उर्वशी। शशिनि चन्द्रे आविर्भूते उदितवति तमसा अन्धकारेण रिच्य-

मोहेनान्तर्वरतनुरियं लक्ष्यते मुच्यमाना,
गङ्गा रोधःपतनकलुषा गच्छतीव प्रसादम् ॥ (१८)

चित्र। हला उव्वसि! विस्सत्था होहि, आवसाणुकम्पिणा महाराएण पराहदा क्खु ते तिदसपरिबन्थिणो हदासा दाणवा। (ध)

उर्व। [उन्मील्य चक्षुषी] किं सम्पहारदंसिणा महेन्देण अब्भुववस्साम्हि ?। (न)

चित्र। ण महेन्देण ; महेन्दसरिसाणुभावेण राएसिणा पुरूरवसेण। (प)

उर्व। [राजानमवलोक्यात्मगतम्]। उवकिदं क्खु मे दाणवेन्दसम्भमेण। (फ)

राजा। [उर्वशीं विलोक्यात्मगतम्]। स्थाने खलु नारायणमृषिं विलोभयन्त्य ऊरुसम्भवामिमां विलोक्य व्रीड़िताः सर्वा अप्सरसः। अथवा, नेयं तपस्विनः सृष्टिरित्यवैमि। कुतः।

(ध) अयि उर्वशि! विश्वस्ता भव, आपन्नानुकम्पिना महाराजेन पराहताः खलु ते त्रिदशपरिपन्थिनो हताशा दानवाः।

(न) किं संप्रहारदर्शिना महेन्द्रेण अभ्युपपन्नास्मि ?।

(प) न महेन्द्रेण, महेन्द्रसदृशानुभावेन राजर्षिणा पुरूरवसा।

(फ) उपकृतं खलु मे दानवेन्द्रसम्भ्रमेण।

माना मुच्यमाना रात्रिरिव, तथा छिन्नभूयिष्ठधूमा अपगतधूमा भास्वरा नैशस्य रात्री प्रदीपितस्य हुतभुजः अग्नेः अर्चिः शिखेव लक्ष्यते। अथवा रोधःपतनेन कलुषा पतिततीरभूमिसंयोगेन आविला गङ्गा भागीरथी पश्चात् प्रसादं गच्छतीव, तद्वल्लक्ष्यते इति भावः। मन्दाक्रान्ताछन्दः।

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः ?
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ?।
वेदाभ्यासजड़ः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ? ॥ (२०)

उर्व। हला चित्तलेहे ! सहीअणो कहिं क्खु भवे ?। (व)

चित्र। अभअप्पदाई महाराओ जाणादि। (भ)

राजा। [उर्वशीं विलोक्य]। महति विषादे वर्त्तते ते सखीजनः ; पश्यतु भवती !

यदृच्छया त्वं सकृदप्यवन्ध्ययोः
पथि स्थिता सुन्दरि ! यस्य नेत्रयोः।

(व) अयि चित्रलेखे ! सखीजनः कुत्र खलु भवेत् ?

(भ) अभयप्रदायी महाराजो जानाति।

---

(२०) अस्याः उर्वश्याः सर्गविधौ सृष्टिक्रियायां कान्तिप्रदः लावण्यप्रदाता चन्द्रः प्रजापतिः स्रष्टा अभूत् ? नु इति प्रश्ने, अभूत किमित्यर्थः। "स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृग् विधुः" इत्यमरः। किं वा शृङ्गार एव एको मुख्यो रसो यस्य स शृङ्गारैकरसो मदनः स्वयं नु किं प्रजापतिः स्रष्टा अभूत् ? अथवा पुष्पाणां कुसुमानाम् आकरः कुसुमयोनिरित्यर्थः। मास चैत्रः किं नु प्रजापतिः अभूदिति शेषः कथमियं जिज्ञासा, इत्याशङ्क्याह, वेदाभ्यासजड़ इति। अन्यथा वेदाभ्यासजड़ः निरन्तरवेदपाठेन विषयबोधरहित इत्यर्थः। तथा विषयेभ्य इन्द्रियग्राह्येभ्यो रूपरसादिभ्यो व्यावृत्तं प्रतिनिवृत्तं कौतूहलं लालसा यस्य, भोगवासनाविरत इत्यर्थः, एवम्भूतः पुराणो मुनिः कथं केन प्रकारेण इदं मनोहरं रूपं निर्मातुं प्रभवेत् ? क्व वा रसज्ञानविरहितः पुराणो मुनिः ? क्वचैतत् सौकुमार्य्यं ? सर्वथा नेयं निर्मितिः जराजीर्णप्रकृतेः वेदाभ्यासनियतहृतचेतसो नारायणमुनेः, अपि तु कस्यापि चन्द्रमदनादिकस्य सुकुमारतरस्य विलसितमेतदिति भावः। शार्दूलविक्रीड़ितं छन्दः।

(२१) हे सुन्दरि ! त्वं यदृच्छया अनिर्दिष्टकारणेन सकृदपि एकवारमपि यस्य अवन्ध्ययोः सार्थकयोः त्वद्दर्शनलाभादिति भावः। नेत्रयोः पथि गोचरे

त्वया विना सोऽपि समुत्सुको भवेत्
सखीजनस्ते किमु रूढ़सौहृदः ? ॥ (२१)

उर्व०। [आत्मगतम्] अमिअं क्खु दे वअणं ; अधवा, चन्दादो अमिअं त्ति किम् एत्थ अच्चरीयम् ? [प्रकाशम्]। अदोज्जेव मे तुवरदि हिअअम्। (म)

राजा। [हस्तेन दर्शयन्]।

एताः सुतनु ! मुखं ते सख्यः पश्यन्ति हेमकूटगताः।
उत्सुकनयना लोकाश्चन्द्रमिवोपप्लवान्मुक्तम् ॥ (२२)

[उर्वशी साभिलाषं पश्यति]।

चित्र०। हला ! किं पेक्खसि ?। (य)

उर्व०। समदुक्खसुहो पीवीअदि लोअणेहिं। (र)

चित्र०। [सस्मितम्] अइ ! को ?। (ल)

उर्व०। णं पणइअणो। (व)

(म) अमृतं खलु ते वचनम् ; अथवा चन्द्रतोऽमृतमिति किमत्राश्चर्यम्। अतएव मे त्वरते हृदयम्।

(य) अयि ! किं प्रेक्षसे ?

(र) समदुःखसुखः पीयते लोचनाभ्याम्।

(ल) अयि कः ?

(व) ननु प्रणयिजनः।

स्थिता भवसि, यस्य दर्शनपथं गच्छसीत्यर्थः। सोऽपि त्वया विना समुत्सुकः पुनस्त्वद्दर्शनाकाङ्क्षया उत्कण्ठितो भवेत्। किमु रूढ़सौहृदः बद्धसख्यस्ते सखीजनः ? चिरपरिचितः सखीजनस्त्वद्दर्शनाशया यत् समुत्सुको भवेत्, तत्र किं वक्तव्यमित्यर्थः। वंशस्थविलं छन्दः।

(२२) हे सुतनु ! उत्सुकनयनाः कौतूहलाविष्टनेत्रा लोकाः उपप्लवात् राहुग्रासात् मुक्तं चन्द्रमिव चन्द्रं यथा पश्यन्तीत्यर्थः। तद्वत् हेमकूटगताः एताः सख्यः ते मुखं प्रश्यन्ति।

मेनका। [सहर्षमवलोक्य] हला! एसो चित्तलेहादुदिअं पिअसहीम् उव्वसीं गेण्हिअ, विसाहासहिदो विअ भअवं सोमो, उवत्थिदो सो राएसी। (अ)

रम्भा। [निर्वर्ण्य] दुवेवि एत्थ पिआ उवगदा, जं सही पच्चाणीदा, जं च अपरिक्खदसरीरो राएसी दीसदि। (ब)

सहजन्या। सहि! तुमं भणासि दुज्जओ दाणवोत्ति। (स)

राजा। सूत! इदं तच्छैलशिखरम्, अवतारय रथम्।

सूतः। यथाज्ञापयति आयुष्मान्। [इति तथा करोति]।

[उर्वशी रथावतारक्षोभं नाटयन्ती सत्रासं राजानमवलम्बते]।

राजा। [स्वगतम्]। हन्त हन्त, सफलो मे विषयावतारः। (२३)

यदिदं रथसंक्षोभादङ्गेनाङ्गं ममायतेक्षणया।
स्पृष्टं सरोमकण्टकमङ्कुरितं मनसिजेनेव॥ (२४)

(अ) अयि! एष चित्रलेखाद्वितीयां प्रियसखीम् उर्वशीं गृहीत्वा विशाखासहित इव भगवान् सोमः उपस्थितः स राजर्षिः।

(ब) द्वे अपि अत्र प्रिये उपगते, यत् सखी प्रत्यानीता, यच्च अपरिक्षतशरीरो राजर्षिर्दृश्यते।

(स) सखि! त्वं भणसि दुर्जयो दानव इति।

---

(२३) विषये उर्वशीप्रत्यानयनरूपविषये अवतारः अवतरणम्, किंवा इन्द्रियग्राह्य रूपरसादिभोगे अवतरणं मानवजन्मधारणमिति यावत्।

(२४) रथसंक्षोभात् इदं मम अङ्गम् आयतेक्षणायाः अङ्गेन स्पृष्टं सत् यत् सरोमकण्टकं जातं, तत् मनसिजेन अङ्कुरितमिव मन्ये। दर्शनादन्तःसञ्जातमनसिजेन स्पर्शनादङ्कुरितं पुलकच्छलेन बहिरुद्भिन्नमिति भावः। आर्य्याछन्दः।

उर्व । [सव्रीड़ा] (२५)। हला! किञ्चिदवरतो ओसर (ह)

चित्र । णाहं णाहं सक्का (च)।

रम्भा । एवं पिअआरिणं सम्भाविम्ह राएसिं। (क)

अप्सरसः । एवं करेम्ह (ख) [इत्युपसर्पन्ति]।

राजा । सूत ! उपश्लेषय रथम्। (२६)

यावत् पुनरियं सुभ्रूरुत्सुकाभिः समुत्सुका।
सखीभिर्याति सम्पर्कं लताभिः श्रीरिवार्त्तवी ॥ (२७)

सूतः । तथा। [इति रथं स्थापयति]।

अप्सरसः । दिट्ठिआ महाराओ विजएण वड्ढदि। (ग)

राजा । भवत्यश्च सखीसमागमेन।

उर्व । [चित्रलेखादत्तहस्तावलम्बा रथादवतीर्य्य]

(ह) सखि ! किञ्चिदपरतोऽवसर।

(च) नाहं नाहं शक्ता।

(क) एवं प्रियकारिणं सम्भावयामो राजर्षिम्। सम्भावयामः प्रत्युद्गमन-प्रियसम्भाषणादिना सत्कुर्मः।

(ख) एवं कुर्मः।

(ग) दिष्ट्या महाराजो विजयेन वर्द्धते।

---

(२५) पुलकादिकं राज्ञो भावं दृष्ट्वा सलज्जा इति भावः।

(२६) उपश्लेषय भूमौ अवस्थापय।

(२७) यावत् पुनः समुत्सुका उत्कण्ठिता इयं सुभ्रूः उत्सुकाभिः सखीभिः सम्पर्कं याति मिलति। किम्भूता, आर्त्तवी श्रीः वसन्तलक्ष्मीः लताभिरिव, यथा लताभिः सह मिलति तद्वदित्यर्थः। वसन्तलक्ष्मीर्यथा लताभिः सङ्गता सती प्रसूनादिना लतानां शोभातिशय्यम् उत्पादयति, तथा उर्वशी तासां विकासकारणं भवतीति भावः। अनुष्टुप्छन्दः।

हला ! बलिअं परिस्सअध मं, ण क्खु मे आसि आसंसो, जधा पुणोबि सव्वं सहीअणं पेक्खिस्सम् । (घ)

[सख्यः परिष्वजन्ते]।

मेनका। [साशंसं]। सव्वधा महाराओ पुहवीं पालयन्तो भोदु । (ङ)

सूतः। आयुष्मन् ! महता रथवंशेनोद्दर्शितम् ।

अयञ्च गगनात् कोऽपि तप्तचामीकराङ्गदः ।

अभिरोहति शैलाग्रं तड़िल्वानिव तोयदः ॥ (२८)

अप्सरसः। अम्मो ! चित्तरहो । (च)

[ततः प्रविशति चित्ररथः]।

चित्ररथः। [राजानमुपसृत्य]। दिष्ट्या महोपकारपर्य्याप्तेन विक्रममहिम्ना वर्द्धसे ।

राजा। अये ! गन्धर्वराजः [रथादवतीर्य्य]। स्वागतं प्रियसुहृदे । [अन्योऽन्यं हस्तं स्पृशतः]।

चित्ररथः। वयस्य ! केशिना अपहृतासुर्वशीमुपश्रुत्य प्रत्या-

(घ) अयि ! बलवत् परिष्वजध्वं मां, न खलु मे आसीत् आशंसा, यथा पुनरपि सर्वं सखीजनं प्रेक्षिष्ये ।

(ङ) सर्वथा महाराजः पृथिवीं पालयन् भवतु ।

(च) अहो ! चित्ररथः ।

---

(२८) तप्तेन सद्योगलितसुवर्णोपमद्युतिना चामीकरेण सुवर्णेन निर्मितम् अङ्गदं यस्य सः तप्तचामीकराङ्गदः अयं कोऽपि, तड़िल्वान् विद्युल्लेखाविराजितः तोयदो मेघः इव । विद्युत्वान् मेघो यथा शैलाग्रमधिरोहति तद्वदित्यर्थः । अङ्गदोल्लिखत्वात्तड़िल्वद्विशेषणं सार्थकितम् । अनुष्टप्छन्दः ।

हरणार्थमस्याः शतक्रतुना गन्धर्वसेनाः समादिष्टाः। अन-न्तरं विमानचारिभ्यस्त्वदीयम्,

यशोराशिमुपश्रुत्य त्वामिहस्थमुपागतः।
भवानिमां समादाय महेन्द्रं द्रष्टुमर्हति॥

महत् खलु त्वया तत्प्रियमनुष्ठितम्। पश्य,

पुरा नारायणेनेयमभिसृष्टा मरुत्वतः।
दैत्यहस्तादवाच्छिद्य सुहृदा सम्प्रति त्वया॥ (२९)

राजा। सखे! मैवम्

ननु! वज्रिण एव वीर्य्यमेतद् विजयन्ते द्विषतो यदस्य पक्षाः।
वसुधाधरकन्दराविसर्पी प्रतिशब्दो हि हरेर्हिनस्ति नागान्॥(३०)

चित्ररथः। युक्तम्; अनुत्सुकता खलु विक्रमालङ्कारः।(३१)

राजा। सखे! नायमवसरः शतक्रतुं द्रष्टुम्; अतस्त्वमेव अत्रभवतीं प्रभोरन्तिकं प्रापय। (३२)

---

(२९) नारायणेन नारायणाख्यमुनिना। मरुत्वतः इन्द्रस्य निमित्तमि-न्द्रार्थमित्यर्थः, अभिसृष्टा निर्मिता। दैत्यहस्तात् अवाच्छिद्य आक्षिप्य त्वया पुनरभिसृष्टा। अनुष्टुप् छन्दः।

(३०) ननु भो वज्रिणः इन्द्रस्य एव एतत् वीर्य्यं माहात्म्यं, यत् अस्य इन्द्रस्य पक्षाः सहचरा द्विषतः शत्रून् विजयन्ते। तथाहि हरेः सिंहस्य वसुधाधरकन्दराविसर्पी वसुधाधरस्य भूधरस्य कन्दरां गुहां विसर्पति गच्छति गिरिगह्वरव्यापीत्यर्थः, प्रतिशब्दो प्रतिध्वनिः, नागान् करीन् हिनस्ति परा-भवति। सिंहध्वानादेव करिणो दूरं पलायन्ते इति भावः। वयन्तु ध्वानसमा इति तात्पर्य्यम्। उपछन्दसिकं वृत्तम्।

(३१) अनुत्सुकता स्वगौरवलाभकौतूहलराहित्यम्। सैव विक्रमा-लङ्कारः पराक्रमस्य भूषणम्।

(३२) आत्मनः प्रशंसालापश्रवणे औदासीन्यात्, न तु इन्द्रस्य उपरि अव-ज्ञयनया इति भावः। मनस्वितायाः लक्षणमेतत्।

चित्ररथः। यथा भवान् मन्यते। इतइतो भवन्तः।

[इति सर्वाः प्रस्थिताः]।

उर्व। [जनान्तिकम्]। हला चित्तलेहे! उअआरिणं राएसिं ण सक्कणोमि आमन्तिदुं, ता तुमं मे मुहं होहि (छ)। (३३)

चित्र। [राजानमुपसृत्य।] महाराअ! उव्वसी विसवेदि, महारएण अवभणुसादा इच्छामि पिअं विअ महाराअस्स कित्तिअं सुरलोअं णेदुम्। (ज)

राजा। गम्यतां पुनर्दर्शनाय।

[इति सर्वाः सगन्धर्वा आकाशयानं रूपयन्ति]। (३४)

उर्व। [उत्पतनभङ्गं रूपयित्वा]। अम्मो! लदाविड़वे एआवली वैजअन्तिआ मे लग्गा। [सव्याजमुपसृत्य राजानं पश्यन्ती]। सहि चित्तलेहे! मोआवेहि दाव णम् (झ)। (३५)

(छ) अयि चित्रलेखे! उपकारिणं राजर्षिं न शक्नोमि आमन्त्रयितुं, तत् त्वं मे मुखं भव।

(ज) महाराज! उर्वशी विज्ञापयति महाराजेन अभ्यनुज्ञाता इच्छामि प्रियामिव महाराजस्य कीर्त्तिं सुरलोकं नेतुम्।

(झ) अहो! लताविटपे एकावली वैजयन्तिका मे लग्ना। सखि चित्रलेखे! मोचय तावदेनाम्।

---

(३३) त्रिपताककरेण मुखमाच्छाद्य यत् परस्परसम्भाषणम् तत् जनान्तिकम्। तल्लक्षणं यथा;—"त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम्। अन्योऽन्यामन्त्रणं यत् स्यात् तज्जनान्ते जनान्तिकम्" इति।

(३४) आकाशयानं रूपयन्ति आकाशगमनं नाटयन्ति इत्यर्थः।

(३५) एकावली एकयष्टिका वैजयन्तिका पञ्चवर्णमयी जानुपर्य्यन्तलम्बिता

चित्र। [विलोक्य विहस्य च,] आं, अइ! दिढ़ं क्खु लग्गा, न सक्कणोमि मोआविदुम् (ञ)।

उर्व। अलं पड़िहासेण, मोआवेहि दाव णम् (ट)।

चित्र। आं, दुम्मोआ विअ मे पड़िहादि, तधावि मोआविस्सं दाव (ठ)।

उर्व। [स्मितं कृत्वा]। पिअसहि! सुमरेसि क्खु एदम् अत्तणो वअणम् (ड)।

राजा।

प्रियमाचरितं लते! त्वया मे गमनेऽस्याः क्षणविघ्नमाचरन्त्या।
यदियं पुनरप्यपाङ्गनेत्रा परिवृत्तार्द्धमुखी मयाद्य दृष्टा॥ (३६)

[चित्रलेखा मोचयति। उर्वशी राजानमालोकयन्ती सनिश्वासं सखीजनमुत्पतन्तं पश्यति]।

सूतः। आयुष्मन्!

अधः सुरेन्द्रस्य कृतापराधान्
प्रक्षिप्य दैत्यान् लवणाम्बुराशौ।

(ञ) आ, अयि! दृढं खलु लग्ना, न शक्नोमि मोचयितुम्।
(ट) अलं प्रपरिहासेन। मोचय तावदेनाम्।
(ठ) आ, दुर्मोच्येव मे प्रतिभाति, तथापि मोचयिष्यामि तावत्।
(ड) प्रियसखि! स्मरसि खलु एतदात्मनो वचनम्।

ज्ञात्वा, वैजयन्तिकाया एकावलीत्वाद्दीर्घत्वाच्च शाखाग्रसंलग्ने विशिष्टोपयोगित्वं व्यज्यते।

(३६) क्षणविघ्नमाचरन्त्या क्षणकालं गमनबाधां जनयन्त्या। अपाङ्गनेत्रा पक्ष्मनयना। उपच्छन्दसिकं वृत्तम्॥

(३७) ते तव वायव्यम् अस्त्रं सुरेन्द्रस्य इन्द्रस्य कृतापराधान् इन्द्रापराद्धानित्यर्थः दैत्यान् अधः लवणाम्बुराशौ लवणसमुद्रे प्रक्षिप्य पुनः शरधिं तूणीरं

वायव्यमस्त्रं शरधिं पुनस्ते
महोरगः श्वभ्रमिव प्रविष्टम् ॥ (३७)

राजा। तेन हि उपश्लेषय रथं, यावदभिरोहामि।

[सूतस्तथा करोति। राजा नाट्येनाभिरोहति]।

उर्व। [सस्पृहं राजानमवलोकयन्ती] अबि णाम पुणोबि उअआरिणम् एदं पेक्खिस्सं ?। (ढ)

[इति सगन्धर्वा सह सखीभिर्निष्क्रान्ता]।

राजा। [उर्वशीवर्त्मोन्मुखः]। अहो! दुर्लभाभिलाषी मदनः।

एषा मनो मे प्रसभं शरीरात्
पितुः पदं मध्यमसुत्पतन्ती।
सुराङ्गना कर्षति, खण्डिताग्रात्
सूत्रं मृणालादिव राजहंसी ॥ (३८)

[इति निष्क्रान्ताः सर्वे]।

इति प्रथमोऽङ्कः।

(ढ) अपि नाम पुनरप्युपकारिणमेतं प्रेक्षिष्ये ?

प्रविष्ट'; किमिव इत्याह,—महोरगः महासर्पः श्वभ्रमिव विलमिव। "रन्ध्रं श्वभ्रं वपा शुषिरित्यमरः।" सर्पो विलं यथा प्रविशति तद्वदित्यर्थः। उपजातिवृत्तम्।

(३८) पितुः नारायणस्य मध्यमं पदं आकाशं "अथात्मनः शब्दगुणं गुणज्ञः" इति रघुः। उत्पतन्ती वियत्मार्गेण गच्छन्तीत्यर्थः। एषा सुराङ्गना अप्सरा प्रसभं बलेन मे मम शरीरात् मनः कर्षति। किमिवेत्याह खण्डिताग्रादिति। राजहंसी खण्डिताग्रात् त्रुटितमुखात् मृणालात् सूत्रमिव। उपजातिवृत्तम्।

द्वितीयोऽङ्कः ।

[ततः प्रविशति विदूषकः]। (१)

विदू। अविद अविद, भो! णिमन्तणिओ परमसेण विअ राअरहस्सेण फुटमाणेण ण सक्कणोमि जणाइण्णे अत्तणो जीहां धारिदुं; ता जाव सो राआ धम्मासणगदो भवे, ताव इमस्सिं विरलजणसम्पादे देवच्छन्दप्पासादे अहिरुहिअ चिट्ठिस्सम् (क)। (२)

[परिक्रम्योपविश्य पाणिभ्यां मुखं पिधाय स्थितः।]

[ततः प्रविशति चेटी]।

चेटी। आणत्तम्हि देईए कासिराअदुहिदाए, जधा, हञ्जे णिउणिए! जदो पहुदि भअवदो सुज्जस्स उअत्थाणं

(क) अविद अविदेति सम्भ्रमे, भो! निमन्त्रणिकः परमान्नेनेव राजरहस्येन स्फुटता न शक्नोमि जनाकीर्णे आत्मनो जिह्वां धारयितुं, तद्यावत् स राजा धर्मासनगतो भवेत्, तावदस्मिन् विरलजनसम्पाते देवच्छन्दप्रासादे अभिरुह्य स्थास्यामि।

---

(१) विदूषकलक्षणं यथा दर्पणे,—"कुसुमवसन्ताद्यभिधः कर्मवपुर्वेशभाषाद्यैः। हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः।" इति।

(२) "सर्वमप्यौदरिकाणामभ्यवहार एव पर्य्यवस्यति" इति कारणादुदरम्भरिर्विदूषकः अभीष्टपददृष्टान्तेन मनोभावं व्यनक्ति, निमन्त्रणिकः निमन्त्रितः स्फुटता अत्युष्णेन परमान्नेन उष्णतरं परमान्नं मुखे संस्थाप्य आत्मनो जिह्वां धारयितुं उष्णतरवस्तुसंस्पर्शादिति भावः। यथा न शक्नोति, तथा अहमपि अन्तःस्फुटता राजरहस्येन जिह्वां धारयितुं न शक्नोमि राजरहस्यं गोपयितुं न पारयामीत्यर्थः।

कदुअ पड़िणिउत्तो महाराओ, तदो पहुदि सुसहिअओ विअ लक्खीअदि ; ता, तुमम्पि अज्जमाणवआदो जाणाहि सि उक्कण्ठाकारणं त्ति। ता, कधं सो बम्हवन्धू अब्भत्थिदव्वो ? (३) अधवा तिणलग्गं विअ ओसाअसलिलं ण तस्सिं राअरहस्सं चिरं चिट्ठिस्सदि त्ति तक्केमि ; ता जाव णं अस्सेसामि। [परिक्रम्य दृष्ट्वा]। अम्महे ! आलेक्खवाणरो विअ किम्पि मन्तअन्तो णिन्हुदो अज्जमाणवओ चिट्ठदि ; ता जाव णम् उपसप्पामि। [उपसृत्य] अज्ज ! वन्दामि। (ख)

विदू। सोत्थि भोदिए। [स्वगतम्] एदं दुट्ठचेलिअं पेक्खिअ तं राअरहस्सं हिअअं भिन्दिअ णिक्कमदि विअ। [किञ्चिन्मुखं संवृत्य प्रकाशम्]। भोदि णिउणिए ! सङ्गीदवावारम् उज्झिअ कहिं पउत्तासि ?। (ग) (४)

(ख) आज्ञापयति देव्या काशीराजदुहिता, यथा, अयि निपुणिके ! यतः प्रभृति भगवतः सूर्य्यस्य उपस्थानं कृत्वा प्रतिनिवृत्तो महाराजः, ततः प्रभृति शून्यहृदय इव लक्ष्यते, तस्मात् त्वमपि आर्य्यमाणवकात् जानीहि तस्य उत्कण्ठाकारणमिति। तत् कथं स ब्रह्मबन्धुरभ्यर्थितव्यः ? अथवा तृणलग्नमिव अवश्यायसलिलं न तस्मिन् राजरहस्यं चिरं स्थास्यतीति तर्कयामि। तद्यावदेनमन्विष्यामि। अहो ! आलिख्यवानर इव किमपि मन्त्रयन् निभृत आर्य्यमाणवकस्तिष्ठति, तद्यावदेनमुपसर्पामि। आर्य्य ! वन्दे।

(ग) स्वस्ति भवत्यै। एनां दुष्टचेटिकां प्रेक्ष्य तद्राजरहस्यं हृदयं भित्वा निष्क्रामतीव। भवति निपुणिके ! सङ्गीतव्यापारमुज्झित्वा कुत्र प्रवृत्तासि ?।

---

(३) आर्य्यमाणवकात्। माणवक इति विदूषस्य नाम। अवश्यायसलिलं शिशिरजलम्। ब्रह्मबन्धुः कुत्सितब्राह्मणः। अभ्यर्थितव्यः किंरूपया अभ्यर्थनया तस्माद्राजरहस्यं ज्ञातव्यमित्यर्थः।

(४) कुत्र प्रवृत्तासि नियुक्तासि ? किमर्थं कुत्र गच्छसीत्यर्थः।

चेटी । देईए वअणेण अज्जं ज्जेव पेक्खिदुं । (घ)

विदू । किं तत्थभोदी आणवेदि ? । (ङ)

चेटी । देई भणादि, जधा, अज्जस्स मम उअरि अदक्खिणं, ण मं अणुभूअवेअणं दुक्खिदं अवलोअदि त्ति । (च)(५)

विदू । णिउणिए ! किं पिअवअस्सेण पड़िऊलं किम्पि समाचरिदं ? । (छ)

चेटी । जं णिमित्तम् उण भट्टा उक्कण्ठिदो, ताए इत्थिआए णामेण भट्टिणा देई आलबिदा । (ज) (६)

विदू । [स्वगतम्] । कधं सअंज्जेव तत्थभअदा वअस्सेण रहस्सभेओ किदो, किं दाणिं अहं बम्हणो जीहां रक्खिदुं समत्थोम्हि ? [प्रकाशम्] आं, तत्थभोदी उव्वसित्ति अच्छरा,

---

(घ) देव्या वचनेन आर्यमेव प्रेक्षितुम् ।

(ङ) किं तत्रभवती आज्ञापयति ? ।

(च) देवी भणति, यथा, आर्यस्य ममोपरि अदाक्षिण्यं, न मामनुभूतवेदनां दुःखितामवलोकयतीति ।

(छ) निपुणिके ! किं प्रियवयस्येन प्रतिकूलं किमपि समाचरितम् ? ।

(ज) यन्निमित्तं पुनर्भर्त्ता उत्कण्ठितः तस्याः स्त्रिया नाम्ना भर्त्रा देवी आलपिता ।

---

(५) अदाक्षिण्यं, परच्छन्दानुवर्त्तित्वं दाक्षिण्यं, तद्राहित्यम् अदाक्षिण्यं, मन्मनोविपरीताचारीति भावः । यतः, अनुभूतवेदनाम् अनुभूता सञ्जीकृता वेदना पीड़ा यया सा ; केनापि कारणेन सञ्जातां वेदनामहमनुभवामि, अतएव दुःखितां मां भवान् नावलोकयति । दुःखे दुःखानुभावी दूरमास्ताम्, अन्तर्वेदनाजनितपीड़ां मां न पश्यसीति भावः ।

(६) चित्तोद्भ्रान्त्या तन्नाम्ना देवी अभिहितेत्यर्थः ।

ताए दंसणेण उम्मादिदो ण केवलं तं आआसेदि, मम्पि बम्हणं असिदव्वविमुहं दिढ़ं पीलेदि। (झ)

चेटी। [स्वगतम्]। उववादिदो मए भेओ भट्टिणो रहस्सदुग्गस्स ; ता गदुअ देईए एदं णिवेदेमि। (ञ) (७)

[इति प्रस्थिता]

विदू। णिउणिए! विसवेहि मम वअणेण कासिराअदुहिदरं ; परिस्सन्तम्हि इमाए मिअतिह्णाए पिअवअस्सं णिअत्तावेदुं, जइ भोदीए मुहकमलं पेक्खिस्सदि तदो णिअत्तिस्सदि त्ति। (ट)

चेटी। जं अज्जो आणवेदि। (ठ) [इति निष्क्रान्ता]

[नेपथ्ये वैतालिकः पठति।] जयति जयति देवः।

आलोकान्तप्रतिहततमोवृत्तिरासां प्रजानां
तुल्योद्योगस्तव च सवितुश्चाधिकारो मतो नः।

(झ) कथं स्वयमेव तत्रभवता वयस्येन रहस्यभेदः कृतः, किमिदानीमहं ब्राह्मणो जिह्वां रचितुं समर्थोऽस्मि ?। या, तत्रभवती उर्वशीत्यप्सराः, तस्या दर्शनेन उन्मादितो न केवलं तामायासयति मामपि ब्राह्मणं अशितव्यविमुखं दृढ़ं पीड़यति।

(ञ) उपपादितो मया भेदो भर्त्तुः रहस्यदुर्गस्य ? तस्माद्गत्वा देव्यै एतत् निवेदयामि।

(ट) निपुणिके! विज्ञापय मम वचनेन काशीराजदुहितरं, परिश्रान्तोऽस्मि अस्या मृगतृष्णायाः प्रियवयस्यं निवर्त्तयितुं, यदि भवत्या मुखकमलं प्रेक्षिष्यते तदा निवर्त्तिष्यते इति।

(ठ) यदार्य्य आज्ञापयति।

---

(७) भर्त्तुः रहस्यदुर्गस्य भेदः उपपादितः। दुर्भेद्यस्य गोप्यस्य उद्भेदनं कृतमित्यर्थः।

तिष्ठत्येकक्षणमधिपतिर्ज्योतिषां व्योममध्ये
षष्ठे काले त्वमपि लभसे देव! विश्रान्तिमह्नः। (८)

विदू। [कर्णं दत्त्वा]। एसो उण पिअवअस्सो धम्मासणादो समुत्थिदो इधज्जेव आअच्छदि, ता जाव पासपलिवत्ती होमि। (ड)

[इति निष्क्रान्तः। प्रवेशकः]। (९)

[ततः प्रविशति उत्कण्ठितो राजा विदूषकश्च]।

राजा।

आदर्शनात् प्रविष्टा सा मे सुरलोकसुन्दरी हृदयम्।
बाणेन मकरकेतोः कृतमार्गमवन्ध्यपातेन॥ (१०)

(ड) एष पुनः प्रियवयस्यो धर्मासनात् समुत्थित इहैवागच्छति, तद्यावत् पार्श्वपरिवर्त्ती भवामि।

---

(८) आलोकान्तं भुवनान्तपर्य्यन्तं प्रतिहता निराकृता तमसः अन्धकारस्य वृत्तिर्व्यापारो येन सूर्य्येण। रवेरुदयमात्रेण निरस्ततमो जगत् जातमिति भावः। राजपक्षे, आलोकान्तात् दर्शनमात्रात्, (अत्र तु अन्तशब्दो निश्चयवाची, "अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोरिति हेमचन्द्रः।") प्रतिहता निरस्ता तमसो ग्लानेर्वृत्तिर्व्यापारो येन, तमस्तु ज्ञानवैपरीत्यं, तदत्र ग्लानिरित्यनुमीयते न तु अज्ञानं, राजदर्शनमात्रमज्ञाननाशस्यासम्भवात्। आसां प्रजानां सम्बन्धे तव सवितुश्च तुल्योद्योगः सदृशारम्भः। सदृशकार्य्यकारिणौ उभौ इत्यर्थः। तथा ज्योतिषां ग्रहनक्षत्राणामधिपतिः सूर्य्यः व्योममध्ये एकक्षणं तिष्ठति, मध्याह्नक्षणं विश्रान्तिसमयः सूर्य्यस्य। हे देव! त्वमपि अह्नो दिवसस्य षष्ठे काले षड्भागे विश्रान्तिं लभसे। मन्दाक्रान्तावृत्तम्।

(९) प्रवेशकलक्षणं यथा दर्पणे "प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः। अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा इति।"

(१०) सा सुरलोकसुन्दरी उर्वशी आदर्शनात् दर्शनमात्रमेव इत्यर्थः

विदू। सपीड़ा क्खु जादा तत्थभोदी कासिराअ-दुहिदा। (ढ)

राजा। [निरीक्ष्य] रक्ष्यते भवता रहस्यनिक्षेपः ?।

विदू। [आत्मगतम्] वञ्चिदम्हि दासीए धीआए णिउ-णिआए, अण्णधा कधं विअ संपुच्छदि वअस्सो ? (ण)

राजा। किं भवान् तूष्णीमास्ते ?।

विदू। भो ! एव्वं मए जीहा संजन्तिदा, जेण भवदो वि णत्थि पड़िवअणं। (त)

राजा। युक्तम्; अथ केन इदानीमात्मानं विनोदयामि ?।

विदू। भो ! महाणसं गच्छम्ह। (थ)

राजा। किं तत्र ?

विदू। तहिं पञ्चविहस्स अब्भवहारस्स उत्तमस्ससंभा-रस्स भोअणं, मोअअसक्करपप्पूलेहिं उक्कण्ठं विणोदेदु। (द)११

(ढ) सपीड़ा खलु जाता तत्रभवती काशीराजदुहिता।

(ण) वञ्चितोऽस्मि दास्याः दुहित्रा निपुणिकया, अन्यथा कथमिव संपृ-च्छति वयस्यः ?

(त) भो ! एवं मया जिह्वा संयन्त्रिता, येन भवतोऽपि नास्ति प्रति-वचनम्।

(थ) भो ! महानसं गच्छामः। महानसं पाकशालाम्।

(द) तत्र पञ्चविधस्य अभ्यवहारस्य उत्तमान्नसम्भारस्य भोजनं, मोदक-शर्करापर्पटैः उत्कण्ठां विनोदयतु।

अवश्यपातेन सार्थकपतनेन मकरकेतोः कन्दर्पस्य वाणेन कृतमार्गे कृतद्वारं मे मम हृदयं प्रविष्टा। आर्या।

(११) अभ्यवहारस्य भोज्यस्य। पर्पटः पिष्टकविशेषः पाँपर इति भाषा। "पर्पटास्तु सदाङ्गारभ्रष्टाः परमरोचकाः। दीपनाः पाचका रुच्या गुरवः किञ्चिदी-

राजा। तत्र ईप्सिततरसन्निधानाद्भवता रंस्यते; मया पुनः कथमसुलभप्रार्थयितव्य आत्मा विनोदयितव्यः?।

विदू। णं भवंपि तत्थभोदीए उव्वसीए दंसणपधं गदो?। (ध)

राजा। ततः किम्?

विदू। ण क्खु दे दुल्लह त्ति तक्केमि। (न)

राजा। पक्षपातोऽपि तस्याः रूपस्यालौकिक एव। (१२)

विदू। एवं? वट्टदि कोदूहलं, किं दाव तत्थभोदीए उव्वसीए रूएण अहं ज्जेव दुदिओ णिरूपिदो?। (प) (१३)

(ध) ननु भवानपि तत्रभवत्या उर्वश्या दर्शनपथं गतः?

(न) न खलु ते दुर्लभेति तर्कयामि।

(प) एवं? वर्त्तते कौतूहलं, किं तावत् तत्रभवत्या उर्वश्या रूपेण अहमेव द्वितीयो निरूपितः?

रिताः। मौद्गाश्च तद्गुणाः प्रोक्ता विशेषाल्लघवो हिताः। चणकस्य गुणैर्युक्ताः पर्पटाः चणकोद्भवाः। स्नेहे भृष्टास्तु ते सर्वे भवेयुर्मध्यमा गुणैः।" इति भावप्रकाशः।

(१२) त्वमपि समधिकरूपवान्, त्वद्दर्शनेन सा समुत्सुका स्वयमेव त्वां वृणुते इति विदूषकस्याभिप्रायं ज्ञात्वा राजाह,—वयस्य! कि बहुना "पक्षपातोऽपि तस्या रूपस्यालौकिक एव।" अलौकिकः साधारणज्ञानैरननुमेय इतरजनज्ञानवैभवाद्बहिरवस्थित इत्यर्थः। मादृशा हि साधारणा, अतएव तद्रूपपक्षपातित्वेऽपि नास्माकमधिकारः, कथमस्मदीयं रूपं तद्रूपाहरणे प्रभवति? सर्वमप्येतत् व्यर्थम्। अन्यत् सर्वं विमुच्य हृदयेन तत्पक्षावलम्बनं पक्षपातः।

(१३) एवं? कौतूहलं वर्त्तते, दर्शनायेति शेषः। वयस्य! कथमुर्वश्या रूपेण अहं द्वितीयो निरूपितः? अहं यादृक्रूपवान्, कथमुर्वशी तादृक्रूपवती? रूपसादृश्यमावयोः साम्यं किं?

राजा। प्रत्यवयववर्णना तु न कृता मया, तेन हि श्रूयतां समासतः। (१४)

विदू। भो! अवहिदोम्हि। (फ)

राजा! वयस्य!

आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः।
उपमानस्यापि सखे! प्रत्युपमानं वपुस्तस्याः॥ (१५)

विदू। इदं दाव मिअतिह्णारसाहिलासिणा चँदएण्ण विअ दिब्बरसाहिलासिणा भवदा चारुरुअत्तणं परिग्गहिदं। (ब) (१६)

(फ) भो! अवहितोऽस्मि।

(ब) इदं तावन्मृगतृष्णारसाभिलाषिणा चन्द्रेणेव दिव्यरसाभिलाषिणा भवता चारुरूपत्वं परिगृहीतम्।

---

(१४) प्रत्यवयववर्णना प्रत्यङ्गवर्णना। समासतः संक्षेपेण।

(१५) शोभाप्रदम् आभरणं तदङ्गविन्यस्तं सत् स्वयमेव शोभते न तु शोभयति; तदाह, तस्या वपुः आभरणस्याभरणं, आभरणस्थानं प्रत्येकं हस्त-पदादिकमपि ईदृशं मनोहारि, यत् किमपि अलङ्करणं तदलङ्करणे नालं, परन्तु तदङ्गपरिहितत्वादलङ्करणानि एव अलङ्क्रियन्ते इति भावः। कान्तिप्रदं प्रसाधनं वेशविन्यासादिकमपि तद्वत्। सर्वाङ्गन्तु किमिव मनोहारि, तन्न जाने; जगति न किमपीदृशञ्च पश्यामि, येन तदङ्गमुपमीयते, तदेव जगति मनोहरवस्तूनामुप-मानम्। आर्य्याछन्दः।

(१६) सागरजलाकर्षणाभिलाषी चन्द्रमा जलभ्रमात् मृगतृष्णिकायां जल-माक्रष्टुमना यथा विफलकामी भवति, चन्द्राकर्षणतो सागरेषु जलवृद्धिर्भवति, ["चन्द्रोदयारम्भइवाम्बुराशिः" उच्छलतीति शेषः।] तद्वच्चन्द्रवपुस्त्वमपि दुष्प्राप्य-दिव्यरसाभिलाषी सन् विफलकामो भविष्यसि। चारुरूपत्वं परिगृहीतमर्थात् वृथाचिन्तया आकृतिस्ते पाण्डुवर्णा सैव मधुरा। मृगतृष्णिकानां रात्रावसम्भवात दिवासमुदितचन्द्रवत् पाण्डुभावमापन्न इत्यर्थः।

राजा । विविधशिशिरोपचारान्नान्यच्छरणमस्ति, तद्भवान् प्रमदवनमार्गमादेशयतु । (१७)

विदू । [स्वगतम्] का गदी । [प्रकाशम्] इदो इदो भवम् । (भ)

[इति परिक्रामतः]

विदू । एसो पमदवणपरिसरो अणालविदोवि पत्तुग्गदो आअन्तुणा दक्खिणमारुएण । (म) (१८)

राजा । उपपन्नं विशेषणमस्य वायोः, अयं हि,

निषिञ्चन् माधवीं लक्ष्मीं लतां कौन्दीञ्च लासयन् ।
स्नेह दाक्षिण्ययोर्योगात् कामीव प्रतिभाति मे ॥ (१९)

(भ) का गतिः । इत इतो भवान् ।

(म) एष प्रमदवनपरिसरोऽनालपितोऽपि प्रत्युपगत आगन्तुना दक्षिणमारुतेन ।

---

(१७) विविधशिशिरोपचारात् नानाविधशीतलद्रव्यसेवनात् अन्यत् भिन्नं शरणं नास्ति ; दुर्लभत्वादेव मदङ्गं नितरां दह्यते ।

(१८) प्रमदवनपरिसरः । परिसरः सीमा प्रान्तदेश इत्यर्थः । प्रत्युपगतः ज्ञातः ।

(१९) माधवीं लक्ष्मीं निषिञ्चन् वसन्तशोभां वर्द्धयन् । पक्षान्तरे एकया नायिकया संगच्छन्, लतां कौन्दीञ्च लासयन् पुष्पादिना विकासयन् अन्यत्र हास्यकौतुकादिना अन्याश्च उल्लासयन् । स्नेहदाक्षिण्ययोर्योगात्, वायुपक्षे स्नेहस्य शैत्योपयोगिनो जलतुषारशीकरादिकस्य तथा दाक्षिण्यस्य दक्षिणदिग्वर्त्तित्वस्य, तयोः योगात् । पक्षान्तरे स्नेहः आसक्तिस्तथा दाक्षिण्यं अनुकूलता तयोर्योगः । सर्वत्र समस्नेहदाक्षिण्यसम्पन्न इत्यर्थः । कामिन एव कामोपभोगार्थं सर्वनायिकासु समदृष्टयो भवन्ति, नतु अरसिकास्तु इति कामीशब्दतात्पर्य्यम् । अनुष्टुप्छन्दः ।

विदू। ईदिसो ज्जेव अहिणिवेसो भोदु। [इति परिक्रामन्] इदं पमदवणं पविसदु भवम्। (य)

राजा। वयस्य! प्रविश अग्रतः। [उभौ प्रवेशं नाटयतः]

राजा। [त्रासं रूपयित्वा] वयस्य! साधु मनसा समर्थितः आपत्प्रतीकारः किल मम उद्यानप्रवेशः, तच्च अन्यथैवोपपन्नम्।

विविक्षोर्यदिदं नूनमुद्यानं नाद्य शान्तये।
स्रोतसेवोह्यमानस्य प्रतीपतरणं महत्॥

विदू। कधं विअ?। (र)

राजा। इदमसुलभवस्तुप्रार्थनादुर्निवारम्
प्रथममपि मनो मे पञ्चबाणः क्षिणोति।
किमुत मलयवातोन्मूलितापाण्डुपत्रै-
रुपवनसहकारैर्दर्शितेष्वङ्कुरेषु॥ (२०)

(य) ईदृश एवाभिनिवेशो भवतु। इदं प्रमदवनं, प्रविशतु भवान्।
(र) कथमिव।

---

(२०) पञ्चबाणः प्रथममपि उद्यानप्रवेशात् पूर्वमपि असुलभवस्तुप्रार्थनासु दुष्प्राप्योर्वशीलाभरूपाभिलाषेषु दुर्निवारं निवारितुमशक्यं मे मनः क्षिणोति दूनोति। इदानीन्तु दक्षिणपवनापसारितपाण्डुपत्रैर्नवोद्भिन्नप्रवालोपलक्षितैः इत्यर्थः, उद्यानसहकारैर्दर्शितेषु कन्दर्पनयनपथपातितेषु अङ्कुरेषु सत्सु किमुत, कामस्तु निःसहाय एव एवं क्लेशप्रदायी, सहायवान् पुनः किं न करोति? अतएव स्रोतोवेगं परिहर्त्तुमनसः प्रतीपतरणमिव शान्त्यर्थमुद्यानप्रवेशो मे विशिष्टक्लेशदायी जातः। वसन्ताभरणभूतचूताङ्कुरदर्शनादिना मनो मे द्विगुणं ज्वलतीति भावः। मालिनीछन्दः।

विदू । अलं भवदो परिदेविदेण, अइरेण, इच्छिद-सम्पादओ अणङ्गो ज्जेव दे सहाओ हुविस्सदि त्ति । (ल)

राजा । प्रतिगृहीतं ब्राह्मणवचनम् । [इति परिक्रामतः]

विदू । पेक्खदु पेक्खदु भवं वसन्तावदारसूअअस्स अहि-रामत्तणं पमदवणस्स । (व) (२१)

राजा । ननु! प्रतिपदमेव तावदवलोकयामि । अत्र हि ।

अग्रे स्त्रीनखपाटलं कुरुवकं श्यामं द्वयोर्भागयो-
र्बालाशोकमुपोढरागसुभगं भेदोन्मुखं तिष्ठति ।
ईषद्बद्धरजःकणाग्रकपिशा चूते नवा मञ्जरी
मुग्धत्वस्य च यौवनस्य च सखे ! मध्ये मधुश्रीः स्थिता ॥ (२२)

(ल) अलं भवतः परिदेवितेन, अचिरेण इष्टसम्पादकोऽनङ्ग एव ते सहायो भविष्यतीति ।

(व) प्रेक्षतां प्रेक्षतां भवान् वसन्तावतारसूचकस्य अभिरामत्वं प्रमदवनस्य ।

---

(२१) वसन्तस्य अवतारः आविर्भावः तस्य सूचकः द्योतकः । अभि-रामत्वं मनोहरत्वम् ।

(२२) हे सखे ! मधुश्रीः मुग्धत्वस्य यौवनस्य च मध्ये स्थिता, नाति-व्यक्ता, नापि अव्यक्ता इति भावः । कथं ? अग्रे इत्यादिना तद्विवृणोति । अग्रे समक्षं स्त्रीनखपाटलं, पाटलं पुष्पं स्त्रीनखसदृशमग्रे दृश्यते, कुरुवकं द्वयोर्भागयोः श्यामं, तदाकारस्वरूपवर्णनमेतत् । बालाशोकं अनुद्भिन्नत्वात् उपोढ़रागसुभगं सञ्जातलौहित्यात् सुन्दरं सत् भेदोन्मुखं तिष्ठति, चूते आम्रवृक्षे नवा मञ्जरी ईषद्बद्धरजःकणया अल्पसञ्जातपरागलेशेन अग्रकपिशा अग्रभागपांशुला । इत्यादिभिः कारणैः मधुश्रियो वसन्तलक्ष्म्या नातिव्यक्तिर्नापि अव्यक्तिर्व्यज्यते । मौग्ध्ययौव-नान्तर्गतस्त्रीपक्षेतु, अग्रे प्रथमं स्त्रीनखपाटलं यौवनारम्भे स्त्रीनखान्येव पाटलानि भवन्ति । कुरुवकं बालास्तनं, बालास्तनयोः कुरुवकाकारत्वादत्र कुरुवकेणैव बालास्तनमवगम्यते । कुरुवकस्य अर्थात् कुचयुगस्य द्विभागं चुचुकद्वयस्याग्रभाग-

विदू। भो! एसो कसणमणिसिलावट्टसणाहो माहवीलदामण्डओ भमरसंहपअविहड़िदेहिं कुसुमेहिं कओवआरो विअ अत्तभवदो वट्टदि ; ता अणुग्गहीअदु एसो। (श)

राजा। यदभिरोचते भवते। [इति उपविशतः]

विदू। ता दाणिं इहासीणो ललिदलदालोहमाणलोअणो उव्वसीगदं उक्कण्ठं विणोदेदु भवम्। (ष)

राजा। [निश्वस्य]।

बहुकुसुमितास्वपि सखे! नोपवनलतासु रम्यविटपासु।
चक्षुर्बध्नाति धृतिं तदङ्गनालोकदुर्ललितम् ॥ (२३)

तदुपायश्चिन्त्यतां यथा सफलप्रार्थनो भवेयम्।

विदू। [विहस्य]। भो भो! अहल्लाकामुअस्स इन्दस्स

(श) भो! एष कृष्णमणिशिलापट्टसनाथो माधवीलतामण्डपो भ्रमरसंघपदविघट्टितैः कुसुमैः कृतोपचार इव अत्रभवतो वर्तते। तदनुगृह्यतामेषः।

(ष) तदिदानीमिहासीनो ललितलताखोभमानलोचन उर्वशीगतामुत्कण्ठां विनोदयतु भवान्।

मिति यावत्, श्यामम्। बालाशोकम् उपोढ़रागसुभगम् अन्तःसञ्जातानुरागेण सुन्दरम् अतएव अशोकं प्रफुल्लाकारं यथा तथा, यौवनोद्गमे बालास्तु सदैव प्रफुल्लाकारमुद्वहन्तीति दृष्टान्तात्; भेदोन्मुखं विकाशोन्मुखं तिष्ठति। पुनः किम्भूता? ईषद्बद्धरजःकणा, स्पष्टार्थम्। चूते नवा नवोद्गता मञ्जरी अग्रकपिशा अग्रभागकपिशा। "चूते मञ्जरी" पदद्वयमश्लीलत्वात् न व्याख्यातम्। हारावल्यां चूतशब्दार्थदर्शनादेव अर्थव्यक्तिर्भविष्यति। शार्दूलविक्रीड़ितं छन्दः।

(२३) तस्या अङ्गनायाः उर्वश्याः आलोकेन दर्शनेन दुर्ललितमस्थिरम् तद्दर्शनेन मे प्रतिहतमपि इदानीं केष्वपि धृतिं न बध्नाति। आर्याछन्दः।

वज्जो सचिवो, उव्वसीपज्जुस्सुग्रस्स भवदोबि ग्रहं, दुवेबि एत्थ उम्मत्तग्रा। (स) (२४)

राजा। न खलु चिन्तयति भवान् ?

विदू। [चिन्तयति]। एस चिन्तेसि ; मा उण परिदेविदेहिं समाधिं भञ्जिस्ससि। [निमित्तं सूचयित्वा आत्मगतम्।] ग्रहो ग्रहं कज्जदंसी। (ह)

राजा। ग्रसुलभा सकलेन्दुमुखी च सा,
किमपि चेदमनङ्गविचेष्टितम्।
ग्रभिसुखीष्विव वाञ्छितसिद्धिषु,
व्रजति निर्वृतिमेकपदे मनः॥ (२५)

इति मदनोत्सुकस्तिष्ठति।

[ततः प्रविशति ग्राकाशयानेन उर्वशी चित्रलेखा च।]

(स) भो भो ! ग्रहल्याकामुकस्य इन्द्रस्य वज्रं सचिवः, उर्वशीपर्य्युत्सुकस्य भवतोऽपि ग्रहं, द्वावप्यत्र उन्मत्तौ।

(ह) एष चिन्तयामि, मा पुनः परिदेवितैः समाधिं भङ्क्ष्यसि। ग्रहो ग्रहं कार्य्यदर्शी।

---

(२४) ग्रहल्याकामुक इन्द्रोऽहल्याप्राप्तिविषये यदि वज्रमयोजयिष्यत्, तदा तस्य यथा कार्य्यसिद्धिसम्भावना, तथात्र मन्नियोगेन कार्य्यसिद्धिस्ते भविष्यति। द्वावप्यावामत्र उन्मत्तौ एतत्कार्य्यज्ञानहीनौ। वज्रो हि शत्रुदलने क्षमः, ग्रहमप्यन्यत्र, कावयोः क्षमता एतच्चिन्तने ? अत्र नियोगे तु उन्मत्तवत् कार्य्यविध्वंसिनौ भवेव: इति भावः।

(२५) सकलेन्दुमुखी पूर्णचन्द्रनिभानना सा उर्वशी ग्रसुलभा नितरां दुष्प्राप्या, किमपि च मयि इदमनङ्गविचेष्टितं ग्रनङ्गविक्रीड़ितं, तथापि ग्रभिमुखीषु वाञ्छितसिद्धिषु सम्पन्नोन्मुखीषु इष्टसिद्धिषु यथा मनस्तुष्टिर्जायते तद्वत् ममापि ग्रत्र मनः एकपदे संशयराहित्येन निर्वृतिं सन्तोषमेति। द्रुतविलम्बितं छन्दः।

चित्र। सहि उव्वसि! कहिं क्खु अणिद्दिट्टकारणं गच्छीअदि? (च)

उर्व। [मदनवेदनामभिनीय सलज्जम्] सहि! हेमकूड़सिहरे लदाविड़वे लग्गं वैजअन्तिअं मोआवेहित्ति मए भणिदा, तुए उण उअहसिअ भणिदाम्हि, दिढ़ं क्खु लग्गा, ण सक्का मोआविदुं; दाणिं पुच्छसि, कहिं अणिद्दिट्टकारणं गच्छीअदि? (क)

चित्र। किं णु क्खु तस्स राएसिणो पुरूरवस्स सआसं पत्थिदासि? (ख)

उर्व। एसो सो अगणिदलज्जो ववसाओ। (ग) (२६)

चित्र। को उण सहीए पढ़मं तहिं पेसिदो? (घ)

उर्व। णं हिअओ। (ङ)

चित्र। तधाबि सम्पधारीअदु दाव (च) (२७)

(च) सखि उर्वशि! कुत्र खलु अनिर्दिष्टकारणं गम्यते?

(क) सखि! हेमकूटशिखरे लताविटपे लग्नां वैजयन्तिकां मोचयेति मया भणिता, त्वया पुनरुपहस्य भणितास्मि, दृढ़ं खलु लग्ना न शक्ता मोचयितुम्; इदानीं पृच्छसि कुत्र अनिर्दिष्टकारणं गम्यते?

(ख) किं खलु तस्य राजर्षेः पुरूरवसः सकाशं प्रस्थितासि?

(ग) एष सोऽगणितलज्जो व्यवसायः।

(घ) कः पुनः सख्या प्रथमं तत्र प्रेषितः?

(ङ) ननु हृदयम्।

(च) तथापि सम्प्रधार्य्यतां तावत्।

---

(२६) विना प्रार्थनया कामिनीनामभिसारी लज्जाराहित्यद्योतक इति भावः।

(२७) सम्प्रधार्य्यताम् आक्रम्य स्वपदे स्थाप्यताम्।

उर्व। मअणो क्खु णिओएदि मं, कुदो सम्पधारणा? (छ) (२८)

चित्र। अदो अवरं णत्थि मे उत्तरं। (ज)

उर्व। तेण आदिसदु मे पिअसही मग्गं, जेण तहिं गच्छन्तीए ण अन्तराओ भवे। (झ)

चित्र। सहि! वीसत्था होहि; णं भअवदा देअगुरुणा अवराइदं नाम सिहाबन्धणीं विज्जम् उअदिसन्तेण तिदसपलिपक्खस्स अलङ्घणीआ कदम्ह। (ञ) (२९)

उर्व। [सलज्जम्] ताए पओअं सव्वं सुमरेसि? (ट)

चित्र। हिअओ एदं सव्वं जाणादि। (ठ) (३०)

(छ) मदनः खलु नियोजयति मां, कुतः सम्प्रधारणा?।

(ज) अतोऽपरं नास्ति मे उत्तरम्।

(झ) तेन आदिशतु मे प्रियसखी मार्गं, येन तत्र गच्छन्त्या न अन्तरायो भवेत्।

(ञ) सखि! विश्वस्ता भव; ननु भगवता देवगुरुणा अपराजितां नाम शिखाबन्धनीं विद्यामुपदिशता त्रिदशप्रतिपक्षस्य अलङ्घनीये कृते स्वः।

(ट) तस्याः प्रयोगं सर्वं स्मरसि?

(ठ) हृदयमेतत् सर्वं जानाति।

---

(२८) मदननियोगे मत्प्रभुत्वस्यासम्भाव्यात्।

(२९) साम्प्रतिकापद्विमुक्तिः—पुरूरवसा तद्दैत्यहस्तादस्माकमुद्धारात् परतरं हि बृहस्पतिना अपराजिता नाम या शिखाबन्धनी विद्या नो दत्ता, तत्प्रभावेण असुराः पुनरस्मासु अपराद्धुमशक्ताः। शिखाबन्धनी, बृहस्पतिदत्तमन्त्रोच्चारणेन केशांशबन्धनरूपा।

(३०) असुरावलेपात् कम्पितेषु हृदयेषु तन्निखातमिवास्ते।

उर्व। सहि ! हिअओ एदं सव्वं जाणादि ज्जेव ; मम उण तधावि अदिभएण अणिच्चओ। (ड) (३१)

[उभे भ्रमणं रूपयतः]

चित्र। सहि ! पेक्ख पेक्ख, एदं भअवदीए भाईरहीए जउणासङ्गमपावणेसुं सलिलेसुं पुस्सेसुं अवलोअन्तस्स विअ अत्ताणअं पइट्ठाणस्स सिहाभरणभूदं विअ तस्स राएसिणो भवणम् उवगदम्ह। (ढ) (३२)

उर्व। [सस्पृहमवलोक्य]। णं वोत्तोव्वं ठाणान्तरगदो सग्गो त्ति। हला! कहिं सो आवस्साणुकम्पी भवे ? (ण) (३३)

(ड) सखि ! हृदयमेतत् सर्वं जानात्येव ; मम पुनस्तथापि अतिभयेन अनिश्चयः।

(ढ) सखि ! पश्य पश्य, इदं भगवत्या भागीरथ्या यमुनासङ्गमपावनेषु सलिलेषु पुण्येषु अवलोकयत इवात्मानं प्रतिष्ठानस्य शिखाभरणभूतमिव तस्य राजर्षेर्भवनमुपगते स्वः।

(ण) ननु वक्तव्यं स्थानान्तरगतः स्वर्ग इति। अयि ! कुत्र स आपन्नानुकम्पी भवेत् ?।

---

(३१) सत्यं, किन्तु पूर्वभयसंघट्टनपर्य्यन्तं मेऽतिभयः समजनि। तत एव मे संशयः, मन्ममेतत् हृदयं सम्यक् स्मरति न वा संशयः।

(३२) पुण्येष्विव यमुनासङ्गमपावनेषु सलिलेषु आत्मानं अवलोकयतः प्रतिष्ठानस्य तन्नामकस्य पुरूरवसो नगरस्य। सलिलानां प्रतिविम्बग्रहणसामर्थ्यात् आत्मावलोकनम्। राज्ञो धर्म्मदर्शित्वात् पुरी विगतपापा, अतएव नामतः सलिलेषु वस्तुतस्तु पुण्यस्रोतेषु प्रतिविम्बितम् आत्मानमवलोकयन्तीव स्थिता इति भावः।

(३३) आपन्नानुकम्पित्वेन पूर्वावस्थास्मरणम्, तेन च मनस्तृप्तिः। प्रणयिन्यो हि अभीष्टनायकस्य गुणभागमेव पश्यन्ति। अथवा राजा आपन्नां माम् अद्य अनुकम्पत एव, यतः स आपन्नानुकम्पी।

चित्र। एदस्सिं णन्दणवणेक्कप्पदेसे विश्र पमदवणे श्रोदरिश्र जाणिस्सामो। (त) [उभे अवतरतः]।

चित्र। [राजानं दृष्ट्वा सहर्षम्]। सहि ! एसो पढ़मोदिदो विश्र भश्रबं चन्दो कुमुदिम्, श्रवेक्खदि तुमं। (थ)

उर्व। [विलोक्य] हला ! दाणिं पढ़मदंसणादोवि सविसेसपिश्रदंसणो मे महाराश्रो पड़िभादि। (द)

चित्र। जुज्जदि ; ता एहि, उवसप्पम्ह। (ध)

उर्व। ण दाव उवसप्पिस्सं, तिरक्करिणीपच्छण्णा पासपलिवत्तिणी भविश्र सुणिस्सं दाव, पासपलिवत्तिणा वश्रस्सेण सह विजणे किं मन्तश्रन्तो चिट्ठदि। (न)

चित्र। जधा दे रोश्रदि। (प)

[उभे यथोक्तमनुतिष्ठतः]

विदू। भो चिन्तिदो मए दुल्लहपणइजणस्स समागमोबाश्रो। (फ)

(त) एतस्मिन् नन्दनवनैकप्रदेश इव प्रमदवने अवतीर्य ज्ञास्यामः। इन्द्रस्य उपवनं नन्दनम्।

(थ) सखि ! एष प्रथमोदित इव भगवान् चन्द्रः कौमुदीमपेक्षते त्वाम्। कौमुदीं ज्योत्स्नाम्।

(द) अयि ! इदानीं प्रथमदर्शनतोऽपि सविशेषप्रियदर्शनो मे महाराजः प्रतिभाति।

(ध) युज्यते ; तदेहि उपसर्पावः।

(न) न तावदुपसर्पिष्यामि, तिरस्करिण्या प्रच्छन्ना पार्श्वपरिवर्त्तिनी भूत्वा श्रोष्यामि तावत् पार्श्वपरिवर्त्तिना वयस्येन सह विजने किं मन्त्रयंस्तिष्ठति। तिरस्क्रियतेऽनयेति तिरस्करिणी विद्याविशेषः।

(प) यथा ते रोचते।

(फ) भो चिन्तितो मया दुर्लभप्रणयिजनस्य समागमोपायः।

[राजा तूष्णीमास्ते]।

उर्व। का उण धसा इत्थिआ, जा इमिणा परिसुग्ग-माणा अत्ताणअं विणोदेदि। (ब)

चित्र०। हला! झाणस्य किं विलम्बीअदि? (भ) (३४)

उर्व। सहि! भीआमि क्खु, सहसा पहावादो विसादुं। (म) (३५)

विदू। भो! णं भणामि चिन्तिदो मए दुल्लहपणइजण-समागमोबाओ। (य)

राजा। वयस्य! कथ्यताम्।

विदू। सिविणसमागमकारिणं णिद्दं सेवदु भवं; अथवा तत्थभोदीए उव्वसीए पड़िकिदिं चित्तफलए अहिलिहिअ आलोअन्तो अत्ताणअं विणोदेदु। (र)

उर्व। हिअअ! समस्सस। (ल)

(ब) का पुनर्धन्या स्त्री, या धनेन परिमृग्यमाणा आत्मानं विनोदयति।

(भ) अयि! ध्यानस्य किं विलम्ब्यते?

(म) सखि! बिभेमि खलु सहसा प्रभावाद्विज्ञातुम्।

(य) भोः! ननु भणामि, चिन्तितो मया दुर्लभप्रणयिजनसमागमो-पायः।

(र) स्वप्नसमागमकारिणीं निद्रां सेवतां भवान्; अथवा तत्रभवत्या उर्वश्याः प्रतिकृतिं चित्रफलकेऽभिलिख्य आलोकयन्नात्मानं विनोदयतु।

(ल) हृदय! समाश्वसिहि।

---

(३४) ध्यानेन सर्वं यत् प्रत्यक्षवत् भाति, तदा ध्यानार्थं कथं विलम्ब्यते?

(३५) यदि नाहमवस्थानीया भवेयम्, तदा मे किं भवेत्? सहसा प्रभावपरिज्ञाने इत्येव भयहेतुः।

राजा । तदुभयमपि अनुपपन्नं ; पश्य ।

हृदयमिषुभिः कामस्यान्तः सशल्यमिदं, ततः
कथमुपलभे निद्रां स्वप्ने समागमकारिणीम् ।
न च सुवदनामालेख्येऽपि प्रियां समवाप्य तां
मम नयनयोरुद्बाष्पत्वं सखे ! न भविष्यति ॥ (३६)

चित्र । सहि ! सुदं तुए वअणं ? । (व)

उर्व । सुदं ; ण उण पज्जत्तं हिअअस्स । (श) (३७)

विदू । एत्तिको मे मदिविहवो । (ष)

राजा । [निश्वस्य] ।

नितान्तकठिनां रुजं मम न वेद यो मानसीं
प्रभावविदितानुरागमवन्यते वापि माम् ।
अवद्धफलनीरसं प्रतिनिधाय तस्मिन् जने
समागममनोरथं भवतु पञ्चवाणः कृती ॥ (३८)

(व) सखि ! श्रुतं त्वया वचनम् ?
(श) श्रुतं ; न पुनः पर्य्याप्तं हृदयस्य ।
(ष) एतवान् मे मतिविभवः ।

---

(३६) प्रकृतप्राप्तिः कथैव मास्तु, आलेख्येऽपि तां समवाप्य चित्रपटेऽपि तां प्राप्य किं मे नयनयोरुद्बाष्पत्वं न भविष्यति ? भविष्यत्येव । हरिणीछन्दः ।

(३७) अनेन विना मम पुनर्याहृक्हृदयमास्ते, न तत्पर्य्याप्तिकारणमेतद्वचनम् इति भावः ।

(३८) यो जनः उर्वशीरूपः मम नितान्तकठिनां मानसीं रुजं न वेद न जानाति. वा अथवा प्रभावेण ध्यानबलेन विदितानुरागं ज्ञातप्रेमासङ्गं मां अवमन्यते । पञ्चवाणः कामः तस्मिन् एवम्भूते जने अबद्धफलनीरसं वैफल्यकठोरं समागममनोरथं प्रतिनिधाय प्रतिष्ठाप्य कृती भवतु । दुर्लभसमागमं जनं प्रति आसक्तिं जनयन् दहतु, पीड़यतु कृतकृत्यश्च भवतु इति भावः । पृथ्वीछन्दः ।

उर्व। [सखीमवलोक्य]। हद्दी हद्दी! मम्पि एव्वं अवगच्छदि महाराओ; अहं उण असमत्थम्हि अग्गदो भविअ अत्ताणअं दंसिदुं, ता पहावणिम्मिदेण भुज्जवत्तेण लेहं सम्पादिअ अन्तरा से खिबिदुमिच्छामि। (स)

चित्र। अणुमदं मे। (ह)

[उर्वशी नाट्येनाभिलिख्य क्षिपति।]

विदू। अविद! भो किसेदं? भुअङ्गणिम्मोअं किं खादिदुं मं णिबड़िदं? (च)

राजा। [दृष्ट्वा]। नायं भुजङ्गनिर्मोकः, भूर्जपत्रगतोऽयमक्षरविन्यासः।

विदू। णं अदिट्टाए उव्वसीए भवदो परिदेविअं सुणिअ भुज्जवत्ते महाणुराअसूअआ अक्खरा अहिलिहिअ विसज्जिआ भवे। (क)

राजा। नास्ति अशक्यं दैवस्य। [गृहीत्वा अनुवाच्य, च सहर्षम्।] सखे! उपपन्नस्ते वितर्कः।

विदू। जं एत्थ अहिलिहिदं तं सुणिदुं इच्छामि। (ख)

(स) हा धिक् हा धिक्! मामप्येवमवगच्छति महाराजः; अहं पुनरसमर्थास्मि अग्रतो भूत्वा आत्मानं दर्शयितुम्; तत् प्रभावनिर्मितेन भूर्जपत्रेण लेखं सम्पाद्य अन्तरा तस्य क्षेप्तुमिच्छामि।

(ह) अनुमतं मे।

(च) अविद अविदेति सम्भ्रमे। भोः! किमिदं? भुजङ्गनिर्मोकः किं खादितुं मां निपतितः?। भुजङ्गनिर्मोकः सर्पत्वक्।

(क) ननु! अदृष्टया उर्वश्या भवतः परिदेवितं श्रुत्वा भूर्जपत्रे महानुरागसूचकानि अक्षराणि अभिलिख्य विसृष्टानि भवेयुः।

(ख) यदत्र अभिलिखितं तत् श्रोतुमिच्छामि।

उर्व । साहु साहु अज्ज ! णाअरोसि । (ग)

राजा । श्रूयताम् । [इति वाचयति] । सामिअ ! सम्भाविआ जह अहं तुए अअलिआ, तहेअ, अणुरत्तस्स सुहअ ! एअं एअ, तुह णवरि ण, ण मे ललिअपारिजाअ-सअणिज्जम्मि होन्ति सुहा, णन्दणवणवाआवि सिहि विअ णिअसरीरे । (घ) (३९)

उर्व । किण्णु क्खु सम्पदं भणादि ? । (ङ)

(ग) साधु साधु आर्य्य ! नागरोऽसि ।

(घ) स्वामिक ! सम्भाविता यथाहं त्वया अकलिता, तथैव, अनुरक्तस्य सुभग ! एवमेव ; तव केवलं न । न मे ललितपारिजातशयनीयेऽपि भवन्ति सुखानि, नन्दनवनवाता अपि शिखिन इव निजशरीरे । प्रकृतपाठविध्वंसादेतत्तु गद्यवत् प्रतिभाति दुर्बोधञ्च जातम् ।

(ङ) किं नु खलु साम्प्रतं भणति ।

---

(३९) सामिअ स्वामिक ! तुए त्वया अअलिआ अकलिता स्वरूपतोऽविज्ञाता ; पराधीनत्वात् नास्ति अवसरो मनोरथपूरणाय, कथमागमिष्यामि ? इति मत्स्वरूपमविज्ञाय जह अहं सम्भाविआ यथा अहं सम्भाविता अनुमिता, तहेअ तथैव, तत्तेऽनुमानं सत्यम् । सुभअ ! सुभग ! अणुरत्तस्स अनुरक्तस्य सर्वस्याप्यनुरक्तजनस्य एअं एअ एवमेव, अनुमानं भवतीति शेषः । तुह न णवरि, तव केवलं न । एतेन ; तवानुमानानुयायि ममापि हृदयमासीत् ; यत्, त्वं स्वाधीनः, तद्दिने मदभिप्रायञ्च सम्यगज्ञासीः, स्वर्गारोहणपटुश्च ; नाहं ते गमनकारणे किमपि विघ्नं पश्यामि, तथापि तवागमनं किमवज्ञाकारणं न, इत्येवमनुमाने अयथाबोधे वा सर्वस्यापि समानाधिकारित्वमस्ति, एतदवगम्यते । अतःपरं यत् तवैव केवलं कष्टातिशयो जातः, तदपि न ; मेऽपि ललितपारिजातशयनीये कोमलपारिजातकुसुमशय्यायां न सुखं, आसीदिति शेषः । नन्दनवनवाता अपि निजशरीरे अस्मिन् मदङ्गे शिखिन इव, स्पृष्टाः सन्तः वह्निवदनुमीयन्त इति शेषः ।

चित्र। किं ण भणिदं इमिणा मिलाण-कमल-णाल-सरिसेहिं अङ्गेहिम् ?। (च)

विदू। दिट्टिआ मए बुभुक्खिदेण सोत्थिवाअणिअं विअ लद्धं भवदो समस्सासणकारणम्। (छ)

राजा। समाश्वासनमिति किमुच्यते ? पश्य,

तुल्यानुरागपिशुनं ललितार्थबन्धं
पत्रे निवेशितमुदाहरणं प्रियाया:।
उत्पक्ष्मलं मम सखे! मदिरेक्षणाया-
स्तस्या: समागतमिवाननमाननेन ॥ (४०)

उर्व। एत्थ णो समविभागा मदी। (ज) (४१)

(च) किं न भणितमनेना म्लानकमलनालसदृशैरङ्गै: ?

(छ) दिष्ट्या मया बुभुक्षितेन स्वस्तिवाचनिकमिव लब्धं भवत: समाश्वासनकारणम्।

(ज) अत्रावयो: समविभागा मति:।

---

(४०) हे सखे! तुल्यानुरागपिशुनं सूचकं ललितार्थबन्धं सुन्दरार्थप्रकाशकं पत्रे निवेशितं प्रियाया उदाहरणमवस्थानुसारियवृत्तान्तं मदिरेक्षणायास्तस्या उत्पक्ष्मलमाननमिव मम आननेन समायातम्। उदाहरणं ईदृक् सुन्दरार्थप्रकाशकं, यत् लेखोपलब्ध्येण तदवस्थासम्पन्नं तन्मुखमेव मन्मुखसङ्गतं सत् आत्मावस्थां कथयति। तदुक्तेर्मन्मुखोच्चारित्वात् तन्मुखस्य मन्मुखसङ्गति:। मन्मुखे तन्मुखसङ्गत्या तस्या हर्षातिशयात् उत्पक्ष्मलत्वम्, लज्जया मदिरेक्षणता च। प्रियतमायां यत् यत् आकाङ्क्ष्यते तत् सर्वमत्रापि अस्ति इति प्रियापदोल्लेख: सार्थकित:। वसन्ततिलकं छन्द:।

(४१) लेखोपलब्ध्येण मदभिप्रायो यत्त्वया सुन्दरमनुबुद्धस्तत् पाठभङ्ग्यैव प्रतीयते। अतोहि तवैतदुक्तिषु ममापि अंशित्वमस्ति।

राजा। वयस्य! अङ्गुलीस्वेदेन मे लुप्यन्ते अक्षराणि, धार्य्यतामयं स्वहस्ते निक्षेपः प्रियायाः। (४२)

विदू। तदो किं दाणिं तत्थभोदी उर्व्वसी भवदी मणोरहतरुकुसुमं दंसिअ फले विसंवददि ?। (झ)

उर्व। हला! जाव उबत्याणकादरं अत्ताणअं समत्थावेमि, ताव तुमं अत्ताणअं दंसिअ जं मे अणुमदं, तं भणाहि। (ञ) (४३)

चित्र। तह। [इति तिरस्करिणीमपनीय राजानमुपसृत्य] जअदु जअदु महाराओ। (ट)

राजा। [सम्भ्रमादरगर्भम्] स्वागतं भवत्यै। [पार्श्वमवलोक्य।] भद्रे!

न तथा नन्दयसि मां सख्या विरहिता तया।
सङ्गमे दृष्टपूर्वेव यमुना गङ्गया यथा॥

(झ) ततः किमिदानीं तत्रभवती उर्वशी भवती मनोरथ-तरुकुसुमं दर्शयित्वा फले विसंवदति ?

(ञ) सखि! यावदुपस्थानकातरमात्मानं संस्थापयामि, तावत् त्वमात्मानं दर्शयित्वा यन्मे अनुमतं तत् भण।

(ट) तथा। जयतु जयतु महाराजः।

---

(४२) स्वहस्ते इति आदरातिशयद्योतकः।

(४३) उपस्थानाय सेवार्थं समीपगमनाय कातरं राज्ञः समीपगमनाय अधीरमात्मानं यावत् संस्थापयामि सम्पारयामि, तावत् त्वं प्रकाशीभूय मदनुमतं ब्रूहि। राजोक्तिश्रवणेन निरुत्तरया अप्रकाशितया च क्षणमपि स्थातुमशक्यम्। अतस्त्वं शीघ्रं गत्वा मदनुमतं कथय मा विलम्बस्व। प्रथममिलनकाले प्रियसमक्षं स्त्रीणां स्वत एव आत्माभिव्यक्तिः स्त्रीस्वभावविरोधिनी, अतोहि सखीसंप्रेषणमिति।

चित्र। णं पढ़मं मेहराई दीसदि, पच्चा विज्जुलिआ। (ठ)

विदू। [अपवार्य्य] कधं ण एसा उव्वसी उवगदा? तत्थभोदीए सहअरीए एदाए होदव्वम्। (ड) (४४)

राजा। एतदासनमास्यताम्।

चित्र। [उपविश्य]। उव्वसी महाराअं सिरसा पणमिअ विस्सवेदि। (ढ)

राजा। किमाज्ञापयति?

चित्र। मम तस्सिं सुरारिसम्भवे दुस्सए महाराओ ज्जेव सरणं आसी। सम्पदं साहं तुह दंसणसमुत्थेण आआसिणा बलिअं बाधियमाणा मअणेण पुणोवि महाराअस्स अणुकम्पणीआ होमि। (ण) (४५)

राजा। अयि सखि!

(ठ) ननु प्रथमं मेघराजिर्दृश्यते, पश्चाद्विद्युल्लता।

(ड) कथं नैषा उर्वशी उपगता? तत्रभवत्याः सहचर्य्या एतया भवितव्यम्?

(ढ) उर्वशी महाराजं शिरसा प्रणम्य विज्ञापयति।

(ण) मम तस्मिन् सुरारिसम्भवे दुर्णये महाराज एव शरणमासीत्, साम्प्रतं साहं तव दर्शनसमुत्थेन आयासिना बलवद्‌बाध्यमाना मदनेन, पुनरपि महाराजस्य अनुकम्पनीया भवामि।

---

(४४) किम् उर्वशी अतोऽप्यधिकरूपवती? इति तात्पर्य्यम्।

(४५) पूर्वं निःसम्पर्कमेव त्वया अहमसुरहस्ताद् रक्षिता, इदानीं पुनः त्वद्दर्शनसमुत्थेन; ततोऽपि अधिकदारुणेन, बलवद्बाध्यमानत्वात्, मदनेन अहं क्लिश्यमाना।

पर्य्युत्सुकां कथयसि प्रियदर्शनां ता-
मार्त्तिं न पश्यसि पुरूरवसस्तदर्थाम् ।
साधारणोऽयमुभयोः प्रणयो, यतस्व,
तप्तेन तप्तमयसा घटनाय योग्यम् ॥ (४६)

चित्र । [उर्वशीमुपेत्य] हला ! इदो एहि, णिद्दअदरं भीसणमअणं पेक्खिअ पिअदमस्स दे दूई म्हि संवुत्ता । (त)

उर्व । [शोकात् सकम्पा ससाध्वसा] अयि अणवत्थिदे ! लहुं ज्जेव तुए परिच्चत्ता म्हि । (थ) (४७)

चित्र । [सस्मितम्] एदस्सिं मुहुत्ते जाणिस्सामो का कं परिच्चईस्सदि त्ति ; आआरं दाव पलिबज्ज । (द)

उर्व । [ससाध्वसमुपसृत्य सव्रीड़म्] जअदु जअदु महाराओ । (ध)

(त) अयि ! इत एहि ; निर्दयतरं भीषणमदनं प्रेच्य प्रियतमस्य ते दूती अस्मि संवृत्ता ।

(थ) अयि अनवस्थिते ! लघु एव त्वया परित्यक्तास्मि ?

(द) एतस्मिन् मुहूर्ते ज्ञास्यामः का कां परित्यच्यतीति ; आकारं तावत् प्रतिपद्यस्व ।

(ध) जयतु जयतु महाराजः ।

---

(४६) अयि पचपातिनि ! त्वत्सखीकृतां मम इमां यातनाम् न पश्यसि केवलं तदुत्सुकतामेव भाषसे, त्वं तव सखीपचे यत् किमपि कथयसि, सर्वेण एतेन तस्याः पर्य्युत्सुकत्वमेव व्यज्यते मम तु तदर्थं विषमार्त्तिर्जनिता, तन्न पश्यसि इति भावः । वसन्ततिलकं छन्दः ।

(४७) अयि अव्यवस्थिते ! कथं राज्ञो वचनमात्रेणैव तत्पचमवलम्ब्य त्वया अहं परित्यक्ता ?

राजा। [सहर्षम्] सुन्दरि !

मया नाम जितं यस्य त्वया जय उदीर्य्यते।
जयशब्दः सहस्राक्षादागतः पुरुषान्तरम्॥

[हस्ते गृहीत्वा आसने उपवेशयति]

विदू। कीदिसी त्थिदी भोदिए ? रस्सो पिअवअस्सो बम्हणो ण वन्दीअदि ? । (न) (४८)

[उर्वशी सस्मितं प्रणमति]

विदू। सोत्थि भोदिए। (प)

[नेपथ्ये देवदूतः]। चित्रलेखे ! त्वरय उर्वशीम्।

मुनिना भरतेन यः प्रयोगो भवतीष्वष्टरसाश्रयो निबद्धः।
ललिताभिनयं तमद्य भर्त्ता मरुतां द्रष्टुमनाः सलोकपालः॥
(४९)

[सर्वे आकर्णयन्ति। उर्वशी विषादं रूपयति]।

चित्र। सुदं तुए देवदूअस्स वअणं ? ; ता अणुजाणाहि दाव महाराअं। (फ)

(न) कीदृशी स्थितिर्भवत्याः, राज्ञः प्रियवयस्यो ब्राह्मणो न वन्द्यते ? स्थितिरवस्थानमुपवेशनमिति यावत्।

(प) स्वस्ति भवत्यै।

(फ) श्रुतं त्वया देवदूतस्य वचनं ? तदनुज्ञापय तावत् महाराजम्।

---

(४८) स्थितिः लोकमर्य्यादज्ञता।

(४९) प्रयोगः दृश्यकाव्यम्। भवतीषु निबद्धः निर्माय भवतीभ्योऽभिनयशिक्षार्थमर्पितवान् इत्यर्थः। औपच्छन्दसिकं छन्दः।

उर्व। [निश्वस्य]। णत्थि मे वाश्राविहवो। (ब)

चित्र। महराश्र! उव्वसी विसबेदि, परवसो श्रश्रं जणो; महाराएण श्रब्भणुसादा इच्छामि देश्रदेश्रस्स श्रणवरद्धं श्रत्ताणश्रं कादुं। (भ) (५०)

राजा। [कथं कथमपि वचनं संस्थाप्य] नाहं भवत्योरीश्वरनियोगहन्ता; किन्तु स्मर्त्तव्यस्त्वयं जनः।

[उर्वशी। वियोगदुःखं रूपयित्वा राजानं पश्यन्ती सह सख्या निष्क्रान्ता]।

राजा। [सनिश्वासम्] वैयर्थ्यमिव चक्षुषः सम्प्रति।

विदू। [पत्रं दर्शयितुकामः]। णं भुज्ज [इत्यर्द्धोक्तेनात्मगतम्]। श्रविद श्रविद! भो, उव्वसीदंसणविम्हिदेण मए तं भुज्जवत्तं पब्भट्टं पि हत्तादो ण विसादम्। (म)

राजा। किमसि वक्तुकामः?

विदू। वश्रस्स! इदम्हि वत्तुकामो, ण भवं श्रङ्गाइं मुञ्चदु; दिढ़ं क्खु तइ बद्धभावा उव्वसी, ण सा इदो गदुश्र एदं श्रणुबन्धं सिढ़िलीकरिस्सदि त्ति। (य) (५१)

(ब) नास्ति मे वाग्विभवः।

(भ) महाराज! उर्वशी विज्ञापयति, परवशोऽयं जनः महाराजेन अभ्यनुज्ञाता इच्छामि देवदेवस्य अनपराद्धमात्मानं कर्त्तुम्।

(म) ननु! भूर्ज। अविद अविदेति सम्भ्रमे। भोः! उर्वशीदर्शनविस्मितेन मया तत् भूर्जपत्रं प्रभ्रष्टमपि हस्तात् न विज्ञातम्।

(य) वयस्य! इदमस्मि वक्तुकामः, न भवानङ्गानि मुञ्चतु; दृढ़ं खलु त्वयि बद्धभावा उर्वशी, न सा इतो गत्वा एतमनुबन्धं शिथिलीकरिष्यतीति।

---

(५०) अनपराद्धमात्मानं कर्त्तुम्। आज्ञालङ्घनापराधरहितां कर्त्तुमित्यर्थः।

(५१) बद्धभावा आसक्तरतिः। सञ्जातपूर्वरागः इत्यर्थः। अनुबन्धं

राजा। ममापि एतदेव मनसि वर्त्तते ; तया खलु प्रस्थाने,

अनीशया शरीरस्य हृदयं स्ववशं मयि।
स्तनकम्पक्रियालक्ष्यैर्न्यस्तं निश्वसितैरिव॥ (५२)

विदू। [स्वगतम्] वेबदि मे हिअअं ; केत्तिअं वेलं तस्स भुज्जवत्तस्स अत्तभवदा वअस्सेण णामं गेण्हिदव्वं त्ति। ? (र)

राजा। वयस्य! केनेदानीमुन्मनसमात्मानं विनोदयामि ? [स्मृत्वा] उपनय भूर्जपत्रम्।

विदू। [सर्वतो दृष्ट्वा सविषादम्] हा कधं ण दीसदि ; भो दिव्वं क्खु तं भुज्जवत्तं गदं उव्वसीए मग्गेण। (ल)

राजा! [सासूयम्] सर्वत्र प्रमादी वैधेयः। (५३)

(र) वेपते मे हृदयं, कियतीं वेलां तस्य भूर्जपत्रस्य अत्रभवता वयस्येन नाम गृहीतव्यमिति।

(ल) हा कथं न दृश्यते। भो दिव्यं खलु तद्भूर्जपत्रं गतं उर्वश्या मार्गेण। उर्वशीवत् भूर्जपत्रमपि गतम् इत्यर्थः।

आसक्तिम्। न शिथिलीकरिष्यति न श्लथयिष्यति। क्षीणानुरागा न भविष्यति इत्यर्थः।

(५२) शरीरस्य आत्मनो देहस्य अनीशया प्रभीरादेशतः अन्यत्र कुत्रापि स्थातुमशक्तया इत्यर्थः। एवम्भूतया तया उर्वश्या स्तनयोः कम्पः उच्छ्वासः स्तनकम्पएव क्रिया तया लक्ष्यैः सूचितैः। निश्वसितैः करणैः स्ववशं स्वाधीनं हृदयं मयि न्यस्तमिव मम हस्ते अर्पितमिव। पराधीनत्वात् स्वदेहार्पणे असमर्था हृदयं मयि अर्पितमिव इत्यर्थः। अनुष्टुप्छन्दः।

(५३) वैधेयः मूर्खः। प्रमादी अनवहितः। प्रमादोऽनवधानता।

विदू। णं विचीअताम्। [उत्थाय] इदो भवे इदो वा भवे [इति बहुविधं नृत्यति]। (व)

[ततः प्रविशति औशीनरी, चेटी च, विभवतश्च परीवारः]।

औशी। हञ्जे णिउणिए! सच्चं लदाघरं वीसन्तो अज्ज-माणवअसहाओ दिट्ठो तुए महाराओ? (श)

चेटी। अलिअं किं मए भट्टिणी विण्णविदपुव्वा?। (ष)

देवी। तेण हि लदाविड़वन्तरिदा सुणिस्सं दाव विस्स-द्धमन्तिदाइं; जं तुए कधिदं सच्चकं ण वेत्ति (स)

चेटी। जं देईए रुच्चदि। (ह)

देवी। [परिक्रम्य पुरस्तादवलोक्य च] णिउणिए! किसेदं पत्तं णवचीरअं विअ इदो दक्खिणमारुदेण आणी-अदि? (च)

चेटी। [विभाव्य]। भट्टिणि! पलिवत्तणा-विभा-विदक्खरं भुज्जवत्तं क्खु एदं, हन्त कधं देईए ज्जेव णेउरपरि-लग्गं। [गृहीत्वा] णं वाचीअदु एदम्। (क) (५४)

(व) ननु! विचीयताम्। इतो भवेत् इह वा भवेत्।

(श) अयि निपुणिके! सत्यं लतागृहं विशन् आर्य्यमाणवकसहायो दृष्टस्त्वया महाराजः?

(ष) अलीकं किं मया भर्त्री विज्ञापितपूर्वा?

(स) तेनहि लताविटपान्तरिता श्रोष्यामि तावत् विश्रब्धमन्त्रितानि, यत्त्वया कथितं सत्यकं न वेत्ति।

(ह) यद्देव्यै रोचते।

(च) निपुणिके! किमेतत् पत्रं नवचीरमिव इतो दक्षिणमारुतेन आनीयते?

(क) भर्त्रि! परिवर्त्तनाविभाविताचरं भूर्जपत्रं खलु एतत्। हन्त कथं देव्या एव नूपुरपरिलग्नम्। ननु! वाचयतु एतत्।

देवी। णं अवलोएहि दाव; जइ अविरुद्धं तदो सुणिस्सम्। (ख)

चेटी। [तथा कृत्वा] भट्टिणि! तं ज्जेव एदं कोलीणअं विजिम्भदि; महाराअं उद्दिसिअ उव्वसीअक्खरअं कव्वबन्धं त्ति तक्केमि, अज्जमाणवअप्पमादादो अम्हाणं हत्थं आअदं त्ति। (ग)

देवी। णं गहिदत्था होहि। (घ)

[चेटी वाचयति]

देवी। हञ्जे! एदेण ज्जेव उवहारेण तं अच्छराकामुअं पेक्खम्ह (ङ)

चेटी। जं देई आणवेदि (च)

राजा। भगवन्! वसन्तसखे! मलयानिल!

वासार्थं हर सम्भृतं सुरभितं पौष्पं रजो वीरुधां,
किं कार्य्यं भवतो हृतेन दयिता-स्नेहस्वहस्तेन मे।

(ख) ननु अवलोकय तावत्, यदि अविरुद्धं तदा श्रोष्यामि।

(ग) भर्त्रि! तदेवेदं कौलीनं विजृम्भते, महाराजमुद्दिश्य उर्वश्यक्षरकं काव्यबन्धमिति तर्कयामि, आर्य्यमाणवकप्रमादादस्माकं हस्तमागतमिति। कौलीनं लोकापवादः। काव्यबन्धं काव्यरचनम्। प्रमादोऽनवधानता।

(घ) ननु! गृहीतार्था भव।

(ङ) अपि एतेनैवोपहारेण तमप्सराकामुकं पश्यामः।

(च) यत् देवी आज्ञापयति।

---

(५४) परिवर्त्तना मारुतसञ्चालनेन यत् पार्श्वपरिवर्त्तनं तेन विभावितानि अक्षराणि यस्य तत्।

जानात्येव भवान् विनोदनशतैरेवंविधैर्धारितं
कामार्त्तं जनमञ्जसाभिभवितुं नालम्बिताश्वासनम् ॥ (५५)

चेटी। देइ! पेक्ख पेक्ख, एदस्स ज्जेव भुज्जवत्तस्स अण्णेसणा वट्टदि। (छ)

औशी। ता णं पेक्खम्ह दाव, तुह्निं चिट्ठ। (ज)

विदू। भो! किन्नु क्खु एदं? उम्मिल्लमाणणीलपङ्कज-च्छविणा मउरपिच्छेण विप्पलद्धम्हि। (झ)

राजा। सर्वथा हतोऽस्मि मन्दभाग्यः।

औशी। [सहसा उपसृत्य]। अज्जउत्त! अलं आवेएण; एदं तं भुज्जवत्तम्। (ञ)

(छ) देवि! प्रेक्षस्व प्रेक्षस्व, एतस्यैव भूर्जपत्रस्य अन्वेषणा वर्त्तते।

(ज) तस्मात् ननु प्रेक्षावहे तावत् तूष्णीं तिष्ठ।

(झ) भोः! किं नु खलु एतत्? उन्मीलन्नीलपङ्कजच्छविना मयूरपिच्छेन विप्रलब्धोऽस्मि।

(ञ) आर्य्यपुत्र! अलमावेगेन; एतत् तत् भूर्जपत्रम्।

---

(५५) भगवन् मलयानिल! वासार्थं सौरभार्थं सम्भृतं सञ्चितं सुरभिगन्धयुक्तं पौष्पं कुसुमसम्बन्धि रजः परागं हर तत्र न केनापि बाधा जनयितव्या इत्यर्थः। परन्तु दयितायाः प्रियायाः स्नेहस्य प्रणयस्य स्वहस्तेन स्वहस्तलिखित-प्रणयपत्रस्वरूपेण अनेन भूर्जपत्रेण हृतेन तव किं कार्य्यं; अस्ति नाम हृतेषु कुसुमपरागेषु ते सुगन्धलाभः, एतत्तु हृतं ते उपकाराय न भविष्यति इत्यर्थः। एवंविधैः लिपिचित्रादिदर्शनरूपैः विनोदनशतैः धारितं कथमपि मरणात् रक्षितं तथा च आलम्बिताश्वासनं प्राप्ताश्वासं कामार्त्तं मदनव्यथापीड़ितं जनम् अञ्जसा बलेन अभिभवितुं भवान् न जानात्येव। विरहिजनपीड़नं भवत्सदृशस्य नोचितम्। शार्दूलविक्रीड़ितम् वृत्तम्।

राजा। [ससम्भ्रममात्मगतम्]। अये! देवी [सवैलक्ष्यम्। प्रकाशम्] स्वागतं देव्यै।

औशी। दुरागदं दाणिं मे संवुत्तम्। (ट)

राजा। [जनान्तिकम्]। वयस्य! कथमत्र प्रतिविधेयम्?।

विदू। [जनान्तिकम्]। लोत्तेण सूइदस्स कुम्भिलअस्स णत्थि वाआ पलिविधाणम्। (ठ)

राजा। [अपवार्य]। मूढ़! नायं परिहासकालः। [प्रकाशम्]। नेदं पत्रं मया मृग्यते; तत् खलु मन्त्रपत्रं, यदन्वेषणाय ममायमारम्भः।

औशी। जुज्जइ अत्तणो सोहग्गं णिगूहिदुं। (ड)

विदू! भोदि! तुवरावेहि से भोअणं, जेण पित्तप्पसमणेण सुत्थो भोदि। (ढ)

औशी। णिउणिए! सोहणं क्खु, आस्सासिदो पिअवअस्सो बम्हणेण। किं अस्सं, अस्सचिन्ताए आवेसिदो पिओ खिज्जदि। (ण)

विदू। णं पेक्ख, सव्वो आस्सासिदो चित्तभोअणेण। (त)

राजा। मूर्ख! बलादपराधिनं मामापादयसि?।

(ट) दुरागतमिदानीं मे संवृत्तम्।

(ठ) लोप्त्रेन सूचितस्य कुम्भिलकस्य नास्ति वाचा प्रतिविधानम्।

(ड) युज्यते आत्मनः सौभाग्यं निगूहितुम्।

(ढ) भवति! त्वरय अस्य भोजनं, येन पित्तप्रशमनेन सुस्थो भवति।

(ण) निपुणिके! शोभनं खलु आश्वासितः प्रियवयस्यो ब्राह्मणेन, किमन्यत्, अन्नचिन्तायामावेशितः प्रियः खिद्यते।

(त) ननु प्रेक्षस्व, सर्वं आश्वासितः चित्रभोजनेन।

औशी । णत्थि पभवन्तस्स अवराहो, अहं ज्जेव एत्थ अवरद्धा, जा पलिऊलदंसणा भविअ अग्गदो भवामि ; णिउणिए ! इदो एहि । (थ)

[इति सकोपं प्रस्थिता]

राजा ।

अपराधी नूनमहं, प्रसीद रम्भोरु ! विरम संरम्भात् ।
सेव्यो जनस्य कुपितः, कथं नु दासो निरपराधः ॥

[इति पादयोः पतति]

औशी । किदव ! लहुहिअआ क्खु अहं, अणुणअं ण गेण्हामि ; किन्तु दक्खिणस्स दे किदपच्चात्ताबस्स भाआमि । (५६) (द)

चेटी । इदो इदो देवी । (ध)

[इति राजानमपहाय सपरिजना देवी निष्क्रान्ता]

(थ) नास्ति प्रभवतोऽपराधः, अहमेवात्र अपराद्धा या प्रतिकूलदर्शना भूत्वा अग्रतो भवामि ; निपुणिके ! इत एहि ।

(द) कितव ! लघुहृदया खलु अहम्, अनुनयं न गृह्णामि ; किन्तु दक्षिणस्य ते कृतपश्चात्तापस्य बिभेमि ।

(ध) इत इतो देवी ।

---

(५६) दक्षिणस्य वनिताहृदयमनोरथानुवर्त्तिनः कृतपश्चात्तापस्य । पाद-पतनेन मां प्रसादितवानिति ज्ञातरहस्यायामुर्वश्यां किं वक्ष्यसि नितरामनुशयपरो भविष्यसीति भावः ।

विदू। पाउस णई विअ अप्पसस्ता ज्जेव तत्थभोदी गदा ता उत्थेहि उत्थेहि। (न)

राजा। [उत्थाय] वयस्य ! नेदमुपपन्नम्। पश्य,

प्रियवचनकृतोऽपि योषितां दयितजनानुनयो रसादृते।
प्रविशति हृदयं न, तद्विदां मणिरिव कृत्रिमरागयोजितः॥

(५७)

विदू। अणुऊलं ज्जेव भवदो एदं वअणं ; णहि अक्खिदुक्खिदो संमुहे दीवसिहं सहदि। (प)

राजा। मैवं, उर्वशीगतमनसोऽपि मम देव्यां स एव बहुमानः ; किन्तु प्रणिपातलङ्घनादहमपि तस्यां धैर्य्यमवलम्बिष्ये। (५८)

विदू। भो चिट्ठदु दाव देईकधा ; बुभुक्खिदस्स मे जीविअं अवलम्बदु भवं ; समओ क्खु ह्णाणभोअणं सेविदुं। (फ)

(न) प्रावृण्-नदीव अप्रसन्नेव तत्रभवती गता ; तदुत्तिष्ठ उत्तिष्ठ।

(प) अनुकूलमेव भवत एतद्वचनं ; नहि अक्षिदुःखितः सम्मुखे दीपशिखां सहते। अक्षिदुःखितः चक्षूरोगग्रस्तः।

(फ) भोस्तिष्ठतु तावत् देवीकथा ; बुभुक्षितस्य मे जीवितमवलम्बयतु भवान् ; समयः खलु स्नानभोजने सेवितुम्।

---

(५७) प्रियवचनकृतः अपराधी नूनमहं प्रसीद रम्भोरु विरम इत्यादिभिः चाटूक्तिभिः सम्पादितः। रसादृते अनुरागं विना हृदयं न प्रविशति। हृदयग्राही न भवति। तद्विदां मणीनां गुणदोषविचारक्षमाणाम्। कृत्रिमरागयोजितः कल्पितवर्णचित्रितः। आर्य्यावृत्तम्।

(५८) अहमपि तस्यां धैर्य्यमवलम्बिष्ये, अहमपि मानमवलम्बिष्ये।

राजा। [ऊर्द्ध्वमवलोक्य] कथमर्द्धं गतं दिवसस्य; अतः खलु।

उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी
निर्भिद्योपरि कर्णिकारकुसुमान्याशेरते षट्पदाः।
तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते
क्रीड़ावेश्मनिवेशिपञ्जरशुकः क्लान्तो जलं याचते॥ (५८)

[इति निष्क्रान्तौ]।

इति द्वितीयोऽङ्कः।

तृतीयोऽङ्कः।

[ततः प्रविशतो भरतशिष्यौ]

प्रथमः। सखे पैलव! अग्निशरणाद्गच्छता महेन्द्र-मन्दिरमुपाध्यायेन त्वमासनं ग्राहितः, अहमग्निशरणरक्षार्थं स्थापितः; ततः पृच्छामि गुरोः प्रयोगेण देवपरिषत् आराधिता न वेति?

द्वितीयः। ण आणे कधं साराधिता भोदि; तस्सिं उण सरस्सईकिदकव्वबन्धे लच्छीसअम्बरे उव्वसी तेसु तेसु रसन्तरेसु उम्मादिआ आसि। (क)

(क) न जाने कथं साराधिता भवति; तस्मिन् पुनः सरस्वतीकृत-काव्यबन्धे लक्ष्मीस्वयंवरे उर्वशी तेषु तेषु रसान्तरेषु उन्मादिता आसीत्। लक्ष्मीस्वयंवरे तदाख्यदृश्यकाव्यप्रयोगे।

---

(५८) उष्णालुः ग्रीष्मतप्तः। षट्पदाः भ्रमराः कर्णिकारकुसुमानि निर्भिद्य उपरि आशेरते। कारण्डवः हंसः तप्तं वारि विहाय तीरनलिनीं सेवते। शार्दूलविक्रीड़ितं वृत्तम्।

प्र। दोषविकाश इति वाक्यशेषः।

द्वि। आं, ताए वअणं क्खलिदं आसि। (ख)

प्र। किमिव ?।

द्वि। लच्छीभूमिआए वत्तमाणा उव्वसी वारुणीभूमिआए वत्तमाणाए मेणआए पुच्छिदा, समागदा तिल्लोअपुरिसा, सकेसवा लोअबाला; कस्सिं दे हिअआहिणिवेसो त्ति। (ग) (१)

प्र। ततस्ततः ?।

द्वि। ताए पुरिसोत्तमे त्ति भणिदव्वे पुरूरवसि त्ति णिग्गदा वाणी। (घ)

प्र। भवितव्यतानुविधायीनि बुद्धीन्द्रियाणि; न तामभिक्रुद्धो मुनिः ?। (२)

द्वि। सत्ता उअज्झाएण; महेन्देण उण अणुग्गहिदा। (ङ)

(ख) आं, तस्या वचनं स्खलितमासीत्।

(ग) लक्ष्मीभूमिकायां वर्त्तमाना उर्वशी वारुणीभूमिकायां वर्त्तमानया मेनकया पृष्टा, समागताः त्रिलोकपुरुषाः सकेशवा लोकपालाः; कस्मिन् ते हृदयाभिनिवेश इति।

(घ) तस्याः पुरुषोत्तमे इति भणितव्ये पुरूरवसि इति निर्गता वाणी।

(ङ) शप्ता उपाध्यायेन; महेन्द्रेण पुनरनुगृहीता।

---

(१) लक्ष्मीभूमिकायां वर्त्तमाना। अभिनयार्थं लक्ष्मीवेशधारिणी।

(२) भवितव्यतानुविधायीनि भवितव्यता निश्चितफलानामवश्यम्भावः तस्या अनुविधायीनि अनुसारीणि। उर्वश्याः पुरूरवसा समागमः नियत एव सुतरां गीतस्खलनं तदनुसारि एव इति भावः।

प्र। कथमिव ?।

द्वि। जेण तुए मम उअदेसो लङ्घिदो, तेण ण दे दिव्वं जाणं हुविस्सदि त्ति उअज्झाअस्स सआसादो साओ; पुरन्दरेण उण लज्जाओणदमुहिं उव्वसिं पेक्खिअ एव्वं भणिदं, जस्सिं बद्धभावासि तुमं तस्स मे रणसहाअस्स राएसिणो पिअं करणीअं; ता तुमं पुरूरवसं जधाकामं उवचिट्ठ, जाव सो पड़िट्ठिदसन्ताणो भोदि त्ति। (च)

प्र। सदृशं पुरुषान्तरवेदिनो महेन्द्रस्य। (३)

द्वि। [सूर्य्यमवलोक्य] कधाप्पसङ्गेण अवरद्धा अहिसेअवेला, ता उअज्झाअस्स पासपलिवत्तिणो होम्ह। (छ) (४)

[इति निष्क्रान्तौ। विष्कम्भकः]। (५)

[ततः प्रविशति कञ्चुकी] (६)

(च) येन त्वया मम उपदेशो लङ्घितस्तेन न ते दिव्यं ज्ञानं भविष्यति इति उपाध्यायस्य सकाशात् शापः; पुरन्दरेण पुनर्लज्जावनतमुखीमुर्वशीं प्रेक्ष्य एवं भणितं, यस्मिन् बद्धभावासि त्वं तस्य मे रणसहायस्य राजर्षेः प्रियं करणीयम्; तस्मात् त्वं पुरूरवसं यथाकाममुपतिष्ठस्व, यावत् स प्रतिष्ठितसन्तानो भवतीति।

(छ) कथाप्रसङ्गेन अपराद्धा अभिषेकवेला; तस्मादुपाध्यायस्य पार्श्वपरिवर्त्तिनौ भवावः।

---

(३) पुरुषान्तरवेदिनः। स्वयं पुमान् सन् मदनव्यथाकातरस्य पुरुषान्तरस्य दुःखं जानातीति भावः।

(४) अपराद्धा अतिक्रान्ता।

(५) विष्कम्भकलक्षणं यथा दर्पणे—

वृत्तवर्त्तिष्यमानानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥

(६) कञ्चुकिलक्षणं यथा—

कञ्चुकी ।

सर्वः कल्ये वयसि यतते लब्धुमर्थान् कुटुम्बी,
पश्चात् पुत्रैरपहृतभरः कल्पते विश्रमाय ।
अस्माकन्तु प्रतिदिनमियं सादयन्ती प्रतिष्ठां
सेवाकाकुः परिणतिरभूत्, स्त्रीषु कष्टोऽधिकारः ॥ (७)

आदिष्टोऽस्मि सनियमया काशिराजपुत्र्या ; यथा व्रतसम्पादनाय मया मानमुत्सृज्य निपुणिकामुखेन पूर्वं याचितो महाराजः ; तदेवं मद्वचनाद्विज्ञापयेति ; यावदहमवसितसन्ध्याकार्यं महाराजं पश्यामि । [परिक्रम्य अवलोक्य च] रमणीयः किल दिवसावसानवृत्तान्तो राजवेश्मनः । (८)

उत्कीर्णा इव वासयष्टिषु निशानिद्रालसा बर्हिणो
धूपैर्जालविनिःसृतैर्वलभयः सन्दिग्धपारावताः ।
आचारप्रयतः सपुष्पबलिषु स्थानेषु चार्चिष्मतीः
सन्ध्यामङ्गलदीपिका विभजते शुद्धान्तवृद्धो जनः ॥ (९)

अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः ।
सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते ॥

(७) कल्ये वयसि कार्य्योपयोगिनि वयसि यौवने । कुटुम्बी स्त्रीपुत्रादिपरिवारपोषणभारग्रस्तः । पुत्रैरपहृतभरः पुत्रेषु न्यस्तकुटुम्बपालनभार इत्यर्थः । विश्रामाय कल्पते । विश्रामसुखमनुभवति । अस्माकन्तु प्रतिष्ठां गौरवं सादयन्ती नाशयन्ती इयं परिणतिः वयःपरिणामः वार्द्धक्यम् इत्यर्थः सेवाकाकुरभूत् । सेवाकातरा अभूत् । स्त्रीषु अधिकारः स्त्रीणां रक्षणभारः कष्टः कष्टकरः । मन्दाक्रान्तावृत्तम् ।

(८) दिवसावसानवृत्तान्तः सायंकालद्रष्टव्यव्यापारः ।

(९) उत्कीर्णा इव लिखिता इव । आवासदण्डेषु निश्चलत्वात् चित्रिता इव इत्यर्थः । जालविनिःसृतैः गवाक्षजालैर्निर्गच्छद्भिः धूपैः धूमैः वड़भयः प्रासादाग्रगृहाणि सन्दिग्धपारावताः पारावतसञ्चारसन्देहं जनयन्तीत्येव आचार-

[अवलोक्य]। अये ! इत एव प्रस्थितो देवः । य एषः ;

परिजनवनिताकरार्पिताभिः
परिवृत एष विभाति दीपिकाभिः ।
गिरिरिव गतिमानपक्षसादा-
दनुतटपुष्पितकर्णिकारयष्टिः ॥

यावदेनमवलोकनमार्गे प्रतिपालयामि ।

[ततः प्रविशति यथानिर्दिष्टः सपरिवारो राजा विदूषकश्च]

राजा । [आत्मगतम्]।

कार्य्यान्तरितोत्कण्ठं दिनं मया नीतमनतिकृच्छ्रेण ।
अविनोददीर्घयामा कथं नु रात्रिर्गमयितव्या ॥ (१०)

कञ्चुकी । [उपगम्य] जयति जयति देवः ; देव ! देवी विज्ञापयति ; मणिहर्म्यपृष्ठे सुदर्शनश्चन्द्रः, तत्र सन्निहितेन देवेन प्रतिपालनीयः, यावत् चन्द्ररोहिणीयोगः।

राजा । विज्ञाप्यतां देवी, यस्तव छन्द इति । (११)

कञ्चुकी । तथा [इति निष्क्रान्तः]।

राजा । वयस्य ! किमु परमार्थतः (१२) एव देव्या व्रतनिमित्तोऽयमारम्भः स्यात् ?

प्रयतः गृहीतनियमः शुद्धान्तवृद्धः अन्तःपुरवर्ति जनः सन्ध्यामङ्गलदीपिका विभजते स्वेषु स्थानेषु विभज्य स्थापयति इत्यर्थः। शार्दूलविक्रीड़ितं वृत्तम् ।

(१०) कार्य्यान्तरितोत्कण्ठं कार्य्यैं राज्यशासनव्यवहारदर्शनादिभिः अन्तरिता आच्छादिता उत्कण्ठा उर्वशीसमागमचिन्ता यस्मिन् तत् । अनतिकृच्छ्रेण अनतिकष्टेन नीतं यापितम् । अविनोददीर्घयामा अविनोदाः विनोदनोपायरहिताः अतएव दीर्घाः यामाः प्रहराः यस्याः सा । आर्य्यावृत्तम् ।

(११) यस्तव छन्दः । यस्तव अभिरुचिः ।

(१२) परमार्थतः याथार्थ्यतः ।

विदू। तक्केमि, सञ्जादपच्चादावा अत्तभोदी वदव्वव-देसेण तत्तभवदो प्पणिपादलङ्घणं प्पमुज्जिदुकाम त्ति। (ञ)

राजा। उपपन्नं भवान् आह।

अवधूतप्रणिपाताः पश्चात्सन्तप्यमानमनसो हि।
विविधैरनुतप्यन्ते दयितानुनयैर्मनस्विन्यः॥ (१३)

तत् आदेशय मणिहर्म्यपृष्ठस्य मार्गम्।

विदू। इदो इदो एदु भवं, इमिणा गङ्गातरङ्गसिसि-रेण फटिअमणिसिलासोवाणेण आरोहदु भवं सव्वदा रम-णीयं मणिहम्मदलम्। (झ)

[राजा आरोहति। सर्वे सोपानारोहणं नाटयन्ति]।

विदू। [निरूप्य]। पच्चासणेन चन्देण होदव्वं, जधा तिमिरेण रेचीअमाणं पुव्वदिसामुहं आलोहिदप्पहं दीसदि। (ञ)

(ञ) तर्कयामि, सञ्जातपश्चात्तापा अत्रभवती व्रतव्यपदेशेन तत्रभवतः प्रणिपातलङ्घनं प्रमार्ष्टुकामेति।

(झ) इत इत एतु भवान्, अमुना गङ्गातरङ्गशिशिरेण स्फटिकमणि-शिलासोपानेन आरोहतु भवान् सर्वदा रमणीयं मणिहर्म्यतलम्। गङ्गातरङ्गेण स्फटिकसोपानस्य शुभ्रत्वे उन्नतोन्नतत्वे साम्येऽपि विरहतापतप्तस्य राज्ञः शिशिरोप-सेवनं सम्यक् सुखकरमतो हि विदूषकस्य अत्र विशेषेण शिशिरपदोल्लेखः।

(ञ) प्रत्यासन्नेन चन्द्रेण भवितव्यं, यथा तिमिरेण रिच्यमानं पूर्वदिङ्-मुखमालोहितप्रभं दृश्यते। रिच्यमानं परिमुच्यमानम्।

---

(१३) अवधूतप्रणिपाताः अवधीरितप्रणामाः। मनस्विन्यः खलु इतर-स्त्रीवत् न सामान्यप्रलोभनपरा, नापि सातिशयरुष्टाः। तास्तु विशिष्टापराधिनं प्रणिपतन्तमपि प्रियतममवमन्यन्ते, पश्चात् दयितकृतं तं तम् अनुनयं संस्मृत्य अपि अनुतप्यन्ते। आर्य्यावृत्तम्।

राजा। सम्यग् भवान् मन्यते।

उदयगूढ़शशाङ्कमरीचिभिस्तमसि दूरतरं प्रतिसारिते।
अलकसंयमनादिव लोचने हरति मे हरिवाहनदिङ्मुखम्॥
(१४)

विदू। हीही, भो भो, एसो खण्डमोदअसरिसो उदिदो राआ ओषधीणम्। (ट)

राजा। [सस्मितम्] सर्वत्र औदरिकस्य अभ्यवहार्य्यमेव विषयः [प्राञ्जलिः प्रणम्य] ऋक्षराज!

रुचिमावहते सतां क्रियायै सुधया तर्पयते पितॄन् सुरांश्च।
तमसां निशि मूर्च्छतां निहन्त्रे हरचूड़ानिहितात्मने नमस्ते॥
(१५)

विदू। भो! बम्हणसङ्कामिदक्खरेण पिदामहेण अब्भणु-

(ट) भो भो एष खण्डमोदकसदृश उदितो राजा ओषधीनाम्। नवोदितचन्द्रस्यालोहितप्रभत्वात् खण्डमोदकेन सादृश्यं सुसङ्गतम्।

---

(१४) उदयेन उदयपर्वतेन गूढ़ैरन्तरितैः शशाङ्कस्य चन्द्रस्य मरीचिभिः किरणैः तमसि अन्धकारे दूरतरं बहुदूरं प्रतिसारिते निराकृते सति। हरिवाहनस्य ऐरावतस्य या दिक् प्राची इत्यर्थः। तस्या मुखम् अलकसंयमनादिव मे लोचने हरति। संयतेषु अलकेषु कस्या अपि वराङ्गनायाः स्पष्टलक्ष्यमाणं मुखं यथा नयने हरति तद्वत् इत्यर्थः। द्रुतविलम्बितं वृत्तम्।

(१५) रुचिमनुरागमावहते जनयते। सुधया अमृतवर्षेण पितॄन् सुरांश्च तर्पयते प्रीणयते। निशि रात्रौ मूर्च्छतां व्याप्नुवतां तमसां निहन्त्रे अपसारकाय। हरचूड़ानिहितात्मने शङ्करमौलिस्थिताय। अतस्तत्कार्य्यपरम्परादर्शनेन साधूनां प्रवृत्तिः सत्कार्य्येषु उन्मुखीभवति। औपच्छन्दसिकं वृत्तम्।

स्थादोऽसि, आसणगदो होहि ; तेण अहम्पि सुहासीणो होमि। (१६) (ठ)

राजा। [विदूषकवचनं परिगृह्य उपविष्टः। परिजनान् विलोक्य।] अनभिव्यक्ताश्चन्द्रिकायां दीपिकाः पुनरुक्ताः तद्विश्राम्यन्तु भवत्यः। (१७)

परिजनाः। जं देवो आणवेदि। (ड)

[इति निष्क्रान्ताः।]

राजा। [चन्द्रम् आलोक्य विदूषकं प्रति।] वयस्य ! परं मुहूर्त्तादागमनं देव्याः, तद्विविक्ते कथयामि त्वाम् अवस्थाम्।

विदू। भो ! ण दीसदि ज्जेव सा उव्वसी ; किन्तु ताए

(ठ) भो ! ब्राह्मणसंक्रामिताचरेण पितामहेन अभ्यनुज्ञातोऽसि, आसनगत भव ; तेन अहमपि सुखासीनो भवामि।

(ड) यद्देव आज्ञापयति।

---

(१६) ब्राह्मणेत्यादि। ब्राह्मणे संक्रामितानि अचराणि येन तेन, ब्राह्मणस्य मम मुखेन स्वाभिप्रायं प्रकाशयति इत्यर्थः। नाहं त्वामासितुमुपदिशामि, अन्दस्तु ब्राह्मणस्य कीशदर्शने असमर्थः सन् मन्मुखेन त्वामुपदिशति, त्वमासनगतो भव।

(१७) अनभिव्यक्ताः हीनप्रभाः सन्दिग्धस्थितय इत्यर्थः। पुनरुक्ताः चन्द्रालोकेन सर्वत्र प्रकाशिते प्रकाशार्थं पुनर्दीपिकाधारणं निष्कारणमेव। परिजनानामवस्थितिर्विश्रब्धालापे विघ्नमुत्पादयतीति परिजनापसारणार्थं राज्ञ एवमुक्तिः।

तारिसं अणुराअं पेक्खिअ सक्कं क्खु आसाबन्धेण अत्ताणअं धारिदुम्। (ढ)

राजा। एवमेतत्; बलवान् मनसोऽभितापः; पुनः,

नद्या इव प्रवाहो विषमशिलासङ्कटस्खलितवेगः।
विघ्नितसमागमसुखो मनसिशयस्त्वनुगुणो भवति॥ (१८)

विदू। जधा परिहीअमाणेहिं अङ्गेहिं सोहसि, तधा अच्छरेहिं समागमं दे पेक्खामि। (ण)

राजा। [निमित्तं सूचयन्]

वचोभिराशाजननैर्भवानिव गुरुव्यथम्।
अयं मां स्पन्दितैर्बाहुराश्वासयति दक्षिणः॥

विदू। ण अण्णधा बम्हणवअणं भोदि। (त)

(ढ) भो न दृश्यत एव सा उर्वशी; किन्तु तस्यास्तादृशमनुरागं प्रेक्ष्य शक्यं खलु आशाबन्धेनात्मानं धारयितुम्। यद्यपि न सा अधुनापि चक्षुर्विषय-गोचरा, तथापि तत्प्रदर्शितमनुरागमनुस्मृत्य तदागमनं प्रति निःसन्देह एव।

(ण) यथा परिहीयमाणैरङ्गैः शोभसे तथा अप्सरोभिः समागमं ते प्रेक्षे। "सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्।" इति स्मरणात् यदर्थं ते अङ्गं म्लानं तल्लाभेन सुखितं स्यादेव।

(त) नान्यथा ब्राह्मणवचनं भवति।

---

(१८) विषमशिलेति। विषमेषु बन्धुरेषु शिलासङ्कटेषु स्खलितः प्रतिहतो वेगो यस्य। विघ्नितेत्यादि विघ्नितं प्रतिबन्धकेन व्याहतं समागमसुखं यस्य। मनसिशयः कामः। अनुगुणः अतिशयः। विना बाधया प्रवाहितो नदीवेगो यथा कठिनतरशिलासङ्कटेषु विघ्नितगतिः सन् आकुलीभूय अत्युच्छलति, तथा मन्मनसिशयोऽपि विघ्नितसमागमसुखः सन्नाकुलीभूय अन्तः अत्यर्थं वर्द्धते। आर्या-वृत्तम्।

[राजा सप्रत्याशं तिष्ठति ।]

[ततः प्रविशति आकाशयानेन कृताभिसरणवेशा उर्वशी चित्रलेखा च ।]

उर्व । [आत्मानं विलोक्य ।] सहि ! रुच्चदि मे अअं मोत्ताहरणभूसिदो णीलमणिपरिग्गहो अहिसारिआवेसो ? (थ)

चित्र । णत्थि वाआ विहवो पसंसिदुं ; इदं तु चिन्तेमि, अवि णाम अहं ज्जेव पुरूरवा भवेयं त्ति । (द)

उर्व । सहि ! असमत्था क्खु अहं, तुमं आणेहि तं सिग्घं, णेहि मं वा तस्स सुहअस्स वसदिं । (ध)

चित्र । णं पलिविम्बिअं विअ जामिणीजमुणाए केलाससिहरं सस्सिरीअं दे पिअतमस्स भवनमुपगदम्ह । (न)

(थ) सखि ! रोचते मे अयं मुक्ताभरणभूषितो नीलमणिपरिग्रहोऽभिसारिकावेशः । कविरभिलाषानुरूपं मानसीं प्रतिमां भूषयति, तदत्र सम्यगुपपन्नम् । उर्वशी सुन्दरी, समधिकाभरणप्रसाधने तु स्वाभाविकसौन्दर्य्यहानिरेवानुमीयते, अतो हि केवलं मुक्तादाम्ना उर्वश्याः प्रसाधनम् । मुक्तानान्तु सम्यक् प्रकाशार्थं नीलमणेः सङ्गतिः । विना तमिस्रया यथा दीपिकालोकोऽननुमेयस्थितिरेव, तथा गौराङ्गे निहिता मुक्ता च समवर्णत्वेन न विभाव्यत एव ।

(द) नास्ति वाग्विभवः प्रशंसितुम् ; इदन्तु चिन्तयामि, अपि नाम अहमेव पुरूरवा भवेयमिति । ईदृक् रूपवतीं हस्ते प्राप्य कथमन्यस्मै उपहरामि ?

(ध) सखि ! असमर्था खलु अहं, त्वमानय तं शीघ्रं, नय मां वा तस्य सुभगस्य वसतिम् ।

(न) ननु प्रतिविम्बितमिव यामिनीयमुनायां कैलासशिखरं सश्रीकं ते प्रियतमस्य भवनमुपगते स्वः । यामिन्यां प्रतिविम्बितं कैलाशशिखरमिव यमुनायां प्रतिविम्बितं ते प्रियतमभवनम् । भवनपक्षे अधःस्था यमुना प्रतिविम्बग्रहणसमर्था, यामिन्यपि कैलाशशिखरपक्षे तथैव । सूर्य्यस्यापलापे अन्धकारमयी

उर्व। तेण हि प्पभावेण जाणाहि, कहिं सो मम हिअअचोरो, किं वा अणुचिट्ठदि त्ति। (प)

चित्र। [आत्मगतम्।] भोदु; क्रीड़िस्सं दाव एदाए सह। [प्रकाशम्] हला! दिट्ठो मए उअभोअक्खमे अवआसे मणोरहलद्धं पिआसमागमसुहं अणुभवन्तो चिट्ठदि। (फ)

उर्व। अवेहि, हिअअं ण मे पत्तिआदि। हला चित्तलेहे! हिअए काउण किम्पि जप्पेसि; पिअसमागमस्स अगदो ज्जेव अणेण मे अवहरिदं हिअअं। (ब)

चित्र। एसो मणिहम्मप्पासादगदो वअस्समेत्तसहाओ राएसो; ता उपसप्पम्ह। (भ)

[उभे अवतरतः।]

राजा। वयस्य! रजन्यां विजृम्भते मदनबाधा। (१८)

या, सा यामिनी, अन्धकारस्तु वर्णहीनः, आधारे संक्रामितः सन् कृष्णवर्णत्वेनानुमीयते, सर्वोन्नतस्य कैलाशस्य पृष्ठे पार्श्वे सम्मुखे वापि किमपि वस्तु नास्ति, अतोऽधःस्थितेषु पदार्थनिचयेषु अन्धकारस्य संक्रमणत्वात् कैलाशपचे यामिनी अधःस्थैव।

(प) तेन हि प्रभावेण जानीहि कुत्र स मम हृदयचौरः, किं वा अनुतिष्ठतीति।

(फ) भवतु; क्रीड़िष्यामि तावदेतया सह। अयि! दृष्टो मया उपभोगक्षमेऽवकाशे मनोरथलब्धं प्रियासमागमसुखमनुभवंस्तिष्ठति। मनोरथलब्धं प्रियासमागमसुखं, स्वेच्छयैव प्रियया विहरति, न तु प्रियामनोरथार्थम्।

(ब) अपेहि। हृदयं न मे प्रत्येति; अयि चित्रलेखे! हृदये कृत्वा किमपि जल्पसि; प्रियसमागमस्याग्रत एव अनेन मेऽपहृतं हृदयम्। तेनापहृतत्वात् हृदयन्तु मे तद्गतमेव, अतस्तत्कार्य्यमेव सर्वं प्रत्यक्षवत् अस्यार्य प्रतिभाति, किं त्वं वृथा जल्पसि।

(भ) एष मणिहर्म्यप्रासादगतो वयस्यमात्रसहायी राजर्षिः; तस्मादुपसर्पावः।

(१८) रजन्यां विजृम्भते मदनबाधा। विजृम्भते प्रकाशते।

उर्व। अभिसत्थेण इमिणा वअणेण आकम्पिदं मे हिअअं ; अन्तरहिदा सुणुम्ह से आलावं, जाव णो संसअच्छेदो भोदि। (म) (२०)

सित्र। जं दे रोअदि। (य)

विदू। णं इमे अमिअगब्भा सेवीअन्तु चन्दवादा। (र)

राजा। वयस्य! एवमादिभिरनुपक्रम्योऽयमातङ्कः। (२१)

कुसुमशयनं न प्रत्यग्रं, न चन्द्रमरीचयो,
न च मलयजं सर्वाङ्गीनं, न वा मणियष्टयः।
मनसिजरुजं सा वा दिव्या ममालमपोहितुं
रहसि लघयेदारब्धा वा तदाश्रयणी कथा॥ (२२)

उर्व। हिअअ! जं दाणिं सि मं उज्झिअ इदो संकन्तं तस्स फलं तुए उअलद्धं?। (ल) (२३)

(म) अभिन्नार्थेनानेन वचनेनाकम्पितं मे हृदयम् ; अन्तर्हिते शृणुवोऽस्यालापं, यावदावयोः संशयच्छेदो भवति।

(य) यत्ते रोचते।

(र) ननु इमे अमृतगर्भाः सेव्यन्तां चन्द्रपादाः।

(ल) हृदय! यदिदानीमसि मामुज्झित्वा इतः संक्रान्तं, तस्य फलं त्वया उपलब्धम्। सर्वथा त्वं खलु कृती, अहन्तु वञ्चिताऽस्मि।

---

(२०) अभिन्नार्थेन स्फुटमप्रकटितार्थेन। संशयच्छेदः सन्देहभञ्जनम्।

(२१) अनुपक्रम्यो दुरपनेयः। आतङ्कः मदनज्वरः।

(२२) प्रत्यग्रं नूतनं न मथितमित्यर्थः। मलयजं चन्दनम्। सर्वाङ्गीनं सर्वाङ्गेषु लेपितम्। मनसिजरुजमित्यादि, दिव्या सुरलोकनिवासिनी सा उर्वशी वा तथा रहसि निर्जने आरब्धा तदाश्रयणी तद्विषयिणी कथा वा मम मनसिजरुजं मदनव्यथाम् अपोहितुं अलं समर्था। एतदन्यत् न किमपि समर्थमित्यर्थः। हरिणी वृत्तम्।

विदू। आं ; भो ! अहम्पि जदा सिहरिणीं रसालं अ ण लहे, तदा तं ज्जेव चिन्तयन्तो आसादेमि सुहम्। (व) (२४)

राजा। सम्पद्यते पुनर्भवतः।

विदू। तुमम्पि तं अदूरेण पाविहिसि। (श)

राजा। सखे ! एवं मन्ये।

चित्र। सुणु असंतुट्टे। (ष)

विदू। कधं विअ ?। (स)

राजा। इदं तया रथक्षोभादङ्गेनाङ्गं निपीड़ितम्।
एकं कृति शरीरेऽस्मिन् शेषमङ्गं भुवो भरः ॥(२५)

उर्व। किं दाणिं अवरं विलम्बिस्सं। [सहसा उपगम्य]

(व) भो ! अहमपि यदा शिखरिणीं रसालञ्च न लभे, तदा तदेव चिन्तयन्नासादयामि सुखम्। द्राचाभेदे शिखरिणीति विकाण्डशेषः।

(श) त्वमपि तामचिरेण प्राप्स्यसि।

(ष) शृणु असन्तुष्टे !।

(स) कथमिव।

---

(२३) मम इच्छामनपेक्ष्यैव यत् पुरूरवसि समासक्तमासीत्तस्यानुरागस्य पुरस्कृतिरूपानि वचनानि श्रुतानीति भावः।

(२४) रसालशिखरिणीप्राप्तिः पुनर्भवतः सम्पद्यते। आशानुरूपफल-प्राप्तिस्ते पुनर्भवत्येवेति तात्पर्य्यम्।

(२५) रथक्षोभात् तया उर्वश्या अङ्गेन निपीड़ितं प्राप्त-तदङ्गसंघर्षणम् इत्यर्थः। इदम् अङ्गं शरीरैकदेशः अस्मिन् शरीरे शरीरमध्ये एकं केवलं कृति कृतकार्य्यं सौभाग्यशालि इत्यर्थः। शेषमङ्गं भुवोभरः निरर्थकत्वात् केवलं पृथिव्या भारभूतम् इत्यर्थः। अनुष्टुप् वृत्तम्।

हला चित्तलेहे ! अगदो बि मए ट्ठिदाए उदासीणो महा-राओ। (ह)

चित्र। [सस्मितम्]। अइ अदितुवरिदे ! असंक्खित्त-तिरक्करिणी असि। (च) (२६)

[नेपथ्ये]। इदो इदो भट्टिणी। (क)

[सर्वे कर्णं ददति ; उर्वशी सह सख्या विषण्णा]

विदू। अविद अविद, भो ! उवत्थिदा देई ; ता मुद्दि-दमुहो होहि। (ख)

राजा। भवानपि संवृताकारमास्ताम्।

उर्व। हला ! एत्थ किं करणिज्जं ? (ग)

चित्र। अलं आवेएण, अन्तरिदा दाणिं सि तुमं ; विहिदणिअमव्वावारा अ महिसी दीसदि ; ता एसा ण चिरं चिट्ठिस्सदि त्ति। (घ)

(ह) किमिदानीमपरं विलम्बिषे। अयि चित्रलेखे ! अग्रतोऽपि मम स्थिताया उदासीनो महाराजः।

(च) अयि अतित्वरिते ! असंक्षिप्ततिरस्करिणी असि।

(क) इत इतो भट्टिनी।

(ख) अविद अविदेति सम्भ्रमे। भो ! उपस्थिता देवी, तन्मुद्रितमुखो भव।

(ग) अयि ! अत्र किं करणीयम् ?

(घ) अलमावेगेन, अन्तरिता इदानीमसि त्वम्। विहितनियमव्यापारा च महिषी दृश्यते ; तदेषा न चिरं स्थास्यतीति। अन्तरिता तिरस्करिणीच्छन्ना।

---

(२६) असंक्षिप्ततिरस्करिणी ; असंक्षिप्ता अनल्पीकृता तिरस्करिणी यस्याः, अद्यापि तिरस्करिणी-विद्यया आच्छादितशरीरासि इत्यर्थः।

[ततः प्रविशति धृतोपहारपरिजना देवी]

देवी। [चन्द्रमालोक्य]। एसो रोहिणीजोएण अहिअं सोहदि भअवं मिअलाञ्छणो। (ङ)

चेटी। णं सम्पज्जिस्सदि भट्टिणीसहिदस्स भट्टिणो विसेसरमणीअदा। (च)

[इति परिक्रामतः]

विदू। भो! णं आणामि, सोत्थिवाअणिअम्पि देदि; अथवा भवन्तं अन्तरेण चन्दवदव्ववदेसेण सुक्करोसा अज्ज मे अच्छीणं सुहदंसणा देई। (छ) (२७)

राजा। [सस्मितम्]। उभयथापि भवतः; यत्तु पश्चादभिहितं, तन्मां प्रति याति; यदत्रभवती।

सितांशुका, मङ्गलमात्रभूषणा, (२८)
विचित्रदूर्वाङ्कुरलाञ्छितालका।

(ङ) एष रोहिणीयोगेनाधिकं शोभते भगवान् मृगलाञ्छनः।

(च) ननु सम्पत्स्यते भट्टिनीसहितस्य भर्त्तुर्विशेषरमणीयता।

(छ) भो! ननु जानामि, स्वस्तिवाचनिकमपि ददाति; अथवा भवन्तमन्तरेण चन्द्रव्रतव्यपदेशेन मुक्तरोषा अद्य मे अक्ष्णोः शुभदर्शना देवी। ननु जानामि, मन्ये इत्यर्थः। अथवा, यदा देवी भवन्तमभ्यन्तरीकृत्य छलतश्चन्द्रव्रतमाचरति, तदा मुक्तरोषैव; यतोऽद्य शुभदर्शना च; अतो मत्स्वस्तिवाचनिके निःसन्देह एव।

---

(२७) दैवपैत्रकर्मस्थले उपस्थिता ब्राह्मणाः स्वस्तिवाचका आशीर्वादका भवन्ति, कर्मकर्त्तापि तेभ्यो यत्किञ्चिदभिलषितं धनखाद्यादिकं ददाति च। चन्द्रव्रतव्यपदेशेन चन्द्रमहमाराधयिष्ये इति छलेन।

(२८) सितांशुका शुभ्रवसनपरिधारिणी मङ्गलमात्रभूषणा, माङ्गल्यगोरोचनादिमात्रभूषणा।

व्रतोपदेशोज्झितगर्ववृत्तिना
मम प्रसन्ना वपुषेव लक्ष्यते ॥ (२९)

देवी। [उपगम्य]। जअदु जअदु अज्जउत्तो। (ज)

परिजनः। जअदु जअदु देओ। (झ)

विदू। सोत्थि भोदीए। (ञ)

राजा। देवि! स्वागतम्? [हस्ते गृहीत्वा उपवेशयति]।

उर्व। ठाणे इअं हि देईसद्देण उच्चरीअदि; ण किम्पि परिहीअदि सचीदो ओजस्सिदाए। (ट)

चित्र। अत्थि अवरं सुहं मन्तिदुं दे? (ठ)

(ज) जयतु जयतु आर्य्यपुत्रः।

(झ) जयतु जयतु देवः।

(ञ) स्वस्ति भवत्यै।

(ट) स्थाने, इयं हि देवीशब्देन उच्चार्य्यते; न किमपि परिहीयते शचीत ओजस्वितायाम्। तेजोधैर्य्यगाम्भीर्य्यौदार्य्यसारल्यानां समष्टिः ओजः, तत्ता ओजस्विता।

(ठ) अस्ति अपरं सुखं मन्त्रयितुं ते? त्वदर्थमेव देव्या ईदृशी दशा संवृत्ता, अत एतन्मन्त्रयितुं किन्तेऽन्यन्मुखमस्ति?

---

(२९) व्रतेषु यः उपदेशः शिक्षा तेन उज्झिता गर्ववृत्तिर्येन। व्रताचरणेषु विनीतवृत्तिना भवितव्यमिति चिरन्तनसंस्कारेण त्यक्तगर्ववृत्तित्वात् वपुः प्रसन्नमिति तात्पर्य्यम्। गर्ववृत्तिस्तु देव्याः न स्वाभाविकी, परन्तु अपरस्त्रीप्रवणीभूते पत्युश्चित्ते पतिप्राणा स्त्रीभर्त्तीधवशान्नर्वितैवोपलक्ष्यते। भक्त्या तु देवं कर्म करणीयमतो हि व्रतनिमित्तमिदानीं देव्या तदपि उज्झितम्। भक्तिप्रवणं चेतश्च स्वयावेशविवर्जितं स्यादेव। वंशस्थविलं वृत्तम्।

देवी । अज्जउत्तं पुरोकदुअ कोवि वदविसेसो मए सम्पादणीओ ; ता सुहुत्तअं उअरोधो सहीअदु । (ड)

राजा । माणवक ! अनुग्रहः खलु उपरोधः । (३०)

विदू । ईदिसो णं सोत्थिवाअणं करन्तो, मम बहुसो उअरोधो भोदु । (ढ) (३१)

राजा । किं नामधेयमेतद्देव्या व्रतम् ?

[देवी निपुणिकामवलोकयति]

चेटी । भट्टापिअप्पसादणं णाम । (ण) (३२)

राजा । [देवीं विलोक्य] ।

अनेन कल्याणि ! मृणालकोमलं
व्रतेन गात्रं ग्लपयस्यकारणम् ।
प्रसादमाकाङ्क्षति यस्तवोत्सुकः
स किं त्वया दासजनः प्रसाद्यते ॥ *

(ड) आर्यपुत्रं पुरःकृत्वा कोऽपि व्रतविशेषो मया सम्पादनीयः ; तन्मुहूर्त्तकमुपरोधः सह्यताम् ।

(ढ) ईदृशो ननु स्वस्तिवाचनं कुर्वतो मम बहुश उपरोधो भवतु ।

(ण) भर्तृप्रियप्रसादनं नाम ।

---

* वंशस्थबिलं वृत्तम् ।

(३०) माणवक ! पश्य देवी ब्रवीति अयं उपरोधः ।

(३१) स्वस्तिवाचनिकं ददत्या देव्या मम सम्बन्धेऽपि ईदृशो बहुश उपरोधोऽनुष्ठीयताम् ।

(३२) भर्तुः प्रियमभिलषितं तस्य प्रसादनम् ।

उर्व। [सवैलक्ष्यस्मितम्] महन्तो क्खु इमस्सिं एदस्स बहुमाणो। (त)

चित्र। अइ मुद्धे! अस्ससङ्कन्तप्पेमाणो णाअरा अहिअं दक्खिणा होन्ति। (थ)

देवी। इमस्स वदस्स अअं प्पहाओ, जं एत्तिअं बाधिदो अज्जउत्तो। (द)

विदू। विरमदु भवं; ण जुत्तं बन्धुभासिदं पच्चाक्खादुम्। (ध) (३३)

देवी। दारिआओ आणेध उअहारअं, जाव हम्मगदे चन्दवादे अच्चेमि। (न)

परिजनः। जं देई आणवेदि। एसो उअहारो। (प)

देवी। उवणेध। [नाट्येन कुसुमादिभिश्चन्द्रपादा-

(त) महान् खलु अस्यामेतस्य बहुमानः।

(थ) अयि मुग्धे! अन्यसंक्रान्तप्रेमाणो नागरा अधिकं दक्षिणा भवन्ति। दक्षिणा दक्षिणनायकवदतिप्रियभाषिण इत्यर्थः।

(द) अस्य व्रतस्य अयं प्रभावो, यदेतावद्बाधित आर्य्यपुत्रः। बाधितो बाधाग्रस्तः; मया तु एतद्व्रताचरणनिमित्तमिदानीं आर्य्यपुत्रस्य उर्वशी-चिन्तायामपि विघ्नमाचरितम्।

(ध) विरमतु भवान्; न युक्तं बन्धुभाषितं प्रत्याख्यातुम्।

(न) दारिकाः! आनयत उपहारकं, यावत् हर्म्यगतांश्चन्द्रपादानर्चयामि। दारिकाः कन्याः।

(प) यद्देवी आज्ञापयति। एष उपहारः।

---

(३३) मदुक्तां स्वस्तिवाचनिककथामुपेक्ष्य भवतोऽन्यविधालापोऽनुचित एव। राजानं प्रति विदूषकस्यैवमुक्तिः।

नभ्यर्च्चय] हञ्जे ! इमेहिं उवहारेहिं मोदएहिं अज्जमाण-वअं कञ्चुइं अ अच्चेध । (फ)

परिजनः। जं देई आणवेदि ; अज्ज माणवअ ! इदं उववादिदं सोत्थिवाअणिअं । (ब)

विदू। [मोदकशरावं गृहीत्वा]। सोत्थि भोदीए ; बहुफलो एसो वदो भोदु । (भ)

चेटी। अज्ज कञ्चुइ ! इदं तुह । (म)

कञ्चुकी। [गृहीत्वा] स्वस्ति देव्यै ।

देवी। अज्जउत्त ! इदो दाव । (य)

राजा। अयमस्मि ।

देवी। [राज्ञः पूजामभिनीय, प्राञ्जलिः प्रणम्य च] एसा देवदामिहुणं रोहिणीमिअलञ्छणं सक्खीकदुअ अज्ज-उत्तं प्पसादेमि ; अज्ज प्पहुदि अज्जउत्तो जं इत्थिअं कामेदि, जा अ अज्जउत्त समागमप्पणइणी, ताए सह अप्पलिबन्धेण वत्तिदव्वं । (र)

(फ) उपनयत। अयि ! एभिरुपहारैर्मोदकैरार्य्यमाणवकं कञ्चुकिनं च अर्च्चयत ।

(ब) यद्देवी आज्ञापयति ; आर्य्य माणवक ! इदमुपपादितं स्वस्ति-वाचनिकम् ।

(भ) स्वस्ति भवत्यै ; बहुफलमेतद्व्रतं भवतु ।

(म) अयि कञ्चुकिन् ! इदं तव ।

(य) आर्य्यपुत्र ! इतस्तावत् ।

(र) एषा देवतामिथुनं रोहिणीमृगलाञ्छनं साक्षीकृत्य आर्य्यपुत्रं प्रसादयामि ; अद्यप्रभृति आर्य्यपुत्रो यां स्त्रियं कामयते, या च आर्य्यपुत्रसमा-गमप्रणयिनी, तया सह अप्रतिबन्धेन वर्त्तितव्यम् ।

उर्व। अह्महे! णं जाणामि किं परं से वअणं; मम उण विस्सासविसदं हिअअं संवुत्तम्। (ल) (३४)

चित्र। सहि! महाणुभावाए पदिव्वदाए अब्भणुरणादो अणन्तराओ दे पिअसमागमो भविस्सदि त्ति। (व)

विदू। [अपवार्य] छिण्णहत्थस्स पुरदो वज्झे पलाइदे भणादि, गच्छ धम्मो भविस्सदि त्ति। [प्रकाशम्] भोदि! किं उदासीणो तत्थभवं? (श) (३५)

देवी। मूढ़! अहं क्खु अत्तणो सुहावसाणेण अज्जउत्तस्स सुहं इच्छामि; एत्तिएण चिन्तेहि दाव पिओ ण वेत्ति। (ष)

राजा।

(ल) आश्चर्य्यम्, न जाने किं परमस्या वचनम्; मम पुनर्विश्वासविषदं हृदयं संवृत्तम्।

(व) सखि! महानुभावया पतिव्रतया अभ्यनुज्ञातोऽनन्तरायस्ते प्रियसमागमो भविष्यतीति।

(श) छिन्नहस्तस्य पुरतो वध्ये पलायिते भणति, गच्छ धर्मो भविष्यतीति। भवति! किमुदासीनस्तत्रभवान्?

(ष) मूढ़! अहं खलु आत्मनः सुखावसानेन आर्य्यपुत्रस्य सुखमिच्छामि; एतन्मात्रेण चिन्तय तावत् प्रियो न वेति।

---

(३४) किम्परं किमधीनं, किमुद्दिश्य एषा एवं ब्रवीति तन्न जाने, मम तु एतद्वाक्यश्रवणेनैव हृदयं विश्वस्तं जातम्।

(३५) तत्रभवान् पूज्यो राजा किमद्यावधि त्वया उदासीनः कृतः। संसारसुखविरतो हि उदासीनः। त्वया परित्यक्तो राजापि तथाविधो जात इति तात्पर्य्यम्।

दातुमसहने ! प्रभवस्यन्यस्यै, कर्त्तुमिव वा दासम्।
नाहं पुनस्तथा त्वयि यथा हि मां शङ्कसे भीरु !॥ *

देवी। भोदु ; यथानिद्दिट्ठं सम्पादिदं पिअप्पसादणव्वदं ; ता एध परिअणा ! गच्छम्ह। (स)

राजा। न खलु प्रसादितमपि प्रतिविहाय (३६) गम्यते।

देवी। अज्जउत्त ! अलङ्घिदपुव्वो सम्पदं णिअमो। (ह) (३७)

[इति सपरिजना निष्क्रान्ता]

उर्व। हला ! पिअकलत्तो राएसी ; ण उण हिअअं णिअत्ताइदुं सक्कणोमि। (च) (३८)

चित्र। कधं त्थिरासो णिअत्तीअदि ? (क) (३९)

(स) भवतु ; यथानिर्दिष्टं सम्पादितं प्रियप्रसादनव्रतम् ; तस्मादेव परिजनाः ! गच्छामः। एत आगच्छत।

(ह) आर्य्यपुत्र ! अलङ्घितपुण्यः साम्प्रतं नियमः।

(च) अयि ! प्रियकलत्रो राजर्षिः ; न पुनर्हृदयं निवर्त्तयितुं शक्नोमि।

(क) कथं स्थिराशा निवर्त्त्यते ?

---

* आर्य्यावृत्तम्।

(३६) प्रतिविहाय परित्यज्य।

(३७) व्रतचारिणी नियमवती स्यादेव, नियमविघाते तु पुण्यविघातः। अतस्तत्पुण्यविघातमुत्पाद्य इह स्थातुमधुना न शक्नोमि।

(३८) उर्वशी खलु देव्याः चरितं साक्षात् प्रत्यक्षीकृत्य मदर्थमेव देव्या ईदृशमाचरितमिति विभाव्य च जातलज्जापि नृपतेः आत्महृदयनिवर्त्तने न समर्था।

(३९) अस्थिराशाया निवर्त्तनं वरमपि सम्भाव्यं न पुनः स्थिराशाया इति भावः।

राजा। [आसनमुपसृत्य] वयस्य ! दूरं गता देवी।

विदू। भण वीसत्थो, जं सि वत्तुकामो ; असज्झो त्ति परिच्छिदिअ आदुरो विअ वेज्जेण अउरेण मुक्को तत्थभोदीए भवं। (ख) (४०)

राजा। अपि नामोर्वशी ?

उर्व। [आत्मगतम्] अज्ज कदत्था भवे। (ग)

राजा।

गूढ़ं नूपुर-शब्दमात्रमपि मे कान्तं श्रुतौ पातयेत्,
पश्चादेत्य शनैः करोत्पलवृते कुर्वीत वा लोचने।
हर्म्येऽस्मिन्नवतीर्य साध्वसवशान्मन्दायमाना बला-
दानीयेत पदात् पदं चतुरया सख्या ममोपान्तिकम् ? ॥ (४१)

चित्र। हला उव्वसि ! इदं दाव से मणोरहं सम्पादेहि। (घ)

उर्व। [ससाध्वसम्] कीड़िस्सं दाव। (ङ)

(ख) भण विश्वस्तो, यदसि वक्तुकामः ; असाध्य इति परिच्छिद्यातुर इव वैद्येन अचिरेण मुक्तस्तत्रभवत्या भवान्।

(ग) अद्य कृतार्था भवेत्, उर्वशीति शेषः।

(घ) अयि उर्वशि ! इमं तावदस्य मनोरथं सम्पादय।

(ङ) क्रीड़िष्यामि तावत्।

---

(४०) मदायत्तन्तु यत् किमपि औषधादिकमासीत्, तेनायमसाध्य अतोऽधुना परित्याग एव वरमिति परिच्छिद्य विभाव्य।

(४१) गूढ़ं सशङ्कपदसञ्चारादविस्पष्टम् इत्यर्थः। साध्वसवशात् मन्दायमाना—शङ्कालज्जादिजेन जाड्येन मन्थरगतिः इत्यर्थः। उपान्तिकं समीपम्। शार्दूलविक्रीड़ितम् वृत्तम्।

[इति पृष्ठेनागत्य राज्ञो लोचने संवृणोति। चित्रलेखा विदूषकं संज्ञां लम्भयति] (४२)

राजा। [स्पर्शं रूपयित्वा] सखे ! न खलु नारायणोरुसम्भवा वरोरुः ?।

विदू। कधं भवं अवगच्छदि ?। (च)

राजा। किमत्र ज्ञेयम् ?

अन्यत् कथमिव पुलकैः कलितं मम गात्रकं करस्पर्शात्।
नोच्छ्वसिति तपनकिरणैश्चन्द्रस्यैवांशुभिः कुमुदम्॥

उर्व। अह्महे ! वज्जलेवघड़िदं विअ मे हत्थजुअलं ण समत्थाम्हि अवणेदुम्। (ज) (४३)

[इति मुकुलिताक्षौ चक्षुषी हस्तावपनीय ससाध्वसा तिष्ठति। कथञ्चिदुपसृत्य] जअदु जअदु महाराओ। (छ)

चित्र। सुहं दे वअस्सस्स ? (झ)

राजा। नन्वेतदुपपन्नम्।

उर्व। हला ! देईए दिण्णो महाराओ; अदो से

(च) कथं भवानवगच्छति ?
(छ) आश्चर्य्यम्, वज्रलेपघटितमिव मे हस्तयुगलं न समर्थास्मि अपनेतुम्।
(ज) जयति जयति महाराजः।
(झ) सुखं ते वयस्यस्य ?

---

(४२) केयं राज्ञश्चक्षुरावृणोति, तन्मां प्रकाशय इति इङ्गितेन विदूषकं संज्ञां प्रापयति।

(४३) राज्ञो देहस्पर्शादात्मदेहस्यावशत्वं सूचितम्।

प्पणयवदी विअ सरीरसङ्गदम्हि ; मा क्खु मं पुरोभाइणि त्ति समत्थेसि। (ञ) (४४)

विदू। कधं इधज्जेव तुम्हाणं अत्थं इदो सूरो ? (ट)

राजा। [उर्वशीमवलोक्य]

देव्या दत्त इति यदि व्यापारं व्रजसि मे शरीरेऽस्मिन्।
प्रथमं कस्यानुमते चोरितमयि! मे त्वया हृदयम् ? ॥ (४५)

चित्र। वअस्स! निरुत्तरा एसा; मम सम्पदं विस विअं सुणीअदु। (ठ)

राजा। अवहितोऽस्मि।

चित्र। वसन्तानन्तरं उसससमए भअवं सुज्जो मए उवअरिदव्वो ; ता जधा इअं पिअसही सग्गस्स ण उक्कण्ठेदि, तधा वअस्सेण कादव्वम्। (ड)

(ञ) अयि! देव्या दत्तो महाराजः; अतोऽस्य प्रणयवतीव शरीरसङ्गतास्मि; मा खलु मां पुरोभागिनीति समर्थय।

(ट) कथमिहैव युवयोरस्तमितः सूर्यः ?

(ठ) वयस्य! निरुत्तरा एषा ; मम साम्प्रतं विज्ञप्तिः श्रूयताम्।

(ड) वसन्तानन्तरम् उषसमये भगवान् सूर्यो मया उपचरितव्यः; तस्मात् यथा इयं प्रियसखी स्वर्गस्य न उत्कण्ठते तथा वयस्येन कर्त्तव्यम्। (वसन्तानन्तरमुषसमये इत्यादिकस्यास्ति कश्चिन्निगूढार्थः अवदातस्य, विभाव्य नीयताम्।)

---

(४४) सर्वकर्मेषु अग्रगामित्वं पुरोभागित्वम्। अत्र तु विना वार्त्तया आत्मना अस्य शरीरसङ्गतत्वादहम् पुरोभागिनी संवृत्ता, तन्न। हीनलज्जाः स्त्रियः शोच्याः इति भावः।

(४५) देव्या दत्त इति यदि अस्मिन् शरीरे व्यापारं व्रजसि। अनुमतमिति यदि आलिङ्गनादिकं करोषि, तत् कस्य अनुमते प्रागेव मे हृदयं त्वया हृतमिति भावः। आर्य्या वृत्तम्।

विदू। किं वा सग्गे सुमरिदव्वं, ण तत्थ खाईअदि, ण वा पीअदि, केवलमणिमिसेहिं अच्छीहिं मोणदा अवलम्बीअदि। (ढ)

राजा। वयस्य!

अनिर्देश्यसुखं स्वर्गं कथं विस्मारयिष्यते।
अनन्यनारीसामान्यो दासस्त्वायं पुरूरवाः॥ (४६)

चित्र। अणुग्गहिदम्हि। हला उव्वसि! अकादरा भविअ विसज्जेहि मम्। (ण)

उर्व। [चित्रलेखां परिष्वज्य सकरुणम्]। सहि! मा क्खु मं विसुमरेसि। (त)

चित्र। [सस्मितम्]। वअस्सेण सङ्गदा तुमं मए एव्वं जाचिदव्वा। (थ) (४७)

(ढ) किं वा स्वर्गे स्मर्त्तव्यं, न तत्र खाद्यते, न वा पीयते, केवलमनिमिषैरक्षिभिर्मौनता अवलम्ब्यते।

(ण) अनुगृहीतास्मि, अयि उर्वशि! अकातरा भूत्वा विसर्जय माम्।

(त) सखि! मा खलु मां विस्मरिष्यसि।

(थ) वयस्येन सङ्गता त्वं मया एवं याचितव्या।

---

(४६) अनन्यनारीसामान्यः, अन्यनारीषु यथाहं सामान्यः तथा न, अर्थात् सर्वासु यथा समभावत्वेन वर्त्तामहे, तथा त्वयि न। त्वयि तु विशेषप्रणयवानिति तात्पर्य्यम् दासवदुपचरिष्यामि च अतः किञ्चिन्नास्ति मे भ्रान्तिः। एतन्मात्रविश्वासेन सुखपूर्णस्वर्गविस्मारणे कथमहं क्षमः स्याम्? अनुष्टुप् वृत्तम्।

(४७) वयस्यसङ्गतायास्तवैवं सम्भाव्यते न पुनर्मम।

[इति राजानं प्रणम्य निष्क्रान्ता]

विदू। दिट्टिआ मणोरहसिद्धीए वड्ढदु भवम्। (द)

राजा। इमां तावत् मनोरथसिद्धिं पश्य।

सामन्तमौलिमणिरञ्जितपादपीठ-
मेकातपत्रमवनेर्न तथा प्रभुत्वम्।
अस्याः सखे! चरणयोरहमद्य कान्त-
माज्ञाकरत्वमधिगम्य यथा कृतार्थः॥ (४८)

उर्व। णत्थि मे वाआ विहवो अदो अवरं मन्तिदुम्। (ध)

राजा। [उर्वशीं हस्तेन अवलम्ब्य] अहो! अविरुद्ध-संवर्द्धनमेतदिदानीमीप्सितलम्भानाम्। (४९)

यतः। पादास्तएव शशिनः सुखयन्ति गात्रं,
वाणास्तएव मदनस्य मनोऽनुकूलाः।
संरम्भरुक्षमिव सुन्दरि! यद्यदासीत्,
त्वत्सङ्गमेन मम तत्तदिवानुकूलम्॥ *

उर्व। अवरद्धाम्हि चिरआरिआ महाराअस्स। (न)

राजा। सुन्दरि! मा मैवम्।

यदेवोपनतं दुःखं सुखं तद्धि रसान्तरम्।

(द) दिष्ट्या मनोरथसिद्ध्या वर्द्धतां भवान्।
(ध) नास्ति मे वाचा विभवोऽतोऽपरं मन्त्रयितुम्।
(न) अपराद्धास्मि चिरकारिका महाराजस्य।

---

(४८) प्रभुत्वमपि प्राप्य तथा नाहं कृतार्थः, यथास्या आज्ञाकरत्वं प्राप्य। वसन्ततिलकं वृत्तम्।

(४९) ईप्सितप्रापकाणां चन्द्रपादादीनामातिशय्यमिदानीं न विरुद्धम्। काङ्क्षितमेलकत्वात्तेषाम् आतिशय्यमिदानीं मे सुखकरमेव, न मत्सम्बन्धे विरुद्ध-मिति भावः।

* वसन्ततिलकं वृत्तम्।

निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥ (५०)

विदू। भोदि! सेविदा पदोसरमणीआ चन्दपादा; समओ दे गेहप्पवेसस्स। (प)

राजा। तेन हि सख्या मार्गमादेशय।

विदू। इदो इदो भोदी। (फ)

[इति परिक्रामति]।

राजा। सुन्दरि! इयमिदानीं मे प्रार्थना।

उर्व। केरिसी सा? (ब)

राजा। अनधिगतमनोरथस्य पूर्वं
शतगुणितेव गता मम त्रियामा।
यदि तु तव समागमे तथैव
प्रसरति सुभ्रु! ततः कृती भवेयम् ॥ (५१)

[इति निष्क्रान्ताः]

[तृतीयोऽङ्कः समाप्तः]

(प) भवति! सेविताः; प्रदोषरमणीयाश्चन्द्रपादाः समयस्ते गृह-प्रवेशस्य।

(फ) इतइतो भवती।

(ब) कीदृशी सा?

---

(५०) रोगमुक्तो हि उपशमसुखमनुभवति; चिररोगी कथं तदवगच्छति? अनुष्टुप् वृत्तम्।

(५१) हे सुभ्रु! अनधिगतो अप्राप्तो अपूर्ण इति यावत् मनोरथो अभिलाषो यस्य तथाभूतस्य मम त्रियामा प्रहरत्रयसमन्विता रात्रिः शतगुणितेव विशतप्रहरसमन्वितेव गता। विरहवेदनाविधुरेण मया रात्रिः कष्टेन यापिता सुतरां वर्द्धितयामेव आसीत् इत्यर्थः। इदानीं तव समागमे यदि तु तथैव शतगुणितैव प्रसरति गच्छति ततः कृती कृतार्थो भवेयम्। पुष्पिताग्रावृत्तम्।

चतुर्थोऽङ्कः ।

[नेपथ्ये सहजन्याचित्रलेखयोः प्रावेशिकी आक्षिप्तिका] । (१)

पिअसहि-विओअ-विमणा सहिसहिआ वाउला समुल्लसइ ।
सूरकर-पस्स-विअसिअ-तामरसे सरवरुस्सङ्गे । (२) (क)

[ततः प्रविशति सहजन्या चित्रलेखा च]

चित्र । [प्रवेशान्तरे द्विपदिकया दिशोऽवलोक्य] (३)

(क) प्रियसखी-वियोग विमनाः सखीसहिता व्याकुला समुल्लसति ।
सूर्य्यकरस्पर्शविकसिततामरसे सरोवरोत्सङ्गे ॥

---

(१) प्रावेशिकी रङ्गप्रवेशसंसूचिका, आक्षिप्तिका गीतिविशेषः । तदुक्तम् ।

'चञ्चत्पुटादितालेन मार्गत्रयविभूषिता ।
आक्षिप्तिका स्वरपदग्रथिता कथिता बुधै'रिति ।

गाथाच्छन्दः ; तल्लक्षणं यथा पिङ्गले,—

"पढमं बारह मत्ता, बीए अट्टारहेण संजुत्ता ।
जह पढमं, तह तीअं, दह पञ्चविभूसिआ, गाहा" ॥

(२) नवोदितसूर्य्यकरस्पर्शविकसिततामरसे सरोवरोत्सङ्गे सखीसहितापि प्रियसखीवियोगविमना अतएव व्याकुला हंसीति शेषः ; समुल्लसति विचरति, हंसीच्छलतः सहजन्यासहितायाश्चित्रलेखायाः प्रवेशः सूच्यते । हंसीपक्षे वर्णितगुणं सरो यथा सुखजनकमपि विरहितत्वात् केवलं दुःखाय । तद्वत् चित्रलेखापक्षे वर्षासमयोऽपि प्रियसखीविरहितत्वात् दुःखकारणं जातम् । प्रियवस्तु प्रियसङ्गतस्य सुखाय भवति, विरहितस्य तु तदेव दुःखाय जातमिति भावः ।

(३) द्विपदिका, यथाह भरतः । शुद्धा खण्डा च मात्रा च सम्पूर्णेति चतुर्विधा । भवेद्द्विपदिका गीतिर्भरतेन प्रकीर्त्तिता । भवेत् चतुर्भिश्चरणैस्त्रयोदशकलात्मकैरिति । कला मात्रा । द्विपदिकया दिशोऽवलोक्य । दिगवलोकनकाले प्रायशो द्विपदिका व्यवह्रियते ।

सहअरि दुक्खालिद्धअं सरोवरम्हि सिणिद्धअम ।
वाहो-वग्गिअ-णअणअं तम्मइ हंसीजुअलअम् ॥ (ख) (४)

सह । [सखेदम्] सहि चित्तलेहे ! मिलाअमाणसअ-वत्तकसणा दे मुहच्छाआ हिअअस्स असुत्थिदं सूएदि ; ता कधेहि से अणिव्विदिकारणं, जेण दे समाणदुक्खा होमि । (ग)

चित्र । सहि ! अच्छरा-वावारपज्जाएण तत्थभअदो सुज्जस्स उअत्थाणे वट्टन्ती, पिअसहीए विणा वसन्तसमओ आअदो त्ति, बलिअं उक्कण्ठिदो म्हि । (घ)

सह । सहि ! जाणामि वो अण्णोण्णगदं पेम्मं ; तदो तदो ? । (ङ)

चित्र । तदो इमेसुं दिअसेसुं को णु हि वुत्तन्तो वट्टदि त्ति पणिधाणट्ठिदाए मए अच्चाहिदं उअलद्धम् । (च)

(ख) सहचरीदुःखालीढ़कं सरोवरे स्निग्धकम ।
वाष्पावल्गितनयनकं ताम्यति हंसीयुगलकम् ॥

(ग) सखि चित्रलेखे ! म्लायच्छतपत्रकान्ता ते मुखच्छाया हृदयस्य अस्वस्थतां सूचयति ; तत् कथय मे अनिर्वृतिकारणं येन ते समानदुःखा भवामि ।

(घ) सखि ! अप्सरीव्यापारपर्य्यायेण तत्रभवतः सूर्य्यस्य उपस्थाने वर्त्त-माना, प्रियसख्या विना वर्षत्समय आगत इति, बलवदुत्कण्ठितास्मि ।

(ङ) सखि ! जानामि युवयोरन्योन्यगतं प्रेम ; ततस्ततः ? ।

(च) तत एषु दिवसेषु को नु हि वृत्तान्तो वर्त्तते । इति प्रणिधान-स्थितया मया अत्याहितमुपलब्धम् ।

---

(४) यद्दृष्ट्वा नयनं स्निग्धं भवति, तदेव स्निग्धकम् ।

सह। कीरिसं तं ? (छ)

चित्र। [सकरुणम्] उव्वसी किल तं राएसिं लच्छीसणाहं गेण्हिअ अमच्चेसु णिवेसिदरज्जधुरं केलाससिहरुद्देसे गन्धमादणवणं विहरिदुं गदा। (५) (ज)

सह। [सश्लाघम्] सहि! सो सम्भोओ, जो तारिसेसुं प्पदेसेसुं ; (६) तदो तदो ? (झ)

चित्र। तदो तहिं मन्दाइणीतीरे सिकदापव्वदेहिं कीलमाणा उदअवती णाम विज्जाहरदारिआ तेण राएसिणा खणं णिज्झाइदत्ति कदुअ कुविदा मे पिअसही उव्वसी। (ञ)

सह। असहणा क्खु सा ; दुरारूढ़ो अ से प्पणओ ; ता भविदव्वदा एत्थ बलवदी ; तदो तदो ? (ट)

(छ) कीदृशं तत् ?।

(ज) उर्वशी किल तं राजर्षिं लक्ष्मीसनाथं गृहीत्वा अमात्येषु निवेशितराज्यधुरं कैलासशिखरोद्देशे गन्धमादनवनं विहर्तुं गता।

(झ) सखि! स सम्भोगः, यः तादृशेषु प्रदेशेषु ; ततस्ततः। प्रदेशेषु भवतीति शेषः।

(ञ) ततस्तत्र मन्दाकिनीतीरे सिकतापर्वतैः क्रीड़न्ती उदकवती नाम विद्याधरदारिका तेन राजर्षिणा क्षणं निध्यातेति कृत्वा कुपिता मे प्रियसखी उर्वशी। सिकतापर्वतैर्वालुकानिर्मितकृत्रिमपर्वतैः।

(ट) असहना खलु सा ; दूरारूढ़श्चास्याः प्रणयः ; तस्माद्भवितव्यता अत्र बलवती। ततस्ततः ?।

---

(५) लक्ष्मीमात्रसनाथं नतु अन्यसपत्नीसहितमिति तात्पर्य्यम्। अमात्येषु निवेशितराज्यधुरं निश्चिन्तमिति यावत्।

(६) गन्धमादनवनस्यातिमनोहरत्वान्निर्जनत्वाच्च तत्र सम्भोगोऽतिसुखकर इति भावः।

चित्र। तदो सा भत्तुणो अणुणअं अप्पलिवज्जमाणा गुरुसावसंमूढ़हिअआ विसुमरिद-देवदा णिअमा कस्सआजण-परिहरणीअं कुमालवणं पविट्टा ; पवेसाणन्तरं अ काणणो-वन्तवत्तिलदाभावेण परिणदं से रूवम्। (७) (ठ)

सह। [सशोकम्] सव्वधा णत्थि विहिणो अलङ्घ-णीअं णाम, जेण तारिसस्स रूवस्स असारिसो ज्जेव परि-णामो संवुत्तो ; तदो तदो ? (ड)

चित्र। तदो सोवि तस्सिं ज्जेव काणणे पिअसहीं अण्णेस-अन्तो उम्मत्तीभूदो इदो उव्वसी तदो उव्वसी त्ति कदुअ अहोरत्ताइं अदिवाहेदि। [नभसोऽवलोक्य] एदिणा उण णिव्विदाणं पि उक्कण्ठाआरिणा मेहोदएण अप्पदीआरो भविस्सदि त्ति तक्केमि। (८) (ढ)

(ठ) ततः सा भर्त्तुरनुनयमप्रतिपद्यमाना गुरुशापसंमूढ़हृदया विस्मृत-देवतानियमा कन्यकाजनपरिहरणीयं कुमारवनं प्रविष्टा ; प्रवेशानन्तरञ्च काननोपान्तवर्त्तिलताभावेन परिणतमस्या रूपम् ।

(ड) सर्वथा नास्ति विधेरलङ्घनीयं नाम, येन तादृशस्य रूपस्य अन्यादृश एव परिणामः संवृत्तः ; ततस्ततः ? ।

(ढ) ततः सोऽपि तस्मिन्नेव कानने प्रियसखीमन्विष्यन् उन्मत्तीभूतः, इत उर्वशी तत उर्वशी इति कृत्वा अहोरात्रानतिवाहयति । एतेन पुनर्निर्वृतानामपि उत्कण्ठाकारिणा मेघोदयेन अप्रतीकारो भविष्यतीति तर्कयामि ।

---

(७) ततः सा भर्त्तुरनुनयमित्यादि । भर्त्तुः स्वामिनः । अनुनयं प्रसा-दनोपयोगि चाटुवचनम् इत्यर्थः । अप्रतिपद्यमाना अगच्छन्ती । गुरोर्भरतस्य शापेन सम्मूढ़हृदया कन्यकाजनपरिहरणीयं निषिद्धस्त्रीजनगमनं कुमारवनं कुमारस्य कार्त्तिकेयस्य तपोवनं प्रविष्टा ।

(८) "मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः" मेघदूतम् ।

[अत्रान्तरे जम्भलिका] (९)

सहअरि-दुक्खालिद्धअं सरवरअम्हि सिणिद्धअम्।
अविरल-वाहजलोल्लअं तम्मइ हंसीजुअलअम्॥ (ग)

सह। सहि! अत्थि कोबि समागमोबाओ?। (त)

चित्र। गोरोचरण-राअसम्भवं सङ्गममणिं वज्जिअ कुदो से समागमोबाओ। (थ)

सह। ण ईदिसा आकिदिविसेसा चिरं दुक्खभाइणो होन्ति; ता अवस्सं कोबि अणुग्गहणिमित्तभूओ समागमोबाओ भविस्सदि त्ति तक्केमि। (१०) [प्राचीं दिशं विलोक्य] ता एहि उदआहिबस्स (११) भअवदो सुज्जस्स उबत्थाणं करेम्ह। (द)

(ग) सहचरी दुःखालीढ़कं सरोवरे स्निग्धकम्।
अविरलवाष्पजलोक्षकं ताम्यति हंसीयुगलकम्॥

(त) सखि! अस्ति कोऽपि समागमोपायः?।

(थ) गौरीचरणरागसम्भवं सङ्गममणिं वर्जयित्वा कुतोऽस्याः समागमोपायः?।

(द) नेदृशा आकृतिविशेषाश्चिरं दुःखभागिनी भवन्ति; तदवश्यं कोऽपि अनुग्रहनिमित्तभूतः समागमोपायो भविष्यतीति तर्कयामि; तदेहि उदयाधिपस्य भगवतः सूर्यस्य उपस्थानं कुर्वः।

---

(९) अत्रान्तरे जम्भलिका। जम्भलिकालक्षणं यथा भरतः। "शुद्धा द्विपदिका गीतिः सैव जम्भलिकोच्यते।"

(१०) नेदृशा आकृतिविशेषा इत्यादि। ईदृशा आकृतिविशेषाः चिरं दुःखभागिनी न भवन्ति। एवंविधसुलक्षणाक्रान्तः सुपुरुषः स महाराजः चिरं न विरहव्यथामनुभवेत्, ईदृशी सुरूपा उर्वशी च चिरमेवमवस्थां नैव सहेतेति तर्कयामि इत्यर्थः।

(११) उदयाधिपस्य उदयपर्वतस्याधिपस्य।

[अत्रान्तरे खण्डधारा] (१२)

चिन्तादुम्मिअमाणसिआ सहअरि-दंसणलालसिआ ।
विअसिअ-कमल-मणोहरए विहरइ हंसी सरवरए ॥ (ध)

[इति निष्क्रान्ते । प्रवेशकः] ॥ (१३)

[नेपथ्ये पुरूरवसः प्रावेशिकी आक्षिप्तिका]

गहणं गइन्दणाहो पिअ-विरहुम्माअ-पअलिअ-विआरो ।
विसइ तरु-कुसुम-किसलअ-भूसिअ णिअदेह-पब्भारो ॥
(१४) (न)

[ततः प्रविशति आकाशबद्धलक्ष्यः सोन्मादो राजा]

(ध) चिन्तादूनमानसिका सहचरीदर्शनलालसिका ।
विकसितकमलमनोहरे विहरति हंसी सरोवरे ॥

(न) गहनं गजेन्द्रनाथः प्रियाविरहोन्मादप्रकटितविकारः ।
विशति तरुकुसुमकिसलयभूषितनिजदेहप्राग्भारः ॥

---

(१२) अत्रान्तरे खण्डधाराः । तल्लक्षणं यथा भरतः । "चतुर्दशकला-युक्तैश्चतुर्भिश्चरणैरिह । खण्डाख्या द्विपदी गीतिः खण्डधारापि सा भवेत् ।"

(१३) इति प्रवेशकः । प्रवेशकलक्षणं यथा दर्पणे "प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः । अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ।

(१४) गहनं गजेन्द्रनाथ इत्यादि । गजेन्द्रनाथः प्रियायाः विरहेण वियोगेन यः उन्मादः मत्तता तेन प्रकटितः सुस्पष्टं प्रकाशितः विकारो मनसो प्रकृतिव्यतिरूपो यस्य सः । तरुभिः खण्डितत्वचकैः कुसुमैः किसलयैश्च भूषितः निजदेहस्य प्राग्भारः पृष्ठदेशो येन सः । "शैलाग्रं शिखरं शृङ्गं दन्तः प्राग्भार इत्यपि" इति त्रिकाण्डशेषः । प्राग्भारः शिखरं, गजदेहशिखरन्तु पृष्ठदेश इत्यर्थः । अत्रापि गजच्छलेन पुरुरवा आक्षिप्यते । सोऽपि वातुलत्वात् पुष्पादिविभूषित-निजदेह इति तात्पर्य्यम् ।

राजा। [सक्रोधम्] आ दुरात्मन् रक्षः! तिष्ठ तिष्ठ, मम प्रियतमाम् आदाय क्व गच्छसि ?। [विलोक्य] कथं शैल-शिखराद्गगनमुपेत्य वाणैर्मामभिवर्षति।

[इति लोष्टं गृहीत्वा हन्तुं धावन्, अनन्तरे द्विपदि-कया दिशोऽवलोक्य]

हिअआहिअ-पिअदुक्खओ सरवरए धुअपक्खओ।
वाह्नो-वग्गिअ-णअणओ तम्मई हंसजुअणओ॥ (१५) (प)

[विभाव्य सकरुणम्] कथम्

नवजलधरः सन्नद्धोऽयं, न दृप्तनिशाचरः,
सुरधनुरिदं दूराकृष्टं, न नाम शरासनम्।
अयमपि पटुर्धारासारो, न वाणपरम्परा,
कनकनिकषस्निग्धा विद्युत्, प्रिया मम नोर्वशी॥ (१६)

[इति मूर्च्छितः पतति। पुनर्द्विपदिकया उत्थाय निश्वस्य]

मइ जाणिअं, मिअलोअणिं णिसिअरु कोबि हरइ।
जाव णु णवतलि-सामल धाराहरु वरिसेइ॥ (फ)

(प) हृदयाहितप्रियादुःखकः सरोवरे धुतपक्षकः।
वाष्पवल्गितनयनकस्ताम्यति हंसयुवकः॥

(फ) मया ज्ञातं, मृगलोचनीं निशाचरः कोऽपि हरति।
यावत् नु नवतड़िच्छ्यामलो धाराधरो वर्षति॥

---

(१५) हृदयाहितेत्यादि। हृदये मनसि आहितं सन्निधापितं रक्षित-मिति यावत्। प्रियायाः दुःखं विपत्तिरूपं येन सः।

(१६) सन्नद्धः उदितः। दूराकृष्टं सुविस्तृतम्। पटुः प्रवलः धाराणां वृष्टिधाराणां आसारः सम्पातः। कनकस्य सुवर्णस्य निकषः सुवर्णपरीक्षोपयोगी उपलविशेषः। हरिणीवृत्तम्।

[इति सकरुणं विचिन्त्य] तत् खलु क्व नु गता स्यात् ? ।

क्वापि

तिष्ठेत् कोपवशात् प्रभावपिहिता ? दीर्घं न सा कुप्यति ;
स्वर्गायोत्पतिता भवेत् ?, मयि पुनर्भावार्द्रमस्या मनः ।

[सरोषम्]

तां हर्त्तुं विबुधद्विषोऽपि हि न मे शक्ताः पुरोवर्त्तिनीं ;
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः ॥ (१७)

[दिग्दिकया दिशोऽवलोक्य निश्वस्य सास्रम्] अहो !
अपरावृत्तभागधेयानां दुःखं दुःखानुबद्धमेव । (१८)

कुतः ? ।

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभिर्भवितव्यञ्च निरातपत्वरम्यैः ॥ (१९)

[अनन्तरे चर्चरी] ।

जलहर ! संहर एह कोबं मइ आणत्तओ,
अविरल-धारासाराक्कन्त-दिसामुहओ ।

---

(१७) तिष्ठेत् कोपवशादित्यादि । प्रभावेण तिरष्करिणीविद्याप्रभावेण पिहिता आच्छादिता । अस्या मनः हृदयं मयि भावेन अनुरागेण आर्द्रं स्निग्धम् । शार्दूलविक्रीड़ितं वृत्तम् ।

(१८) अहो अपरावृत्तेत्यादि । अपरावृत्तः अप्रतिनिवृत्तः भागधेयो सौभाग्यं येषाम् । केवलं भाग्यपदोल्लेखेन सौभाग्यमेवाक्षिप्यते । भाग्येनैतत् सम्भवतीत्यादिवत् । दुःखं दुःखेन दुःखान्तरेण अनुबद्धं युक्तम् ; दुःखं दुःखान्तरानुषङ्गि इति यावत् ।

(१९) अयमेकपदे इत्यादि । एकपदे सपदि तया प्रियया अयं सुदुःसहो वियोगः विरहः उपनतः उपस्थितः । तथा नववारिधरोदयात् नवमेघोदयात् अहोभिः दिवसैः निरातपत्वरम्यैः रौद्राभावमनोहरैश्च भवितव्यम् । सम्भोगार्हे जलदसमये प्रियाविरहः नितरां सुदुःसह इति भावः । मालभारिणी-वृत्तम् ।

अए ! मइ पुहविं भमन्ते जइ पिअं पेक्खिहिमि,
तआ जं जं करीहिसि, तं तं सहीहिमि ॥ (ब)

[चर्चरिकया विचिन्त्य]।

वृथा खलु मया मनसः सन्तापवृद्धिरुपेक्ष्यते। यदा मुनयोऽप्येवं व्याहरन्ति 'राजा कालस्य कारणम्' इति। तत् किमहमेनं जलधरसमयं न प्रत्यादिशामि ?। (२०)

[विहस्य उत्थाय, यदा मुनयोऽप्येवं व्याहरन्तीति पुनः पठित्वा] भवतु प्रत्यादिशामि।

[अनन्तरे चर्चरी]।

गम्भुम्माइअ-महुअर-गीएहिं
वज्जन्तेहिं परहुअतूरेहिम्।
पसरिअ-पवणुव्वेल्लिअ-पल्लव-णिअरू
सुललिअ-विविहपआरेहिं णच्चइ कप्पतरू (२१) (भ)

(ब) जलधर ! संहर एतं कोपं मया आज्ञप्तकः,
अविरलधारासाराक्रान्तदिङ्मुखः।
अये ! अहं पृथिवीं भ्रमन् यदि प्रियां प्रेक्षिष्ये,
तदा यद्यत् करिष्यसि तत्तत् सहिष्ये ॥

(भ) गम्भीरोन्मादित मधुकरगीतैर्वाद्यमानैः परभृततूर्य्यैः।
प्रसृतपवनोद्वेल्लित पल्लवनिकरः सुललितविविधप्रकारेण नृत्यति कल्पतरुः॥

---

(२०) वृथा खलु इति। अकारणमेव मे मनसः सन्तापो वर्द्धते। यतः कालानां राजाधीनत्वात्; अयमहं जलधरसमयस्य निवारणे समर्थ इत्यर्थः। न प्रत्यादिशामि निवर्त्तयामीति भावः।

(२१) गम्भुम्माइअ इत्यादि। परेण भ्रयन्ते इति परभृताः कोकिलाः त एव तूर्य्याणि तैः।

[तेन नर्त्तित्वा]

अथवा न प्रत्यादिशामि ; यत् प्रावृषेण्यैरेव चिह्नैः संप्रति महाराजोपचारः क्रियते। (२२)

[विहस्य पुनर्गन्धुम्मादश्च इति पठित्वा]

कथमिति ?।

विद्युल्लेखा-कनकरुचिरश्रीवितानं ममाभ्रं
व्याधूयन्ते निचुलतरुभिर्मञ्जरीचामराणि।
घर्मच्छेदात् पटुतरगिरो वन्दिनो नीलकण्ठा
धारासारोपनयनपरा नैगमाश्चाम्बुवाहाः॥ (२३)

[पुनश्चर्चरी] भवतु ; किं परिच्छदश्लाघया। यावदस्मिन् कानने प्रियां प्रणष्टामन्वेषयामि। (२४)

---

(२२) अथवा न प्रत्यादिशामीत्यादि। प्रावृषेण्यैः प्रावृट्कालभवैः चिह्नैः मेघविद्युल्लेखाधारासारादिभिः। महाराजोपचारः महाराजोपासनोपयुक्तः चामरव्यंजनादिरूपः सेवाविशेष इत्यर्थः।

(२३) विद्युल्लेखेत्यादि। विद्युल्लेखया कनक इव कनकस्येव कषणोपलाङ्कितस्य स्वर्णस्येव रुचिरा मनोज्ञा श्रीर्यस्य स तथाभूतः अभ्रं मेघः मम वितानं चन्द्रातपः, तथा निचुलतरुभिर्वेतसवृक्षैः मञ्जरीरूपकचामराणि व्याधूयन्ते। घर्मच्छेदात् ग्रीष्मात्ययात् पटुतरगिरः सुस्पष्टभाषिणो नीलकण्ठाः मयूराः मम वन्दिनः स्तुतिपाठकाः। तथा धारासाराणां वृष्टिजलधाराणामुपनयने परा अम्बुवाहाः मेघाः नैगमाः वणिजः यथा वणिजः धनरत्नाद्युपहारेण राजानमुपतिष्ठन्ति तद्वदेतेऽपि जलधराः धारावर्षरूपोपपहारेण मामुपतिष्ठन्ति इत्यर्थः। यथैते बहुभिरुपचारैमामुपतिष्ठन्ति तथा न युक्तः प्रावृट्कालप्रत्यादेश इति भावः। मन्दाक्रान्तावृत्तम्।

(२४) भवतु किं परिच्छदेत्यादि। परिच्छदस्य राजोचितपरिजनस्य श्लाघा अहङ्कारः तया ; राजानं माम् एते उपतिष्ठन्ति इत्यादिभिः वृथाहङ्कारेणलम् इत्यर्थः।

[पाठस्थान्तरे भिन्नकः]

दइआ-रहिओ अहिअं दुहिओ
विरहाणुगओ परिमन्थरओ ।
गिरिकाणणए कुसुमुज्जलए
गअजूहवई उअ झीणगई ॥ (म)

[अनन्तरे द्विपदिकया परिक्रम्य अवलोक्य च, सहर्षम्]

हन्त हन्त ! व्यवसितस्य मे संवर्द्धनं वृत्तम् । (२५)

आरक्तकोटिभिरियं कुसुमैर्नवकन्दली मलिनगर्भैः ।
कोपादन्तर्वाष्पे स्मरयति मां लोचने तस्याः ॥ (२६)

इतो गतेति कथं मया खलु तत्रभवती सूचयितव्या ? यतः,

पद्भ्यां स्पृशेद्वसुमतीं यदि सा सुगात्री
मेघाभिवृष्ट-सिकतासु वनस्थलीषु ।
पश्चान्नता गुरुनितम्बतया ततोऽस्याः
दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का ॥ (२७)

(म) दयितारहितोऽधिकं दुःखितो विरहानुगतः परिमन्थरकः ।
गिरिकाननके कुसुमोज्ज्वलके गजयूथपतिः पश्य क्षीणगतिः ॥

---

(२५) हन्त हन्त व्यवसितस्येति । व्यवसितस्य प्रियान्वेषणनियुक्तस्य मे संवर्द्धनं विरहानलसन्धुक्षणं जातम् ।

(२६) आरक्तकोटिभिरित्यादि, इयं नवकन्दली आरक्ताः कोटिः अग्रभागो येषां तैस्तथाविधैः मलिनगर्भैः कुसुमैः पुष्पैः, कोपात् अन्तर्वाष्पे, अन्तरन्तरित-वाष्पभराकुले तस्याः नयने स्मारयति । आर्य्यावृत्तम् ।

(२७) पद्भ्यामित्यादि । सुगात्री अनवद्याङ्गी सा उर्वशी यदि मेघैः अभि-वृष्टाः सिकता यासु तासु वनस्थलीषु वसुमतीं पृथिवीं यदि पद्भ्यां स्पृशेत्,

[द्विपदिकया परिक्रम्य अवलोक्यच] हन्त हन्त ! उपलब्धमुपलक्षणं, येन तस्याः कोपनायाः सरसमुन्नीयते मार्गः । (२८)

> हृतोष्ठरागैर्नयनोदविन्दुभि-
> र्निमग्ननाभेर्निपतद्भिरङ्कितम् ।
> च्युतं रुषा भिन्नगतेरसंशयं
> शुकोदरश्याममिदं स्तनांशुकम् ॥ (२९)

भवतु आदास्ये तावत् । [परिक्रम्य विभाव्य च सास्रम्] । कथं सेन्द्रगोपं शाद्वलमिदं स्थानम् ? (३०) ; तत् कुतोऽस्मिन् विपिने प्रियाप्रवृत्तिमागमयेयम् ? । [विलोक्य] अयमासारोच्छलितशैलतटस्थलोपाषाणमधिरूढः ।

सतस्तदा गुरुनितम्बतया पश्चान्नता पश्चात् किञ्चिदवनताः अलक्तकाङ्का अलक्तकचिह्नोपेता चारुपदपंक्तिर्मनोहरपादचिह्नपद्धतिर्दृश्येत एवंविधानां पादचिह्नानामसद्भावात् सर्वथा नात्र तस्या आगमनं जातमिति भावः । वसन्ततिलकं वृत्तम् ।

(२८) हन्त हन्त उपलब्धमित्यादि । उपलक्षणं चिह्नम् । मार्गः पन्थाः उन्नीयते अनुमीयते ।

(२९) हृतोष्ठरागैरित्यादि । निम्ननाभेः । तस्याः हृतोष्ठरागैः (नयनजलवर्षेण ओष्ठस्य ताम्बूलादिजनितराग अपहृत इत्यर्थः) नयनोदविन्दुभिः अश्रुजलैः अङ्कितं चिह्नितं शुकोदरश्याममिदं स्तनांशुकं स्तनयुगलाच्छादि उत्तरीयवसनं असंशयं निश्चितं मां प्रति रुषा क्रोधेन भिन्नगतेः विसंष्ठुलगमनायाः च्युतं स्खलितं भ्रष्टं स्यादेव । कोपवशेन विसंष्ठुलपादविक्षेपेण गच्छन्त्या तया पश्चात् परित्यक्तमिति भावः । वंशस्थवृत्तम् ।

(३०) भवतु आदास्ये तावदित्यादि । सेन्द्रगोपं इन्द्रगोपाख्यकीटविशेषपरिव्याप्तं शाद्वलं नवदूर्वादलहरितम् । प्रियाप्रवृत्तिमागमयेयम् । प्रियायाः मार्गं प्राप्नोमि इत्यर्थः ।

आलोकयति पयोदान् प्रबल-पुरोवात-नर्त्तितशिखण्डः।
केकागर्भेण शिखी दूरोन्नमितेन कण्ठेन ॥ (३१)
भवतु, यावदेनं पृच्छामि।

[अनन्तरे खण्डकः]। (३२)

संपत्त-विसूरणओ, तुरिअं परवारणओ।
पिअअम-दंसण-लालसओ गअवरु विम्हिअ-माणसओ (३३)(य)

[तेन खण्डकान्तरे चर्चरी]

वरहिण-पव्भ! तुइ अव्भत्थेमि; आअक्खुहि मे ता,
एत्थ अरसे भमन्ते जइ तुए दिट्ठी सा महु कान्ता।
णिसम्मइ मिअङ्कसरिसे वअणे, हंसगई,
ए चिण्हे जाणीहिसि, आअक्खिउ तुज्झ मई ॥ (र)

(य) संप्राप्तविसूरणकस्त्वरितं परवारणकः।
प्रियतमादर्शन लालसको गजवरो विस्मितमानसकः॥
(र) वर्हिणप्रभो! त्वामभ्यर्थये; आचक्ष्व मे तत्,
अत्रारण्ये भ्रमता यदि त्वया दृष्टा सा मम कान्ता।
निशामय, मृगाङ्कसदृशं वदनं, हंसगतिः।
एतच्चिह्नं ज्ञास्यसि, आख्यातं तुभ्यं मया॥

---

(३१) आलोकयतीति। प्रबलेन पुरोवातेन झञ्झावातेन नर्त्तितः शिखण्डो यस्य स तथाभूतः। तथा दूरोन्नमितेन उन्नतीकृतेन कण्ठेन उपलक्षितः शिखी मयूरः पयोदान् मेघान् आलोकयति।

(३२) अनन्तरे खण्डकः। खण्डकलक्षणं यथा भरतः। पूर्वं "चतुर्विंशतिभिरष्टाविंशतिभिः परम्। मात्राभिरिह यस्यार्द्धं खण्डकः स प्रकीर्त्तितः।"

(३३) संपत्त इत्यादि। संप्राप्तं विसूरणं येन सः सञ्जातखेद इत्यर्थः।

[चर्चरिकयोपविश्य अञ्जलिं बद्ध्वा]

नीलकण्ठ ! ममोत्कण्ठा, वनेऽस्मिन् वनिता त्वया ।
दीर्घापाङ्गा सितापाङ्ग ! दृष्टा दृष्टिक्षमा भवेत् ? । (३४)

[चर्चरिकया विलोक्य] कथमदत्त्वैव प्रतिवचनं नर्त्तितुमारब्धः ।

[पुनश्चर्चरी] ।

तत् किं नु खलु प्रहर्षकारणमस्य ? ; आं ज्ञातम् ।

मृदुपवन-विभिन्नो मत्प्रियायाः प्रणाशात्
घनरुचिर-कलापो निःसपत्नोऽद्य जातः ।
रतिविगलितबन्धे केशपाशे सुकेश्याः
सति कुसुमसनाथे कं हरेदेष बर्हः ? ॥ *

भवतु, परव्यसनसुखितं न पुनरेनं पृच्छामि ।

[द्विपदिकया दिशोऽवलोक्य] ।

अये ! इयमातपान्त-सन्धुक्षितमदा जम्बूविटपमध्यास्ते परभृता, विहगेषु पण्डितैषा जातिः ; यावदेनां पृच्छामि ।

[अनन्तरे खुरकः] । (३५)

विज्जाहर-काणण लीणओ
दुक्खविणिग्गअ-बाहुप्पोल्लओ ।

---

(३४) हे नीलकण्ठ ! मम इयं उत्कण्ठा, अथवा उत्कण्ठारूपा सा मे वनिता । किं ते दृष्टिक्षमा दर्शनयोग्या ? सत्यं ब्रूहि किन्त्वया स्वरूपवती दृष्टा न वा ।

* मालिनीवृत्तम् ।

(३५) खुरकी नृत्यविशेषः ।

दूरोस्सारिअ-हिअआणन्दओ
अम्बरमाणेण भमइ गइन्दओ ॥ (ल) (३६)

[खुरकानन्तरे चर्चरी] ।

परहुअ ! महुर-पलाविणि ! कन्ता
णन्दणवणे सच्छन्दं भमन्ती ।
जइ तुए पिअदमा सा मह दिट्टा,
ता आअक्खहि मह परपुट्टे ॥ (व)

[एतदेव नर्त्तित्वा बलन्तिकया उपसृत्य जानुभ्यां स्थित्वा] (३७)

भवति !

त्वां कामिनो मदनदूतिमुदाहरन्ति,
मानापमान-निपुणं त्वममोघमस्त्रम् ।
तामानय प्रियतमां मम वा समीपं,
मां वा नयाशु, मृदुभाषिणि ! यत्र कान्ता ॥ *

[वामकेन किञ्चिद्दलित्वा आकाशे] किमाह भवती ? कथं मामेवमनुरक्तमपहाय गतेति ? ।

(ल) विद्याधर-कानन-लीनको दुःखविनिर्गत बाष्पोत्पीड़कः ।
दूरोत्सारित-हृदयानन्दकोऽम्बरमानेन भ्रमति गजेन्द्रकः ।
(व) परभृते मधुरप्रलापिनि ! कान्ता नन्दनवने स्वच्छन्दं भ्रमन्ती ।
यदि त्वया प्रियतमा सा मम दृष्टा, तदाचक्ष्व मह्यं परपुष्टे ! ।

---

(३६) अम्बरमानेन आकाशपरिमितेन अङ्गेन अत्युच्चेनेति यावत् ।
(३७) वलन्तिका रागोपाङ्गविशेषः ।
* वसन्ततिलकं वृत्तम् ।

[अग्रतोऽवलोक्य] भवति !

कुपिता ननु कोपकारणं सकृदप्यात्मगतं स्मराम्यहम् ।
प्रभुता रमणेषु योषितां नहि भावस्खलितान्यपेक्षते ॥ *

[ससम्भ्रममुपविश्य, अनन्तरं जानुभ्यां स्थित्वा, कुपितेति पठित्वा, विलोक्य च]

कथं कथाविच्छेदकारिणी स्वकार्य्ये व्यासक्ता ? अथवा सुष्ठु खलु इदमुच्यते । (३८)

महदपि परदुःखं शीतलं सम्यगाहुः,
प्रणयमगणयित्वा यन्ममापन्नतस्य ।
अधरमिव मदान्धा पातुमेषा प्रवृत्ता
फलमभिनवपाकं राजजम्बूद्रुमस्य ॥ (३९)

तदेवं गतेऽपि (४०) प्रियेव मे मञ्जुस्वनेति न मे कोपोऽस्याम् ; सुखमास्तां भवती ; साधयामस्तावत् ।

---

* सुन्दरीवृत्तम् ।

(३८) कथं कथाविच्छेदेत्यादि कथाविच्छेदकारिणी, मम कथायाम् अनवहिता विषयान्तरविक्षिप्तचित्ता इति भावः ।

(३९) महदपीत्यादि । महदपि गुरुतरमपि परदुःखं शीतलम् सम्यगाहुः इति यथार्थमेव । यत् यस्मात् मदान्धा वसन्तमदमत्ता इयं कोकिला आपन्नतस्य दयिताविरहदुःखार्त्तस्य मम प्रणयमनुरागं गाढ़ानुरागजनितं दुःखमिति भावः । अगणयित्वा अविचार्य्यैव राजजम्बूद्रुमस्य अभिनवपाकं सद्यः पक्वं फलं अधरमिव पातुं प्रवृत्ता प्रक्रान्ता । यथा काचित् स्मरान्धा कामिनी आर्त्तजननिवेदनमनपेक्ष्यैव आलिङ्गनचुम्बनादिना रतिलीलामारभते तद्वदियमपि आर्त्तस्य मम वचनमनादृत्यैव स्वकार्य्ये व्यासक्तेति भावः । मालिनीवृत्तम् ।

(४०) तदेवं गतेत्यादि । तत्तस्मात् एवं गतेऽपि एवं मम निवेदनमनपेक्ष्य विषयान्तरव्यापृते सत्यपि, मत्प्रियेव यत् मधुरभाषिणीयं, अतो अस्यां मे कोपोऽयुक्त इति भावः ।

[उत्थाय द्विपदिकया परिक्रम्यावलोक्य च]

अये! दक्षिणेन वनधारं (४१) प्रियाचरण-विक्षेपशंसी नूपुरशब्दः। यावदेनमनुगच्छामि।

[ककुभेन, षडुपभङ्गाः]।

पिअअम-विरह-किलामिअ-वदणओ,
अविरल-वाहजलाउल-णअणओ।
दुस्सहदुक्ख-विसंठुल-गमणओ
पसरिअ-उरुताव-दीविअ-अङ्गओ
अहिअं दुम्मिअ-माणसओ दरिअं गओ
काणणे परिभमइ गइन्दओ। (४२) (अ)

[अनन्तरे द्विपदिकया दिशोऽवलोक्य]।

पिअकरिणी-विच्छेइअओ, गुरुसोआणलदीविअओ।
वाहजलाउल-लोअणओ, करिवर भमइ समाउलओ ॥ (ब)

(अ) प्रियतमाविरहक्लान्तवदनकोऽविरलवाष्पजलाकुलनयनकः।
दुःसहदुःखविसंष्ठुलगमनकः, प्रसृतोरुतापदीपिताङ्गकः।
अधिकं दूनमानसको दरितं गतः कानने परिभ्रमति गजेन्द्रकः ॥
(ब) प्रियकरिणीविच्छेदितको गुरुशोकानलदीपितकः।
वाष्पजलाकुललोचनकः करिवरो भ्रमति समाकुलकः ॥

---

(४१) अये दक्षिणेनेत्यादि। वनधारं वनपार्श्वं दक्षिणेन तस्य दक्षिणतः इत्यर्थः।

(४२) प्रिअअमविरहेत्यादि। दुःसहदुःखविसंष्ठुलगमनः दुःसहेन दुःखेन विसंष्ठुलं विसङ्कलं गमनं यस्य सः। दरितं दुःखं गतः प्राप्तः। आर्य्यावृत्तम्।

[सकरुणम्]। हा धिक् ! कष्टम् ।

मेघश्यामा दिशो दृष्ट्वा मानसोत्सुकचेतसा ।
कूजितं राजहंसेन नेदं नूपुरशिञ्जितम् ॥ (४३)

[इति पठित्वा उत्थाय]

भवतु, यावदेते मानसोत्सुकाः पतत्रिणः सरसोऽस्मात् न उत्पतन्ति, तावदेतेभ्यः प्रियाप्रवृत्तिमागमयेयम् । (४४)

[वलन्तिकया उपसृत्य जानुभ्यां स्थित्वा]। (४५)

हंहो जलविहङ्गमराज !

पश्चात् सरः प्रतिगमिष्यसि मानसं त्वं
पाथेय मुत्सृज विसं ग्रहणाय भूयः ।
मां तावदुद्धर शुचो दयिताप्रवृत्त्या,
स्वार्थात् सतां गुरुतरा प्रणयिक्रियैव ॥

---

(४३) मेघश्यामेत्यादि। मेघेन मेघोदयेन श्यामा नीला। मानसे तदाख्यसरोवरे उत्सुकं मानसगमनाय उत्कण्ठितम् इत्यर्थः चेतश्चित्तं यस्य तेन। ज्योत्स्ना पेया चकोरैर्जलधरसमये मानसं यान्ति हंसाः इत्यादि कविसमयप्रसिद्धत्वात्। अनुष्टुप् वृत्तम्।

(४४) भवतु यावदेते इत्यादि। प्रियाप्रवृत्तिं प्रियायाः वार्त्ताम् आगमयेयं प्राप्नोमि।

(४५) वलन्तिका गीतिविशेषः। त्वं पाथेयं पथि सम्बलभूतं विसं मृणालदण्डमुत्सृज त्यज मदुत्तरदानार्थं परित्यज्य भूयः पुनःग्रहणाय मानसं सरः तदाख्यं सरोवरं प्रतिगमिष्यसि। पूर्वं तावत् मां दयिताप्रवृत्त्या प्रियासंवाददानेन शुचो विरहदुःखात् उद्धर। को नाम भवदुपरोधः ? यत् मम गतिप्रभेदः स्यादित्यभिप्रेत्याह। प्रणयिक्रिया प्रणयिजनोपकारः सतां स्वार्थात् गुरुतरा महती। न स्वार्थमनुसरन्ति साधवः। परन्तु परोपकारव्रतमेव एषां परमिति भावः। वसन्ततिलकं वृत्तम्।

[तिर्य्यगवलोक्य]।

अये! यथा उन्मुखमालोकयति, तथा व्यक्तं, प्रवासोत्सुकमनसा मया न दृष्टेत्याह।

[उपविश्य, चर्च्चरी]।

अरे रे हंसा: ! किं गोइज्जइ ?। (स)

[इति नर्त्तित्वा उत्थाय]

यदि हंस ! गता न ते नतभ्रू:
सरसो रोधसि दृक्पथं प्रिया मे।
मदखेलपदं कथं नु तस्या:
सकलं चोर ! गतं त्वया गृहीतम् ?॥ (४६)

गइ अणुसारे मए लक्खिज्जइ। (ह)

[चर्च्चरिकया उपसृत्य अञ्जलिं बद्ध्वा]

हंस ! प्रयच्छ मे कान्तां, गतिरस्यास्त्वया हृता।

(स) अरे रे हंसा: ! किं गीयते ?।

(ह) गत्यनुसारेण मया लक्ष्यते। मत्प्रियासदृशं तव गमनं दृष्ट्वा त्वया अवश्यमेव सा दृष्टेति मया निश्चीयते इत्यर्थ:।

---

(४६) रे हंस! यदि नतभ्रू: सा मे मम प्रिया सरसो रोधसि तीरे ते तव दृक्पथं न गता नयनपथं न पतिता। तदा हे चौर! कथं किम्प्रकारेण मदेन खेलं सलीलं पदं यस्मिन् तत् मदखेलपदं तस्या: सकलं सम्पूर्णं गतं गमनं त्वया गृहीतम्। यदा भवद्गति: मत्प्रियागत्यनुकारिणी, तदा ध्रुवमेव भवता प्रियतमा मे दृष्टेति भाव:। मालभारिणी वृत्तम्।

विभावितैकदेशेन देयं यदभियुज्यते ॥ (४७)

[पुनश्चर्चरी]

कइ तुए सिक्खिदमिदं गइलालस ! ।
सा तुए दिट्ठा जहणभरालसा ॥ (च)

[पुनश्चर्चरी। सानुनयं, हंस! प्रयच्छेत्यादि पठित्वा, पुनश्चर्चरिकया साक्षेपं हंस प्रयच्छेत्यादि पठित्वा, द्विपदिकया निरूप्य] एष स्तेयानुशासी राजा इति अतिभयादुत्पतितः ; (४८) यावदन्यमवकाशमवगाहिष्ये ।

[द्विपदिकया परिक्रम्य अवलोक्य च]

अये ! प्रियासहायश्चक्रवाकस्तिष्ठति ; यावदेनं गच्छामि।

(च) कुत्र त्वया शिक्षितमेतत् गतिलालस ! ।
सा त्वया दृष्टा जघनभरालसा ॥

---

(४७) हंस ! प्रयच्छ मे कान्ताम्। "कुत्र ते कान्ता, केन वा अपहृता नाहं जाने" इति ? न क्षमः खलु त्वमेतत्कथनाय ; यतोऽस्या मे कान्ताया गतिस्त्वयापहृता। अदृष्टस्यानुकरणमसम्भाव्यमेव। एतावदुक्तेः परतरं हि आत्मानं प्रति राजेति ज्ञानविस्फूरणम्। तेनैवमुक्तिः,—हंस ! विभावितैकदेशेन अपहृतवस्तुन एकदेशमपि त्वत्सङ्गतमिति विभाव्य अभियोगवता राजसमीपे यत् यदर्थमभियुज्यते तत्त्वया देयं प्रत्यर्पणीयमिति भावः। ननुवा रे गतिलालस ! यद्गत्यां त्वमीदृक्,लालसावान्, तदेतत्त्वया कुत्र शिक्षितम् ? अतः खलु अर्थिनोऽर्थमवश्यमेव देयं ते। अनुष्टुभ् वृत्तम्।

(४८) एष स्तेयानुशासीत्यादि। स्तेयं चौर्यं अनुशासति यः स स्तेयानुशासी, दुष्टस्य शास्ता शिष्टस्य पुरस्कर्त्ता नरपतिरिति प्रसिद्धः। उत्पतितः उड्डीनः। अन्यमवकाशं प्रियाप्रवृत्तिजिज्ञासास्थलान्तरं अवगाहिष्ये, गमिष्यामि। स्थानान्तरमन्वेषामि इत्यर्थः।

[अनन्तरे कुटिलिका] (४९)

मम्मर-रणिअ-मणोहरए,

[मन्दघटी] (५०)

कुसुमिअ-तरुवर-पल्लविए।

[चर्चरी]

दइआ विरहुम्माइअओ

काणणे भमइ गइन्दओ (क)

[द्विलयान्तरे चर्चरी]

गोरोअणा-कुङ्कुमवणा चक्का भणइ मम्।

महुवासरे कीलन्ती धणिआ ण दिट्ठा तुए॥ (ख)

[चर्चरिकया उपसृत्य जानुभ्यां स्थित्वा]

रथाङ्गनामन्! संत्यक्तो रथाङ्गश्रोणिबिम्बया।

अयं त्वां पृच्छति रथी मनोरथशतैर्वृतः॥ (५१)

(क) मर्मररणित-मनोहरके कुसुमिततरुवरपल्लविते।
दयिता-विरहोन्मादितकः कानने भ्रमति गजेन्द्रकः।

(ख) गोरोचना-कुङ्कुमवर्ण! चक्र! भण माम्।
मधुवासरे क्रीड़न्ती धन्या न दृष्टा त्वया?॥

---

(४९) अनन्तरे कुटिलिका नाट्यविशेषः।

(५०) मन्दघटी नाट्यविशेषः।

(५१) हे रथाङ्गनामन्! अहं रथाङ्गश्रोणिबिम्बया रथाङ्गवत् रथचक्रवत् आयतमिति यावत्, श्रोणिबिम्बं नितम्बमण्डलं यस्याः (भवता सह नामसाहश्यात् केवलं चक्रोल्लेखो मया कृतः परन्तु रथस्यान्यान्योपकरणीभूतं सर्वमेवाङ्गं तस्यामास्ते) तद्रथस्याहं रथी, इदानीन्तु तया सन्त्यक्तो हि नीरथः संवृत्त इति भावः। तस्मात्तु तत्तदङ्गस्मरणेन मनोरथशतैर्वृतः सन् अयं जनस्त्वां पृच्छति। अनुष्टुप् वृत्तम्।

अयं कः क इत्याह ; न किल विदितोऽहमस्य। (५२)

सूर्याचन्द्रमसौ यस्य मातामहपितामहौ।
स्वयं वृतः पतिर्द्वाभ्यामुर्वश्या च भुवा च यः॥

कथं तूष्णीमेवास्ते ? भवतु, उपालभे तावदेनम्।

[जानुभ्यां स्थित्वा]

तद्युक्तं तावत् आत्मानुमानेन वर्त्तितुम्। कुतः ? (५३)

सरसि नलिनीपत्रेणापि त्वमावृतविग्रहां
ननु ! सहचरीं दूरे मत्वा विरौषि समुत्सुकः।
इति च भवतो जायास्नेहात् पृथक्स्थिति-भीरुता, (५४)
मयि च विधुरे भावः कोऽयं प्रवृत्ति-पराङ्मुखः ?

[उपविश्य] सर्वथा मदीयानां भाग्यविपर्य्ययाणामयं प्रभावः। यावत् अन्यमवकाशम् अवगाहिष्ये।

[द्विपदिकया परिक्रम्य अवलोक्य च]। अये !

इदं रुणद्धि मां पद्ममन्तः क्वणितषट्पदम्।
मया दष्टाधरं तस्याः सशीत्कारमिवाननम्॥ (५५)

---

(५२) कक इति चक्रवाकरुते कः कः इति राज्ञः शाब्दबोधः। अनुष्टुप् वृत्तम्।

(५३) सहचरीविरहे तु तव यादृक् भवति, तदनुमानेन मय्यपि वर्त्तनं ते न्याय्यमिति भावः।

(५४) पृथक्स्थितिभीरुता, पृथगवस्थाने भीरुता प्रियां विना कथमहमेकाकी वर्त्तिष्ये इति भयम्। हरिणीवृत्तम्।

(५५) इदं रुणद्धीत्यादि। अन्तर्मध्ये क्वणिताः शब्दायमानाः षट्पदा यस्य तथाभूतं इदं पद्मं मां रुणद्धि। मम गतिप्रतिषेधं करोति इत्यर्थः। कथमिव। यतः इदं पद्मं मया दष्टाधरं सुरतावसरे प्राप्तमदृन्तचतं अतएव सशीत्कारं तस्या आननमिव। मनोहरं प्रियाया मुखमण्डलं स्मारयन् मामवैव बध्नातीति भावः। अनुष्टुप् वृत्तम्।

इतो गतस्य अनुशयो माभूदिति अस्मिन्नपि कमलशये भ्रमरे प्रणयं करिष्ये। (५६)

[अस्य अनन्तरे अर्द्धद्विचतुरस्रकः। (५७)

एक्कक्कम-वड्ढिअ-गुरुअर-पेम्मरसे (५८)
सरे हंसजुआणओ कीलइ कामवसे। (ग)
[चतुरस्रकेण उपविश्य अञ्जलिं बद्ध्वा]। (५९)
मधुकर! मदिराक्ष्याः शंस तस्याः प्रवृत्तिं
वरतनु रथवासौ नैव दृष्टा त्वया मे।
यदि सुरभि-मवाप्स्यस्तन्मुखोच्छ्वासगन्धं
तव रतिरभविष्यत् पुण्डरीके किमस्मिन्? ॥ (६०)

(ग) एकक्रमवर्द्धितगुरुतरप्रेमरसः
सरसि हंसयुवकः क्रीडति कामवशः।

---

(५६) इतः कमलात् गतस्य सुखस्थानं कमलं परित्यज्य कुत्रचिद्गामिनो मम अनुशयः कमलपरित्यागजन्यसनुतापो माभूदिति विभाव्य कमलशये कमलहृदयशायिनि भ्रमरे प्रणयं करिष्ये।

(५७) अर्द्धद्विचतुरस्रकः। नाट्यविशेषः तदुक्तं "यथा अस्येव चेञ्चरणयोरन्तरं स्याद्द्वयदङ्गुलम्। वितस्तिमात्रमथवा नन्द्यावर्त्तं तदुच्यते। अस्येव नन्द्यावर्त्तमित्यपरं नाम।

(५८) एकक्रमेण मिलनावधि अविभङ्गं वर्द्धितप्रेमरसे।

(५९) चतुरस्रकेण तल्लक्षणं यथा। नन्द्यावर्त्तप्रमाणाद्धि भवेदष्टादशाङ्गुलम् अन्तरं चतुरैः स्थानं चतुरस्रं तदोदितम्।

(६०) मधुकरेत्यादि। हे मधुकर! भ्रमर! मदिराक्ष्या अलसलोचनायाः तस्याः प्रियायाः प्रवृत्तिं वार्त्तां शंस कथय। अथवा असौ मे मम वरतनुः अनवद्याङ्गी प्रियतमा नैव दृष्टा निश्चितमेव सा भवतो दृक्पथं न पतितेति भावः। कुतः इत्याह, यदि सुरभिं शोभनं घ्राणं तन्मुखोच्छ्वासगन्धं

[इति द्विपदिकया परिक्रम्य अवलोक्य च]

अये! करिणीसहायो नागाधिराजो नीपस्कन्ध-निषण्ण-स्तिष्ठति ; यावदेनं गच्छामि।

[कुटिलिका]

करिणी-विरह-सन्दाविअओ

[मन्दघटो]।

काणणए गन्धुदुअ महुअरओ। (घ)

[अतोऽन्तरे विलोक्य]। अथवा न तावदयम् उपसर्पण-कालः।

अयमचिरोद्गत-पल्लवमुपनीतं प्रियतमाग्रहस्तेन।
अभिलषतु तावदासव-सुरभिरसं शल्लकीभङ्गम्॥ (६१)

[स्थानकेन अवलोक्य] अये! कृताहारकः संवृत्तः, भवतु, समीपम् अस्य गत्वा पृच्छामि। (६२)

[अनन्तरे चर्चरी]।

अहं तुमं पुच्छिमि, आअक्खहि गअवरु!
ललिअ-पहारेण णासिदतरुवरु!।

(घ) करिणीविरहसन्तापितकः कानने गन्धोद्धतमधुकरकः।

अवासन्नः तदा किं तव अस्मिन् तुच्छे इत्यर्थः पुण्डरीके रतिः आसक्तिः अभविष्यत्। यदा अनेन कमलगन्धेन भवत आकृष्टं चेतस्तदा मन्ये भवता न दृष्टा सा नच आघ्रातमस्याः पद्माधिकसुरभि मुखमण्डलमिति भावः। मालिनीवृत्तम्।

(६१) आसवगन्धानुकारि क्षीरविशिष्टं शल्लकीभङ्गम्। शल्लकी वृक्ष-विशेषः। आर्य्यावृत्तम्।

(६२) स्थानकेनावलोक्य। स्थानकं रागविशेषः।

दूरविणिज्जिअ- ससहरकन्ती
दिट्ठा पिआ तुए सम्मुहअन्ती ? ॥ (ङ)

[पदद्वयं पुरत उपसृत्य] ।

मदकल ! युवतिशशिकला, गजयूथिका-शवल-केशी ।
स्थिरयौवना स्थिता ते दूरालोके सुखालोका ॥ (६३)

[सहर्षमाकर्ण्य]

अहह ! अनेन प्रियोपलब्धि-शंसिना मन्द्रकण्ठगर्जितेन समाश्वासितोऽस्मि । साधर्म्यात् भूयसी मे त्वयि प्रीतिः । (६४) कथम् ? इति

मामाहुः पृथिवीभुजामधिपतिं नागाधिराजो भवान्
अव्युच्छिन्नपृथुप्रवृत्ति भवतो दानं समानं मम ।

(ङ) अहं त्वां पृच्छामि, आचक्ष्व गजवर !
ललितप्रहारेण नाशिततरुवर !
दूरविनिर्जितशशधरकान्ति-
र्दृष्टा प्रिया त्वया संमोहयन्ती ? ॥

---

(६३) मदकलेत्यादि। हे मदेन मत्ततोदयेन कलः अव्यक्तनिक्वादी तत्सम्बुद्धौ । हे गजयूथप ! करीणां यूथपते ! युवतिषु मध्ये शशिकला चन्द्रकला-स्वरूपा यूथिकाभिः तदाख्यकुसुमैः शवलाश्चित्रिताः केशा यस्या सा तथाभूता तथा, स्थिरं अचञ्चलं यौवनं यस्या सा स्थिरयौवना सुखः सुखकरं सुखेन आलोको दर्शनं यस्या सा प्रियदर्शना उर्वशी ते तव दूरालोके स्थिता किं ? दूरादपि भवता किं दृष्टा इति भावः ।

(६४) अहहेत्यादि। साधर्म्यात् सादृश्यात् । भूयसी बहुला ।

स्त्रीरत्नेषु ममोर्वशी प्रियतमा यूथे तवेयं वशा ;
सर्वं मामनु ते प्रियाविरहजां त्वन्तु व्यथां मानुभूः ॥ (६५)

सुखमास्तां भवान् ।

[द्विपदिकया परिक्रम्य अवलोक्य च]

अये, अयमसौ सुरभिकन्दरो नाम विशेषरमणीयः सानुमान्, प्रियश्च अप्सरसाम् ; अपि नाम सुतनुरस्य उपत्यकायामुपलभ्येत ?

[परिक्रम्य अवलोक्य च]

कथमन्धकारः ? भवतु, विद्युत्प्रकाशेन अवलोकयामि । कथं मदीयैर्दुरितपरिणामैर्मेघोदयोऽपि शतह्रदाशून्यः संवृत्तः, तथापि शिलोच्चयमिनमदृष्ट्वा न निवर्त्तिष्ये । (६६)

[अनन्तरे खण्डिका] । (६७)

---

(६५) मामाहुः पृथिवीभुजामित्यादि । मां पृथिवीभुजां राज्ञामधिपतिमधीश्वरमाहुः जना इति शेषः । तथा भवान् नागानामधिराजः । अधीश्वरत्वमावयोः सममिति भावः । तथा अव्युच्छिन्ना निरवच्छिन्ना पृथुः स्थूला प्रवृत्तिः यस्य तत् निरन्तरमेव चरदित्यर्थः । तव दानं मदजलं, पक्षे दीनेभ्यः अर्थादिवितरणं मम समानम् । स्त्रीरत्नेषु मध्ये उर्वशी मम प्रियतमा—तथा यूथे गजयूथमध्ये इयं करिणी तव वशा त्वयि अनुरक्ता । अतएव ते तव सर्वं मामनु मम सदृशम् । तु किन्तु त्वं प्रियाविरहजां वनितावियोगजनितां व्यथां मा अनुभूः । शार्दूलविक्रीड़ितं वृत्तम् ।

(६६) कथमन्धकार इत्यादि । दुरितानां दुष्कृतीनां परिणामैः परिपाकैः । शतह्रदया विद्युल्लेखया शून्यः दर्शनोपयोगिविद्युदालोकविरहित इत्यर्थः ।

(६७) खण्डिका रागविशेषः ।

खरखुर-दारिअ मेइणिओ वणगहणे अविअलु ।
परिसप्पइ पेच्छह लोणो णिअकज्जुज्जुअ कोलु ॥ (६८)(च)

अपि वनान्तरमल्पभुजान्तरा
श्रयति पर्वत ! पर्वसु सन्नता ।
इयमनङ्गपरिग्रहमङ्गला
पृथुनितम्ब ! नितम्बवती तव ? ॥ (६९)

कथं तूष्णीमिवास्ते ? शङ्के, विप्रकर्षात् न शृणोति ; भवतु, समीपमस्य गत्वा पृच्छामि । (७०)

[अनन्तरे चर्चरी]

फटिअ-सिलादल-णिम्मल-णिज्झरु !
बहुविअकुसुमे विरइअ सेअरु ! ।
किसर-महुरुग्गीअ मणोहरु !
देक्खावहि मह पिअदम महिअरु ! ॥ (छ]

(च) खरखुरदारितमेदिनीको वनगहनेऽविचलः ।
परिसर्पति पश्यत लीनो निजकार्य्योद्युक्तः कोलः ॥

(छ) स्फटिक शिलातल-निर्मलनिर्झर !
बहुविधकुसुमैविरचितशेखर ! ।
किन्नर-मधुरोद्गीत मनोहर !
दर्शय मम प्रियतमां महीधर ! ॥

---

(६८) खरखुर दारित इत्यादि । अत्र वराहरूपेण राज्ञो वर्णनम् ।

(६९) अपि वनान्तरमित्यादि । हे पृथुनितम्ब ! पर्वत ! अल्पं नातिप्रशस्तं भुजयोरन्तरं वक्षस्थलं यस्याः स्तनयोरतिपृथुलत्वादित्यर्थः । पर्वसु सन्धिस्थलेषु सन्नता तथा अनङ्गस्य कन्दर्पस्य परिग्रहः पत्नी तद्वत् मङ्गला सुलक्षणयुक्ता, नितम्बवती, पृथुनितम्बोपेता सा उर्वशी भवतो वनान्तरं अपि प्रश्ने श्रयति श्रयति किम् ? द्रुतविलम्बितं वृत्तम् ।

(७०) कथं तूष्णीमित्यादि । विप्रकर्षात् दूरत्वात् ।

[चर्चरिकया उपसृत्य अञ्जलिं बद्ध्वा।]

सर्वक्षितिभृतां नाथ ! दृष्टा सर्वाङ्गसुन्दरी।
रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया ? ॥

[तथैव प्रतिशब्दं शृणोति। आकर्ण्य सहर्षम्]

कथं ! यथाक्रमं दृष्टेत्याह ; भवतु, अवलोकयामि।

[दिशोऽवलोक्य सखेदम्]

कथं ममैवायं कन्दारान्तरविसर्पी प्रतिशब्दः ?। (७१)

[इति मूर्च्छति।। उत्थाय उपविश्य सविषादम्]

अहह ! श्रान्तोऽस्मि ; यावदस्या गिरिनद्यास्तीरे तरङ्गवातमासेविष्ये।

[द्विपदिकया परिक्रम्य अवलोक्य च]

इमां नवाम्बुकलुषां स्रोतोवहां पश्यता मया रतिरुपलभ्यते ; कुतः ?

तरङ्गभ्रूभङ्गा क्षुभित-विहगश्रेणि-रसना
विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम्।
यथा जिह्मं याति स्खलितमभिसन्धाय बहुशो,
नदीभावेनेयं ध्रुवमसहमाना परिणता ॥ (७२)

---

(७१) कथं ममैवायमित्यादि। कन्दरायाः गुहायाः अन्तरे विसर्पति गच्छति यः स कन्दरान्तरविसर्पी।

(७२) तरङ्गभ्रूभङ्गेत्यादि। तरङ्ग एव भ्रूभङ्गो यस्याः सा क्षुभितविहगश्रेणय एव रसना काञ्ची यस्याः सा तथा संरम्भेण सम्भ्रमेण शिथिलं स्खलितवस्त्रं वसनमिव फेनं विकर्षन्ती इयं नदी बहुशः स्खलितं यथा स्यात् तथा अभिसन्धाय मधुरास्फुटं किमपि किमपि व्याहृत्य जिह्मं वक्रं सलीलं यथा याति तथा ध्रुवं निश्चितमेव असहमाना कोपना सा उर्वशी नदीभावेन परिणता नदीत्वं प्राप्ता इति तर्कयामि। शिखरिणीवृत्तम्।

भवतु, प्रसादयामि तावदेनाम् ।

पसिअ, पिअदमए ! सुन्दरिए ! णए !
खुहिअ-करुण-विहङ्गमए णए ।
सुरसरितीर-समूसुअ-एणए
अलिउल-झङ्कारिए एणए ॥ (ज) (७३)

[अथ कुटिलिकान्तरे चर्चरी]

पुव्वदिसा-पवणाहअ-कल्लोलुग्गअ-बाहुओ,
मेहङ्गे णच्चइ सललिदं जलणिहि-णाहओ ।
हंस-रहङ्ग-सङ्ग-कुङ्कुम-किआभरणु,
करि-मअराउल-कसण-किमल-किआवरणु ।
वेला-सलिलुव्वेल्लिअ-हत्थदिसुतालु,
ओत्थरइ दसदिसी रुन्धेइ णवमेहआलु ॥ (७४) (झ)

(ज) प्रसीद, प्रियतमे ! सुन्दरिके ! नदि ! क्षुभित-करुण विहङ्गमके नत्या ।
सुरसरित्तीर समुत्सुकैणके, अलिकुल-झङ्कारिते एनया ॥

(झ) पूर्वदिक्पवनाहत कल्लोलोद्गत बाहुको,
मेघाङ्गैर्नृत्यति सललितं जलनिधिनाथकः ;
हंस रथाङ्ग सङ्ग कुङ्कुमकृताभरणः,
करिमकराकुल कृष्णकमल कृतावरणः ।
वेला-सलिलोद्वेल्लित-हस्तदत्ततालः,
अवस्तृणाति दशदिशो रुद्ध्वा नवमेघकालः ॥

---

(७३) प्रसीद प्रियतमे इत्यादि । उन्मादापहृतचित्तवृत्तिः राजर्षिः प्रियतमां नदीरूपेण परिणतामवधार्य पादपतनादिना, तत् प्रसादनात्परः चाटु करोति हे प्रियतमे ! सुन्दरिके नदि ! नदीभावापन्ने ! उर्वशि ! एनया नत्या अनेन पादपतनेन प्रसीद । मयि प्रसन्ना सती जलरूपं विहाय स्वरूपतो मत्समीपमागच्छ इत्यर्थः ।

[चर्चरिकया उपसृत्य जानुभ्यां स्थित्वा]

त्वयि निबद्धरती प्रियवादिनि
प्रणयभङ्ग-पराङ्मुख-चेतसि ।
कमपराधलवं मयि पश्यसि ?
त्यजसि मानिनि ! दासजनं यतः ॥ (७५)

कथं तूष्णीमेव आस्ते ? अथवा, परमार्थतः सरिदियं, न उर्वशी; अन्यथा, कथं पुरूरवसम् अपहाय समुद्राभिसारिणी भवेत् ? अनिर्वेदप्राप्याणि श्रेयांसि ; भवतु, तमेव उद्देशं गच्छामि, यत्र मे नयनयोः सा सुनयना तिरोहिता [परिक्रम्य अवलोक्य च ।] इमं तावत् प्रियाप्रवृत्तये सारङ्गमासीनम् अभ्यर्थये । (७६)

---

(७४) पूर्वदिगित्यादि । पूर्वदिक्पवनेन पूर्वदिगुत्थितेन वायुना आहतः कल्लोल एव उद्धतः बाहुः करो यस्य स एवम्भूतः जलनिधिनाथकः मेघाङ्गैः सह नृत्यति । जलनिधिनाथः किम्भूतः इत्याह हंसेत्यादि । हंसादिभिः कृतम् आभरणं येन सः ; करिभि र्हस्तिभिर्मकरैश्च आकुलं व्याप्तं कृष्णकमलं कृष्णजलमेव आवरणं यस्य सः करिमकराकुल कृष्णकमलकृतावरणः । वेलासलिलानां वेलासमीपवर्त्तिजलानां यत् उद्वेल्लितं उल्लुण्ठनं तदेव हस्तदत्तं तालं यस्य सः । नवमेघकाली नवजलधरसमयः दशदिशो रुद्ध्वा अवस्तृणाति आच्छादयति ।

(७५) त्वयि निबद्धरती त्वय्येव गाढ़ानुरक्ते । प्रियवादिनि कदापि परुषभाषणमकुर्वति । प्रणयभङ्गपराङ्मुखचेतसि, शठकामुकवत् कदापि नायिकान्तरासक्त्यादिना प्रणयच्छेदमकुर्वति मयि कं अपराधलवं दोषलेशमपि पश्यसि ; हे मानिनि ! यतो यस्मात् कारणात् दासजनं त्यजसि । द्रुतविलम्बितं वृत्तम् ।

(७६) कथं तूष्णीमेवास्ते इत्यादि । परमार्थतः याथार्थ्यतः । अनिर्वेदप्राप्याणि । अनिर्विण्णैः अखिन्नैरेव प्राप्याणि मया प्रियान्वेषणे खिन्नेन न भवितव्यं भवतु पुनरपि तदान्वेषणतत्परो भवामि इत्यर्थः ।

अभिनव-कुसुम-स्तवकित-तरुवरस्य परिसरे
मदकल-कोकिल-कूजित-मधुप-झङ्कार-मनोहरे।
नन्दनविपिने निजकरिणी-विरहानलेन सन्तप्तो
विचरति गजाधिपति रैरावतनामा॥

[गलितकः (७७)। जानुभ्यां स्थित्वा]

कृष्णसारच्छवियोऽयं दृश्यते काननश्रिया।
नवग्रस्यावलोकाय कटाक्ष इव पातितः॥

[विलोक्य]

अयमन्तिकमायान्तीं शिशुना स्तनपायिना।
अनन्यदृष्टिस्तामिव मृगीं रुद्धां निरीक्षते॥

[चर्चरी]

सुरसुन्दरी जहणभरालस पीणुत्तुङ्ग-घणत्थणी,
थिरजोव्वण तणुसरीरि हंसगइ।
गअणुज्जल-काणणे मिअलोअणि भमन्ते,
दिट्ठ, तुए ? तहविरह-समुद्दन्तरे उत्तरहि मम्॥ (अ)
[उपसृत्य अञ्जलिं बद्ध्वा]। हंहो हरिणीपते!

अपि दृष्टवानसि ? मम प्रियां वने,
कथयामि ते तदुपलक्षणं, शृणु।

(अ) सुरसुन्दरी जघनभरालसा पीनोत्तुङ्गघनस्तनी,
स्थिरयौवना तनुशरीरा हंसगतिः।
गगनोज्ज्वलकानने मृगलोचना भ्रमन्ती
दृष्टा त्वया ? तद्विरहसमुद्रान्तरादुत्तारय माम्॥

---

(७७) गलितकः नाट्यविशेषः।

पृथुलोचना सहचरी यथैव ते,

सुभगा तथैव खलु सापि वीच्यते ॥ *

[विलोक्य]।

कथमनादृत्य मद्वचनं कलत्राभिमुख' स्थितः ? सर्वथा उपपद्यते परिभवास्पदं विधिविपर्य्ययः। यावदन्यमवकाश-मवगाहिष्ये । (७८)

[परिक्रम्य अवलोक्य च]

हन्त ! दृष्टमुपलक्षणं तस्या मार्गस्य ।

रक्तकदम्बः सोऽयं प्रियया घर्मान्तशंसि यस्येदम् ।

कुसुममसमग्रकेशर-विषममपि कृतं शिखाभरणम् ॥ (७९)

[परिक्रम्यावलोक्य च]।

तत् किं नु खलु शिलाभेदगतं नितान्तरक्तमिदमव-लोक्यते ? (८०)

प्रभालेपी, नायं हरिहत-गजस्यामिषलवः ;

स्फुलिङ्गः स्यादग्नेर्गहनमभिवृष्ट' पुनरिदम् ।

---

* मञ्जुभाषिणीवृत्तम् ।

(७८) कथमनादृत्य मद्वचनमित्यादि । विधेर्विपर्य्ययः वैपरीत्यं परिभवस्य आस्पदं कारणम्। अन्यमवकाशमवगाहिष्ये प्रियाप्रवृत्तिलाभस्य उपायान्तर-मवलम्बिष्ये ।

(७९) सोऽयं रक्तकदम्बः यस्य इदं असमग्रकेशरविषममपि असम्यक् प्रस्फुटितमपि घर्मस्य ग्रीष्मस्य अन्तं शंसति यत् वर्षाकालप्रसिद्ध' कुसुमं प्रियया शिखाभरणं केशपाशालङ्करणं कृतम् । आर्य्यावृत्तम् ।

(८०) तत् किं नु खलु शिलाभेदगतमित्यादि । शिलाया भेदः शिला-दयान्तर्वर्त्ती: रन्ध्र इत्यर्थः । तद्गतं तत्स्थितम् ।

अये ! रक्ताशोकस्तवक-समरागो मणिरयं,
यमुद्धर्तुं पूषा व्यवसित इवालम्बितकरः ॥ (८१)
भवतु अदास्ये तावत् ।

[ग्रहणं नाटयति] ।

पणइणि-बद्धासाइअओ
वाहाउल णिअ णअणओ ।
गअवइ गहणे दुक्खिअओ
परिभमइ किलामिअ-वअणओ ॥ (८२) (ट)
[द्विपदिकया उपसृत्य गृहीत्वा आत्मगतम्) ।
मन्दारपुष्पैरधिवासितायां
यस्याः शिखायामय-सर्पणीयः ।

(ट) प्रणयिनी-बद्धाशार्दितको वाष्पाकुल निज नयनकः ।
गजपतिर्गहने दुःखितकः परिभ्रमति क्लान्त-वदनकः ॥

---

(८१) प्रभालेपीत्यादि। प्रभया लिम्पति व्याप्नोतीति प्रभालेपी प्रभा-पुञ्जपरिव्याप्त इत्यर्थः अयं हरिणा सिंहेन हतस्य गजस्य आमिषलवो मांसखण्डो न; अथवा अग्नि स्फुलिङ्गं स्यात् ? स्फुलिङ्गः किमिति प्रश्न इत्यर्थः। इदं गहनं वनं पुनः वनन्तु अभिवृष्टं सद्यो वृष्टिधारासिक्तं सुतरामव वह्निस्फुलिङ्गस्य असम्भव इत्यर्थः। निरूप्य अये आश्चर्यमित्यर्थः अयं रक्ताशोकस्तवकेन रक्ताशोक-कुसुमगुच्छेन समो रागो यस्य सः तथाभूतः मणिः य मणिमुद्धर्तुं भूमितो ग्रहीतुं पूषा सूर्य्यः अवलम्बितकरः सन् व्यवसित इव। ग्रहणाय कृतप्रयत्न इव इत्यर्थः। मणेस्तस्य सौरकरराशिवेष्टितत्वात् तद्ग्रहणाय सूर्य्यः प्रसारितकर इवेत्युत्प्रेक्षा। शिखरिणीवृत्तम् ।

(८२) प्रणयिनीबद्धेत्यादि। प्रणयिन्यां प्रियतमायां बद्धा लग्ना या आशा तया अर्दितः पीड़ितः ।

सैव प्रिया सम्प्रति दुर्लभा मे
मैवैनमस्रूपहतं करोमि ॥ *

[इति उत्सृजति] ।

[नेपथ्ये] वत्स ! गृह्यतां, वत्स ! गृह्यताम् ।

सङ्गमनीयो मणिरिह शैलसुता-चरण-रागयोनि-रयम् ।
आवहति धार्य्यमाणः सङ्गममाशु प्रियजनेन ॥ (८३)

राजा । [ऊर्द्ध्वमवलोक्य] । को माम् अनुशास्ति ? [विलोक्य] कथं भगवान् मृगराजधारी ? भगवन् ! अनुगृहीतोऽहम् अमुना उपदेशेन ।

[मणिमादाय] । हंहो सङ्गममणे !

त्वया विमुक्तस्य निमग्नमध्यया
भविष्यसि त्वं यदि सङ्गमाय मे ।
ततः करिष्यामि भवन्तमात्मनः
शिखामणिं बालमिवेन्दुमीश्वरः ॥ †

[परिक्रम्य अवलोक्य च] तत् किं खलु कुसुमरहितामपि लतामिमां पश्यता मया रतिरुपलभ्यते ? अथवा स्थाने मम मनो रमते ; इयं हि,

---

* इन्द्रवज्रावृत्तम् ।

† वंशस्थविलं वृत्तम् ।

---

(८३) अयं शैलसुता-चरणरागयोनिः गौरीपादपद्मरागसम्भूतः सङ्गमनीयस्तदाख्यमणिः धार्य्यमाणः अङ्गेषु परिहितः सन् आशु शीघ्रं सङ्गमं मीलनं आवहति जनयति । आर्य्यावृत्तम् ।

तन्वी मेघजलार्द्र-पल्लवतया धौताधरेवाश्रुभिः,
शून्येवाभरणैः स्वकाल-विरहाद्विश्रान्त-पुष्पोद्गमा ।
चिन्तामौनमिवास्थिता मधुलिहां शब्दैर्विना लक्ष्यते,
चण्डी मामवधूय पादपतितं याता प्रकुप्येव सा ॥ (८४)

यावदस्यां प्रियानुकारिण्यां लतायां परिष्वङ्गप्रणयी भवामि ।

लए ! पेक्ख विसहिअए भवामि,
जइ विहिजोए पुणु तहिं पाबिमि ।
ता रणेबि ण करेमि णिब्भन्तिं
पुणु णइ मेल्लइ ताह कअन्तीम् ॥ (८५) (ठ)

[इति चर्चरिकया उपसृत्य लतामालिङ्गति । ततस्तदीयस्थानमाक्रम्यैव प्रविष्टा उर्वशी]

(ठ) लते ! प्रेक्षस्व विन्नहृदयो भवामि,
यदि विधि-योगेन पुनस्त्वां प्राप्नोमि ।
तदारण्ये ऽपि न करोमि निर्भ्रान्तिं
पुनर्नहि प्रवेशयामि तां कृतान्ताम् ॥

---

(८४) तन्वी क्षीणा तथा मेघजलार्द्रपल्लवतया अश्रुभिर्धौताधरेव । स्वकालविरहात् वसन्तसमयाभावात् विश्रान्तो विरतः पुष्पोद्गमो यस्या अतएव आभरणैः शून्येव । तथा मधुलिहां भ्रमराणां शब्दैर्विना भ्रमरगुञ्जिताभावात् चिन्तामौनं आस्थिता तूष्णीं स्थिता इव अतएव प्रकुप्य पादपतितं माम् अवधूय अनादृत्य याता पलायिता चण्डी कोपना सा उर्वशी इव लक्ष्यते । शार्दूलविक्रीड़ितं वृत्तम् ।

(८५) विन्नहृदयो व्यथितान्तःकरणः । विधेः दैवस्य योगः घटनं तेन । अरण्ये वने निर्भ्रान्तिं भ्रमणं न करोमि । तथा कृतः अन्तो मत्प्राणानामिति भावः, यया तां कृतान्तां; मां मृतप्रायं कृतवतीम् इत्यर्थः । तां पुनरस्मिन् अरण्ये न प्रवेशयामि ।

राजा । [निमीलिताक्षः स्पर्शं नाटयित्वा] अये ! उर्वशीगात्रस्पर्शादिव निर्वृतं मे हृदयं । न पुनरस्ति विश्वासः । कुतः ?

समर्थये यत् प्रथमं प्रियां प्रति
क्षणेन तन्मे परिवर्त्ततेऽन्यथा ।
अतो विनिद्रे सहसा विलोचने
करोमि न स्पर्श-विभावित प्रियः ॥ (८६)

[शनैरुन्मील्य चक्षुषी] कथं सत्यमेव उर्वशी ? । [इति मूर्च्छितः पतति]

उर्व । समस्ससदु समस्ससदु महाराओ । (ड)

राजा । संज्ञां लब्ध्वा] प्रिये ! अद्य जीवितम् ।
त्वद्वियोगभवे चण्डि ! मया तमसि मज्जता ।
दिष्ट्या प्रत्युपलब्धासिं चेतनेव गतासुना ॥ (८७)

(ड) समाश्वसितु समाश्वसितु महाराजः ।

---

(८६) यत् किञ्चित् वस्तु प्रथममादौ प्रियां प्रति समर्थये प्रियापरिज्ञापकमिति कृत्वा निश्चिनोमि, तत् तद्वस्तु क्षणेन नातिचिरमेव अन्यथा अन्यरूपेण परिवर्त्तते । प्रियाव्यतिरिक्तं किमपि पदार्थान्तरमिति मे प्रतिभासते इत्यर्थः । अतोऽस्मात् कारणात् स्पर्शेन विभाविता अनुमिता प्रिया येन एवभूतोऽहं विलोचने नयने सहसा शीघ्रं विनिद्रे उन्मीलिते न करोमि । निमीलितनेत्र एव क्षणमात्रमपि स्पर्शसुखमनुभवामि इत्यर्थः । वंशस्थविलं वृत्तम् ।

(८७) चण्डि ! कोपने ! तद्वियोगभवे भवद्विरहजनिते तमसि मोहे निमज्जता, मोहावृतेन इत्यर्थः । दिष्ट्या भाग्येन गतासुना मृतेन चेतना इव जीवितमिव प्रत्युपलब्धासि मया सह मिलितासि । अनुष्टुप् वृत्तम् ।

उर्व। मरिसदु महाराओ, जं मए कोववसं गदाए अवत्थन्तरं पाविदो महाराओ। (ढ)

राजा। नाहं प्रसादयितव्यस्त्वया, त्वद्दर्शनेन प्रसन्नोऽस्मि सवाह्यान्तरात्मा; तत् कथय, कथमियन्तं कालं मया विरहिता स्थितासि ?

[अनन्तरे चर्चरी]

मोरा-परहुअ-हंस-रहङ्गं
अलि-गअ-पव्वअ-सरिअ-कुरङ्गम्।
तुज्झह कारण रस्स भमन्ते
को णहु पुच्छिअ मए रोअन्ते। (ण)

उर्व। एव्वं अन्तक्करण-पच्चक्खोकिद-वुत्तन्तो महाराओ। (त)

राजा। प्रिये! अन्तःकरणमिति न खलु अवगच्छामि।

उर्व। सुणादु महाराओ। पुरा भअवदा महासेणेण सास्सदं कुमारव्वदं गेह्णिअ, अअं सअलकलुसो णाम गन्धमादनकच्छो अज्झासिदो, किदा अ ट्थिदी। (८८) (थ)

(ढ) मर्षयतु महाराजो यत् मया कोपवशं गतया अवस्थान्तरं प्रापितो महाराजः।

(ण) मयूर-परभृत-हंस-रथाङ्गम्,
अलि-गज-पर्वत-सरित्-कुरङ्गम्।
तव कारणादरण्ये भ्रमता
को न खलु पृष्टो मया रुदता॥

(त) एवमन्तःकरण-प्रत्यक्षीकृतवृत्तान्तो महाराजः।

(थ) शृणोतु महाराजः, पुरा भगवता महासेनेन शाश्वतं कुमारव्रतं गृहीत्वा अयं सकलकलुषो नाम गन्धमादनकच्छोऽध्यासितः; कृता च स्थितिः।

(८८) सुणादु महाराओ इत्यादि। महासेनेन कार्त्तिकेयेन, शाश्वतं

राजा । कीदृशी ?

उर्व । जा किल इत्थिआ इमं पदेसं आगमिस्सदि सा लदाभाए परिणदरूआ भविस्सदि ; गोरीचरण-राअसम्भवं मणिं वज्जिअ अ लदाभाअं ण मुञ्चिस्सदित्ति । तदो अहं गुरुसाव-संमूढ़हिअआ विसुमरिद-देवदा-णिअमा कसआ जण-परिहरणीअं कुमारवणं पविट्टा ; पवेसाणन्तरंअ काण-णोबन्तवत्तिणा लदाभाएण परिणदं मे रूअम् । (द)

राजा । प्रिये ! सर्वमुपपन्नम् ।

रतिखेदसुप्तमपि मां शयने या मन्यसे प्रवासगतम् ।
सा त्वमिहैतदवस्थं कथं सहेथाश्चिरवियोगम् ? ॥ (८९)

इदञ्चैतत् यथा-कथितं सङ्गमनिमित्तं पुनरुपलब्धप्रभाव-मस्माभिः ।

(द) या किल स्त्री इमं प्रदेशमागमिष्यति सा लताभावे परिणतरूपा भविष्यति ; गौरीचरणरागसम्भवं मणिं वर्जयित्वा च लताभावं न मोच्यतीति । ततोऽहं गुरुशापसंमूढ़हृदया विस्मितदेवतानियमा, कन्यकाजनपरिहरणीयं कुमारवनं प्रविष्टा ; प्रवेशानन्तरञ्च काननोपान्तवर्त्तिना लताभावेन परिणतं मे रूपम् ।

कुमारव्रतं गृहीत्वा अवलम्बितचिरकौमार्य्य इत्यर्थः । गन्धमादनस्य तदाख्य-पर्वतस्य कच्छः प्रान्तदेशः । कृता च स्थितिः अयञ्च नियमः कृत इत्यर्थः ।

(८९) रतिखेदेत्यादि । या त्वं शयने शय्यायां रतिखेदात् सुरतक्रीड़ा-जनितपरिश्रमात् सुप्तमपि निद्रितमपि मां प्रवासगतं विदेशगतं मन्यसे । या त्वं निद्रावस्थायां त्वदालिङ्गनपाशादपसृतस्य परावृत्य शयानस्यापि मे विरह-दुःखमनुभवसि इत्यर्थः । सा त्वं इहास्मिन् विजने वने एतदवस्थं चिरवियोगं कथं सहेथाः । आर्य्यावृत्तम् ।

[इति मणिं दर्शयति]

उर्व । कधं अम्हो ! सङ्गमणीओ अअं मणी? अदो-ज्जेव महाराएण आलिङ्गिदोज्जेव पइदित्थम्हि संवुत्ता । (ध)

राजा । [ललाटे मणिं सन्निवेश्य]

स्फुरता विच्छुरितमिदं रागेण मणेर्ललाट-निहितस्य ।
श्रियमुद्वहति मुखं ते बालातप-रक्तकमलस्य ॥ *

उर्व । पिअंवद ! महन्तो क्खु कालो अम्हाणं पइट्ठाणदो निग्गदाणं; कदाइ असूइस्सन्ति पइदीओ; ता एहि गच्छम्ह । (९०) (न)

राजा । यदाह भवती । [इति उत्तिष्ठतः] ।

उर्व । अध, कधं उण महाराओ गन्तुं इच्छदि ? (प)

राजा । अचिरप्रभा-विलसितैः पताकिना
सुरकार्मुकाभिनव-चित्र-शोभिना ।
गमितेन खेलगमने ! विमानतां
नय मां नवेन वसतिं पयोमुचा ॥ (९१)

(ध) कथम् आश्चर्यम् सङ्गमनीयोऽयं मणिः ! अतएव महाराजेन आलिङ्गितैव प्रकृतिस्थास्मि संवृत्ता ? ।

(न) प्रियंवद ! महान् खलु काल आवयोः प्रतिष्ठानात् निर्गतयोः; कदाचित् असूयिष्यन्ति प्रकृतयः ; तदेहि गच्छावः ।

(प) अथ, कथं पुनर्महाराजो गन्तुमिच्छति ? ।

---

* आर्य्यावृत्तम् ।

(९०) प्रियं वद इत्यादि । प्रतिष्ठानान्निर्गतयोः राजधानीसन्निवेशात् प्रस्थितयोः । प्रकृतयः प्रजाः असूयिष्यन्ति क्रुद्धाः भविष्यन्ति ।

(९१) हे खेलगमने ! लीलाविलासान्वितगमने ! उर्वशि ! अचिरप्रभाणां

पाविअ-सहअरि-सङ्गओ पुलअ पसाहिअ अङ्गओ ।
सिच्छा-पत्त-विमाणओ विहरइ हंस-जुआणओ ॥ (फ)

[इति खण्डधारया निष्क्रान्तौ]

[चतुर्थोऽङ्कः समाप्तः ।]

अथ पञ्चमोऽङ्कः ।

[ततः प्रविशति हृष्टो विदूषकः] ।

विदू। हो हो भो भो ! दिट्ठिआ चिरस्स कालस्स उव्वसीसहाओ तत्थभवं राआ णन्दण-वण-प्पमुहेसुं पदेसेसुं विहरिअ पड़िणिउत्तो णअरं ; दाणिं सकज्जाणुसासणे पइदि-मण्डलं अणुरज्जअन्तो रज्जं करेदि । आं ! सन्ताणअं वज्जिअ ण से किम्पि सोअणीअं ; अज्ज तिधिविसेसो त्ति भअवदीणं गङ्गा-जउणाणं सलिलेसुं देईए सह किदाहिसेओ सम्पदं उअआरिअं पविट्ठो ; ता जाव अलङ्करणीअ-माणस्स अङ्गा-णुलेअण-मल्लभाई भादुओ होमि । (क)

(फ) प्राप्त-सहचरी-सङ्गकः पुलकप्रसाधिताङ्गकः ।
स्वेच्छा प्राप्तविमानको विहरति हंसयुवकः ॥

(क) हो हो (इत्याश्चर्ये) भो भो ! दिष्ट्या चिरस्य कालस्य उर्वशी-सहायस्तत्रभवान् राजा नन्दनवन प्रमुखेषु प्रदेशेषु विहृत्य प्रतिनिवृत्तो नगरम् ;

विद्युतां विलसितैः दीप्तिभिः पताकिना पताकान्वितवत्प्रतीयमानेन । सुर-कार्मुकमेव अभिनवं चित्रं तेन शोभते यस्तेन । मञ्जुभाषिणीवृत्तम् ।

[नेपथ्ये] हद्धी हद्धी ! एसो जलन्त-रत्त-तालवेन्तपिधाणं णिक्खिविअ णीअमाणो अच्छरा-विरहिदेण मउलिरअणदाए पओइदो मणी आमिससङ्किणा गिद्धेण आक्खित्तो। (ख) (१)

विदू। [आकर्ण्य] अच्चाहिदं, परम-बहुमदो क्खु सो वअस्सस्स सङ्गमणीओ णाम चूडामणी ; अदो क्खु असमत्तणेवच्छो ज्जेव तत्तभवं आसणादो ज्जेव उत्थिदो ; ता पासपलिवत्ती होमि। (ग)

[इति निष्क्रान्तः ; प्रवेशकः]। (२)

इदानीं स्वकार्य्यानुशासने प्रकृतिमण्डलमनुरञ्जयन् राज्यं करोति ; आं ! सन्तानकं वर्जयित्वा नास्य किमपि शोचनीयम् ; अद्य तिथि विशेष इति भगवत्योर्गङ्गायमुनयोः सलिलेषु देव्या सह कृताभिषेकः साम्प्रतमुपकारिकां प्रविष्टः ; तद् यावदलङ्क्रियमाणस्याङ्गानुलेपन माल्यभागी भाता भवामि।

(ख) हाधिक् हाधिक् ! एष ज्वलन्-रक्तातालवृन्त पिधानं निक्षिप्य नीयमानोऽप्सरी-विरहितेन मौलिरत्नतायां प्रयोजितो मणिः आमिषशङ्किना गृध्रेण आक्षिप्तः।

(ग) अत्याहितम्, परमबहुमतः खलु स वयस्यस्य सङ्गमनीयो नाम चूडामणिः ; अतः खलु असमाप्तनेपथ्य एव तत्रभवान् आसनादेव उत्थितः ; तत् पार्श्वपरिवर्त्ती भवामि।

---

(१) हद्धी ! इत्यादि। रक्तातालवृन्तपिधानं रक्तातालवृन्तरूपावरणं निक्षिप्य अपसार्य्य अप्सरसा उर्वश्या विरहितेन राज्ञा मौलिरत्नतायां नियोजितः चूडामणिः कृत इत्यर्थः।

(२) प्रवेशकः। तल्लक्षणं यथा दर्पणे। प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा।

[ततः प्रविशति राजा सूतः कञ्चुकि-रैचकौ परिजनश्च]।

राजा। रैचक! रैचक!।

आत्मनो बध-माहर्त्ता क्वासौ विहग-तस्करः ?।
येन तत्प्रथमं स्तेयं गोप्तुरेव गृहे कृतम्॥ (३)

किरातः। एसो अग्गमुह-लग्ग-हेमसूत्तेण मणिणा अणु-रञ्जअन्तो विअ आआसं परिब्भमदि। (घ)

राजा। पश्यामि एनम्।

असौ मुखालम्बित-हेमसूत्रं
बिभ्रन्मणिं मण्डल-शीघ्रचारः।
अलात-चक्र-प्रतिमं विहङ्ग-
स्तद्राग-लेखा-वलयं तनोति॥ (४)

कथय, किं खलु अत्र कर्त्तव्यम् ?।

विदू। भो! अलं एत्थ घिणाए; एसो अबराही सास-णीओ। (ङ)

(घ) एषोऽग्रमुख लग्न-हेमसूत्रेण मणिना अनुरञ्जयन्निव आकाशं परि-भ्रमति।

(ङ) भो! अलमत्र घृणया, एषोऽपराधी शासनीयः।

(३) बधम् आहर्त्ता वध्यः, विहगश्चासौ तस्करश्चेति विहगतस्करः। येन गोप्तुरेव गृहे तदेव प्रथमं स्तेयं चौर्य्यं कृतम्। अनुष्टुप् वृत्तम्।

(४) मुखे आलम्बितं हेमसूत्रं यस्य तं तथाभूतं मणिं बिभ्रत् धारयन् तथा मण्डलशीघ्रचारः मण्डलगत्या शीघ्रगामी असौ विहङ्गः अलातचक्र-प्रतिमं दग्धाङ्गारसमिजनितमण्डलमिव तस्य मणेः रागस्य या लेखा तस्या वलयं तनोति जनयति। उपजातिवृत्तम्।

राजा। सम्यगाह भवान्; धनुर्धनुस्तावत्।

परिजनः। जं भट्टा आणवेदि। (च)

[इति निष्क्रान्तः]।

राजा। न दृश्यते हि विहगाधमः।

विदू। इदो इदो दक्खिणन्तरेण चलिदो सउणह-दासो। (छ)

राजा। [दृष्ट्वा]। इदानीम्।

प्रभापल्लवितेनासौ करोति मणिना खगः।

अशोकस्तवकेनेव दिङ्मुखस्यावतंसकम्॥ (५)

यवनी। [धनुर्हस्ता प्रविश्य] भट्टा! एदं ससरं चावम्। (ज)

राजा। किम् इदानीं धनुषा; वाणपथातीतः क्रव्य-भोजनः।

तथाहि;

(च) यत् भर्त्ता आज्ञापयति।

(छ) इत इतो दक्षिणान्तरेण चलितः शकुनहताशः।

(ज) भर्त्तः! इदं सशरं चापम्।

---

(५) असौ खगः प्रभया पल्लवितेन सञ्जातपल्लवेन अशोकस्तवकेनेव तद्वत् प्रतीयमानेन इत्यर्थः। दिङ्मुखस्य अवतंसकं शिरोभूषणं करोति। अनुष्टुप् वृत्तम्।

आभाति मणिविशेषो दूरमिदानीं पतत्त्रिणा नीतः ।
नक्तमिव लोहिताङ्गः परुषघनच्छेद-संपृक्तः ॥ (६)

आर्य्य तालव्य !

कञ्चुकी । आज्ञापयतु देवः ।

राजा । मद्वचनादुच्यन्तां नागरिकाः ; सायं निवास-वृक्षाग्रे विचीयतां विहगाधमः ।

कञ्चु । यथा आज्ञापयति देवः । [इति निष्क्रान्तः] ।

विदू । भो ! विस्समीअदु भवं सम्पदं ; कहिं गदो मणिकुम्भीलओ भवदो सासणादो मुच्चिस्सदि ? (झ)

[इति उपविशतः] ।

राजा । वयस्य !

रत्नमिति न मे तस्मिन् मणौ प्रयासो विहङ्गमाच्छिन्ने ।
प्रियया तेनास्मि सखे ! सङ्गमनीयेन सङ्गमितः ॥

कञ्चुकी । [प्रविश्य] जयति जयति देवः ।

अनेन निर्भिन्नतनुः स बध्यो रोषेण ते मार्गणतां गतेन ।
प्राप्तापराधोचितमन्तरीक्षात् समौलिरत्नः पतितः पतत्त्री ॥ (७)

(झ) भो विश्राम्यतु भवान् साम्प्रतम् ; कुत्र गतो मणिकुम्भिलको भवतः शासनात् मोक्ष्यति ?

---

(६) आभाति मणिविशेष इत्यादि । इदानीं पतत्त्रिणा पक्षिणा दूरं नीतः मणिविशेषः परुषघनच्छेदसंयुक्तो गभीरमेघखण्डाच्छादितः लोहिताङ्गो मङ्गलग्रह इव आभाति दृश्यते । आर्य्यावृत्तम् ।

(७) मार्गणतां गतेन बाणत्वं प्राप्तेन तव अनेन रोषेण निर्भिन्न-

[सर्वे विस्मयं रूपयन्ति]।

कञ्चु। अभिप्रक्षालितोऽयं मणिः कस्मै प्रदीयताम् ?।

राजा। रैवतक ! गच्छ ; कोषपेटके स्थापयैनम्।

किरातः। जं भट्टा आणवेदि। (ञ)

[इति मणिमादाय निष्क्रान्तः]।

राजा। [तालव्यं प्रति] आर्य्य ! जानाति भवान् कस्य अयं वाण इति ?

कञ्चु। नामाङ्कितो दृश्यते ; नात्र मे वर्णविभावनक्षमा दृष्टिः।

राजा। तदुपश्लेषय शरं यावत् निरूपयामि।

विदू। किं भवं विआरेदि ?। (ट)

राजा। शृणु तावत् प्रहर्त्तुर्नामाक्षराणि।

विदू। अवहिदो म्हि। (ठ)

राजा। वाचयति।

(ञ) यद्भर्त्ता आज्ञापयति।

(ट) किं भवान् विचारयति ?

(ठ) अवहितोऽस्मि।

तनुर्विदारितशरीरः बध्यः स पक्षी प्राप्तापराधोचितं यथा स्यात् तथा चौर्य्यापराधसदृशदण्डभागी सन्नित्यर्थः। अन्तरीक्षात् समीक्षिरवः पतितः। उपजातिवृत्तम्।

उर्वशी-सम्भवस्याय-मैलसूनोर्धनुष्मतः।

कुमारस्यायुषो बाणः संहर्त्ता द्विषदायुषाम्॥ (८)

विदू। दिट्ठिआ सन्ताणेण वड्ढदि भवम्। (ड)

राजा। कथमेतत्? सखे! अन्यत्र नैमिषेयसत्रादवियुक्तोऽहमुर्वश्या; न कदाचिदपि तत्रभवती गर्भाविर्भूतदोहदा अपि उपलक्षिता; कुतएव प्रसूतिः? किन्तु,

आनील-चूचुकाग्रं लवलीफल-पाण्डुराननच्छायम्।

कतिचिदहानि शरीरं स्रग्रवलयमिवाभवत्तस्याः॥ * (९)

विदू। मा भवं माणुसीधम्मं उव्वसीए सम्भावेदु; पभावगूढ़ाइं देवचरिदाइम्। (ढ)

राजा। अस्तु तावदेवं; यथाह भवान्। पुत्रसंवरणे किमिव कारणं तस्याः?

(ड) दिष्ट्या सन्तानेन वर्द्धते भवान्।

(ढ) मा भवान् मानुषीधर्मम् उर्वश्याः सम्भावयतु। प्रभावगूढ़ानि देवचरितानि।

---

(८) अयं कुमारस्य युवराजस्य आयुषो बाणः आयुषः किम्भूतस्य उर्वशीसम्भवस्य उर्वशीगर्भजातस्य। ऐलसूनोः इलानाम्नी बुधेन परिगृहीता मनोः कन्या तस्या अपत्यं पुमान् ऐलः पुरुरवाः तस्य सूनोः पुत्रस्य। तथा धनुष्मतः प्रशस्तधनुर्धारिणः बाणः किम्भूतः द्विषदां शत्रूणां आयुषां संहर्त्ता। अनुष्टुप् वृत्तम्।

(९) * आर्य्यावृत्तम्।

विदू। मा वुड्ढं मं राआ परिहरिस्सदित्ति। (ण)

राजा। कृतं परिहासेन ; चिन्त्यताम्।

विदू। को देव्व रहस्साइं चिन्तिस्सदि ?

कञ्चुकी। [प्रविश्य] जयति जयति देवः, एषा खलु च्यवनाश्रमात् भार्गवी कुमारमादाय आयाता तापसी देवं द्रष्टुमिच्छति।

राजा। उभयमपि अविलम्बं प्रवेशय।

कञ्चुकी। तथा [इति निर्गम्य तापसीसहितं कुमारमादाय प्रविष्टः]।

विदू। णं क्खु एसो खत्तिअ-कुमारो ; जस्स णामाङ्किदो गिद्धलक्खवेहो णाराओ उअलद्धो। तधा हि भवदो बहु अणुकरेदि। (त)

राजा। एवमेतत्।

वाष्पायते निपतिता मम दृष्टिरस्मिन्,
वात्सल्यबन्धि हृदयं, मनसः प्रसादः।
सञ्जात-वेपथुभि-रुज्झित धैर्य्यवृत्त-
मिच्छामि चैन-मदयं परिरब्धुमङ्गैः॥ (१०)

(ण) मा वृद्धां मां राजा परिहरिष्यतीति।

(त) ननु खलु एष क्षत्रियकुमारः ; यस्य नामाङ्कितो गृध्रलक्ष्यवेधी नाराच उपलब्धः ; तथाहि भवतो बहु अनुकरोति।

---

(१०) मम दृष्टिरस्मिन् बालके निपतिता सती वाष्पायते घनवाष्पोदयेन आकुलीभवति। हृदयं चेतः वात्सल्यं वध्नातीति वात्सल्यबन्धि

कञ्चुकी । एवं स्थीयताम् । [तापसीकुमारौ यथोचितं स्थितौ] ।

राजा । [उपसृत्य] भगवति ! अभिवादये ।

ताप । महाराअ ! सोमवंसं धारअन्तो होहि । [आत्मगतम्] भो ! इमिणा अकधिदोबि विस्सादोज्जेव इमस्स राएसिणो अत्तणो ओरसो सम्बन्धो । [प्रकाशम्] । जाद ! पणम गुरुम् । (थ)

[कुमारी वाष्पगर्भ-मञ्जलिं बद्धा प्रणमति] ।

राजा । वत्स ! आयुष्मान् भव ।

कुमा । [स्पर्शं रूपयित्वा स्वगतम्] ।

यदि हार्दमिदं श्रुत्वा पिता ममायं, सुतोऽहमस्येति ।
उत्सङ्गे वृद्धानां गुरुषु भवेत् कीदृशः स्नेहः ? ॥ (११)

राजा । भगवति ! किम् आगमन-प्रयोजनम् ?

ताप । सुणादु महाराओ ; एसो दीहाऊ उव्वसीए जादमेत्तो ज्जेव किम्पि णिमित्तं पेक्खिअ मम हत्थे सासी-

---

(थ) महाराज ! सोमवंशं धारयन् भव । भो ! अनेन अकथितोऽपि विज्ञात एवास्य राजर्षेरात्मन औरसः सम्बन्धः । जात ! प्रणम गुरुम् ।

मनसः प्रसादः तथा अहं उज्झितं त्यक्तं धैर्यं वृत्तञ्च यस्मिन् कर्मणि तद्यथा स्यात् तथा एनं अदयं निर्दयं सञ्जातवेपथुभिः कम्पमानैः अङ्गैः परिरब्धुं आलिङ्गितुमिच्छामि । वसन्ततिलकं वृत्तम् ।

(११) यदि हार्दमिदमित्यादि । अयं मम पिता, अहमस्य सुतः । आर्य्यावृत्तम् ।

किदो ; जधा खत्तिअस्स कुलीणअस्स जादकम्मादिविधाणं, तं से तत्थभवदा चवणेण सव्वं अणुट्ठिदं ; दाणिं गहिदविज्जो धणुव्वेए अ विणीदो। (द)

राजा। सनाथ: खलु संवृत्त: ।

ताप। अज्ज पुप्फ-फल-समित्-कुस-णिमित्तं इसिकुमार-एहिं सह गदेण इमिणा अस्समवास-विरुद्धं समाअरिदं। (ध)

विदू। कधं विअ ? (न)

ताप। गहिदामिसो किल गिद्धो अस्सम-पादवसिहरे णिलीअमाणो लक्खीकिदो वाणस्स। (प)

राजा। तत स्तत: ?।

ताप। तदो उअलद्ध-वुत्तन्तेण भअवदा अहं समादिट्ठा ; णिय्यादेहि एदं उव्वसीहत्थे णासं त्ति ; ता इच्छामि उव्वसीं पेक्खिदुं। (फ)

राजा। आसनमनुगृह्णातु भवती।

(द) शृणोतु महाराज: एष दीर्घायुरुर्वश्या जातमात्र एव, किमपि निमित्तं प्रेक्ष्य, मम हस्ते न्यासीकृत: ; यथा क्षत्त्रियस्य कुलीनकस्य जातकर्मादि-विधानं, तदस्य तत्रभवता च्यवनेन सर्वमनुष्ठितम्। इदानीं गृहीतविद्यो धनुर्वेदे च विनीत:।

(ध) अद्य पुष्प-फल-समित् कुश-निमित्तम् ऋषिकुमारकै: सह गतेन अनेन आश्रमवासविरुद्धं समाचरितम्।

(न) कथमिव ?।

(प) गृहीतामिष: किल गृध्र: आश्रम पादपशिखरे निलीयमानो लक्ष्यी-कृतो वाणस्य।

(फ) तत उपलब्ध-वृत्तान्तेन भगवता अहं समादिष्टा, निर्यादयैतम् उर्वशीहस्ते न्यासमिति ; तदिच्छामि उर्वशीं प्रेक्षितुम्।

[तापसी प्रेष्योपनीते आसने उपविष्टा] ।

आर्य्य तालव्य ! उर्वशी उच्यताम् ।

कञ्चु । तथा । [इति निष्क्रान्तः] ।

राजा । एह्येहि वत्स !

सर्वाङ्गीनः स्पर्शः सुतस्य किल ; तेन मामुपनतेन ।
प्रह्लादयस्व तावच्चन्द्रकरश्चन्द्रकान्तमिव ॥ (१२)

ताप । जाद ! णन्देहि पिदरं । (ब)

[कुमारो राजानमुपसर्पति] ।

राजा । [आलिङ्ग्य] । वत्स ! प्रियसखं ब्राह्मणमविशङ्कितो वन्दस्व ।

विदू । किंत्ति मे सङ्कदि ? अस्सम-वास-परिचिदा ण किं एदस्स साहामिआ । (भ)

कुमा । [सस्मितम्] तात ! वन्दे ।

विदू । सोत्थि भोदु दे, वड्ढदु भवम् । (म)

[ततः प्रविशति उर्वशी कञ्चुकी च] ।

कञ्चु । इत इतो भवती ।

(ब) जात ! नन्दय पितरम् ।

(भ) किमिति मां शङ्कते ? आश्रम वास परिचिता न किम् एतस्य शाखामृगाः ।

(म) स्वस्ति भवतु ते, वर्द्धतां भवान् ।

---

(१२) सुतस्य तनयस्य स्पर्शः सर्वाङ्गीनः किल । सर्वाङ्गव्यापी इत्यर्थः । उपनतेन तेन स्पर्शेन चन्द्रकरश्चन्द्रकान्तमिव मां प्रह्लादयस्व मामानन्दितं कुरु इत्यर्थः । आर्य्यावृत्तम् ।

उर्वशी। [प्रविश्य अवलोक्य च]। को णु क्खु एसो कणअवीठोवविट्ठो, महाराएण सञ्जमीअमाण-सिहण्डओ चिठ्ठदि? [तापसीं दृष्ट्वा]। अम्हहे! सच्चवदीसहिदो पुत्तओ मे आऊ? महन्तो क्खु संवुत्तो। (१३) (य)

राजा। [विलोक्य] वत्स!

इयं ते जननी प्राप्ता, त्वदालोकनतत्परा।
स्नेह-प्रस्नव-निर्भिन्नमुद्वहन्ती स्तनांशुकम्॥ (१४)

ताप। जाद! एहि, पच्चुवगच्छ मादरम्। (र)

[इति कुमारेण सह उर्वशीमुपसर्पति]।

उर्व। अज्जे! पादवन्दणं करेमि। (ल)

ताप। वच्छे! भत्तुणो बहुमदा होहि। (व)

कुमा। आर्य्ये! अभिवादये।

(य) को नु खलु एष कनकपीठोपविष्टो महाराजेन संयम्यमानशिखण्डकस्तिष्ठति? अहो! सत्यवतीसहितः पुत्रको मे आयुः?। महान् खलु संवृत्तः।

(र) जात! एहि प्रत्युपगच्छ मातरम्।

(ल) आर्य्ये! पादवन्दनं करोमि।

(व) वत्से! भर्त्तुर्बहुमता भव।

---

(१३) महाराजेन संयम्यमानशिखण्डकः महाराजेन पुनः संस्थाप्यमानमौलिः स्थित इत्यर्थः।

(१४) वत्स! इयं त्वदालोकनतत्परा ते जननी उर्वशी स्नेहात् यः प्रस्नवः दुग्धक्षरणं तेन निर्भिन्नं स्तनांशुकमुद्वहन्ती धारयन्ती सती प्राप्ता।

उर्वं। वच्छ ! पिदरं आराधअन्तो होहि। (अ)

[राजानं प्रति]। जअदु जअदु महाराओ। (ष)

राजा। स्वागतं पुत्रवत्यै ; इत आस्यताम्।

उर्वं। अज्जा ! उअविसध। (स)

[सर्वे तथेति उपविष्टाः]।

ताप। वच्छे ! गहिदविज्जो संपअं आउध-कवअ-हरो संवुत्तो एसो, भत्तुणो दे समक्खं निप्पादिदो मए तुह हत्थे निक्खेबो ; ता विसज्जिदुं अत्ताणं इच्छामि ; उअरुज्झदि मे अस्सम-वास-धम्मो। (१५) (ह)

उर्वं। कामं चिरस्स पेक्खिअ विरहुक्कण्ठिदम्हि ; ण उण धम्मावरोहे वट्टिदुं, गच्छदु अज्जा पुणोबि दंसणस्स। (च)

(अ) वत्स ! पितरमाराधयन् भव।

(ष) जयति जयति महाराजः।

(स) आर्य्या ! उपविशत।

(ह) वत्से ! गृहीतविद्यः साम्प्रतम् आयुधकवचधरः संवृत्त एषः, भर्त्तुस्ते समक्षं निष्पादितो मया तव हस्ते निक्षेपः ; तद्विसर्जित-मात्मानमिच्छामि, उपरुध्यते मे आश्रमवासधर्मः।

(च) कामं चिरस्य प्रेक्ष्य विरहोत्कण्ठितास्मि ; न पुनर्धर्मावरोधे वर्त्तितुं, गच्छतु आर्य्या पुनरपि दर्शनाय।

---

(१५) आत्मानं विसर्जितुमिच्छामि। भवदनुज्ञया पुनः वनं गन्तुमिच्छामि। आश्रमवासधर्मं उपरुध्यते बहुकालं राजधानीवासात् आश्रमवासधर्मस्य व्याघातो भवति इत्यर्थः।

राजा। आर्य्ये! तत्रभवते च्यवनाय मम प्रणाममावेदयिष्यसि।

ताप। एव्वं भोदु।

कुमा। आर्य्ये! सत्यमेव निवर्त्तनं? इतो मामपि नेतुमर्हसि।

राजा। चरितं त्वया पूर्वस्मिन्नाश्रमपदे, द्वितीयमपि अध्यासितुं समयः। (१६)

ताप। जाद! गुरुणो वअणं अणुचिट्ठ। (क)

कुमा। तेन हि।

य: सुप्तवान् मदङ्के शिखण्ड-कण्डूयनोपलब्ध-सुखः।
तं जातकलापं प्रेषय शितिकण्ठकं शिखिनम्॥

ताप। एव्वं करेमि।

उर्व। भअवदि! पादवन्दणं करेमि। (ख)

राजा। भवति! प्रणमामि।

ताप। सोत्थि सव्वाणं। (ग)

[इति निष्क्रान्ता]।

राजा। सुन्दरि!

(क) जात! गुरोर्वचनमनुतिष्ट।

(ख) भगवति! पादावन्दनं करोमि।

(ग) स्वस्ति सर्वेषाम्।

---

(१६) त्वया पूर्वस्मिन् आश्रमपदे चरितं त्वया ब्रह्मचर्य्याश्रमवासः कृत इत्यर्थः। इदानीं द्वितीयाश्रमवाससमयः गार्हस्थ्याश्रमप्रवेशावसरः संवृत्त इत्यर्थः।

अद्याहं पुत्रिणामग्र्यः सुपुत्रेण तवामुना ।
पौलोमीसम्भवेनेव जयन्तेन पुरन्दरः ॥

[उर्वशी स्मृत्वा रोदिति]।

विदू। भो! किंणु क्खु सम्पदं तत्थभोदी अस्सुमुही संवुत्ता ? (घ)

राजा। किं सुन्दरि! प्ररुदितासि ममोपनीते
वंशस्थितेरधिगमात् स्फुरति प्रमोदे।
पीनस्तनोपरि निपातिभिरर्पयन्ती
मुक्तावली-विरचनं पुनरुक्तमस्रैः॥ (१७)

उर्व। सुणादु महाराओ; पढुमं पुत्त-दंसन-समुत्थिदेण आनन्देण विसुमरिदम्हि; दाणिं महेन्द-संकित्तणेण स अवधी मम हिअएण सुमरिदो। (ङ)

राजा। कथ्यताम्।

(घ) भोः! किं नु खलु साम्प्रतं तत्रभवती अश्रुमुखी संवृत्ता ?।

(ङ) शृणोतु महाराजः; प्रथमं पुत्रदर्शनसमुत्थितेन आनन्देन विस्मृतास्मि; इदानीं महेन्द्रसंकीर्त्तनेन सोऽवधिर्मम हृदयेन स्मृतः।

---

(१७) हे सुन्दरि! वंशस्य स्थितिः रक्षा यस्मिन् तस्य पुत्रस्य अधिगमात् पुत्रेण सह मेलनात् मम उपनीते प्रमोदे स्फुरति वर्द्धमाने पीनस्तनोपरि निपातिभिः अस्रैर्नेत्रजलैः पुनरुक्तं यथा स्यात् तथा मुक्तावलीविरचनम् अर्पयन्ती मुक्ताफलसदृशानि अश्रूणि पातयन्ती इत्यर्थः। किं प्ररुदितासि। पुत्रसमागमजनिते आनन्दावसरे किं शोकस्य कारणम् इत्यर्थः। वसन्ततिलकं वृत्तम्।

उर्व। सुणादु महाराओ; पुरा महाराअ-गहिद-हिअआ गुरुसाव-संमूढ़ा, महेन्देण अवधिं कदुअ, अब्भणु-ण्णादा। (च)

राजा। कथय; किमिति ?।

उर्व। जदो सो मम पिअसहो राएसी तइ समुप्पण्णस्स पुत्तअस्स मुहं पेक्खदि, तदो मम समीवं तए आअन्तव्वं त्ति। तदो मए महाराअ-विओअ-भीरुदाए चिरआल-सङ्गम-णिमित्तं भअवदो चवणस्स अस्समपदे पुत्तओ अज्जाए सच्चवदीए हत्थे अप्पणा णिक्खित्तो; अज्ज उण पिदुणो आरा-हण-समत्थो संवुत्तो त्ति काउण निप्पादिदो एसो दीहाऊ। एत्तिको मे महाराएण सह संवासो। (छ)

[सर्वे विषादं नाटयन्ति। राजा मोहमुपगच्छति]

सर्वे। आः! समस्ससदु समस्ससदु महाराओ। (ज)

कञ्चु। समाश्वसितु महाराजः।

विदू। अब्बम्हणं अब्बम्हणम्। (झ)

राजा। [समाश्वस्य] अहो! सुखप्रतिबन्धिता दैवस्य।

(च) शृणोतु महाराजः; पुरा महाराजगृहीतहृदया गुरुशापसंमूढ़ा महेन्द्रेण अवधिं कृत्वा अभ्यनुज्ञाता।

(छ) यदा स मम प्रियसखो राजर्षिस्त्वयि समुत्पन्नस्य पुत्रकस्य मुखं प्रेक्षते, तदा मम समीपं त्वया आगन्तव्यमिति। ततो मया महाराजवियोग-भीरुतया चिरकाल-सङ्गम-निमित्तं भगवतश्च्यवनस्याश्रमपदे पुत्रक आर्य्यायाः सत्यवत्या हस्ते आत्मना निक्षिप्तः; अद्य पुनः, पितुराराधन-समर्थः संवृत्त इति कृत्वा निष्पादित एव दीर्घायुः। एतावानेव मे महाराजेन सह संवासः।

(ज) समाश्वसितु समाश्वसितु महाराजः।

(झ) अब्रह्मण्यं अब्रह्मण्यम्।

आश्वासितस्य मम नाम सुतोपलब्ध्या
सद्यस्त्वया सह कृशोदरि ! विप्रयोगः ।
व्यावर्त्तितातपरुजः प्रथमाभ्रवृष्ट्या
वृक्षस्य वैद्युत इवाग्निरुपस्थितोऽयम् ॥ *

विदू। अअं सो अत्थो अणत्थाणुबन्धओ त्ति तक्केमि अत्थभवं देवराओ सअं अणुग्गाहइदव्वो। (ञ)

उर्व। हा हदम्हि मन्दभाइणी ; किद-विणअस्स तणअस्स लम्भाणन्तरं सग्गारोहणेण अवसिद-कज्जां विप्पओअ-मुहीं मं महाराओ समत्थइस्सदि। (ट)

राजा सुन्दरि ! मा मैवम् ।

न हि सुलभ-वियोगा कर्त्तुमात्मप्रियाणि
प्रभवति परवत्ता ; शासने तिष्ठ भर्त्तुः ।
अहमपि तव सूनावद्य विन्यस्य राज्यं
विचरित-मृगयूथान्याश्रयिष्ये वनानि ॥ (१८)

(ञ) अयं सोऽर्थोऽनर्थानुबन्धक इति तर्कयामि अत्रभवान् देवराजः स्वयमनुग्राहयितव्यः ।

(ट) हा हतास्मि मन्दभागिनी, कृतविनयस्य तनयस्य लम्भानन्तरं स्वर्गारोहणेनावसितकार्य्यां विप्रयोगमुखीं मां महाराजः समर्थयिष्यति ।

---

* वसन्ततिलकं वृत्तम् ।

(१८) सुलभो वियोगो विरहो यस्यां सा सुलभ-वियोगा परवत्ता पराधीनता आत्मप्रियाणि आत्मनः अभिलषितानि कर्त्तुं न प्रभवति । भर्त्तुः शासने तिष्ठ । अहमपि अद्य तव सूनौ तव पुत्रे राज्यभारं विन्यस्य विचरित-मृगयूथानि वनानि आश्रयिष्ये । वनेषु गमिष्यामि इत्यर्थः । मालिनीवृत्तम् ।

कुमारः। नार्हति तातो महोच्च-धारितायां धुरि दस्यं नियोजयितुम्।

राजा। अपि वत्स! मा मैवम्।

शमयति गजानन्यान् गन्धद्विपः कलभोऽसि सन्;
प्रभवतितरां वेगोदग्रं भुजङ्गशिशो-र्विषम्।
भुव-मधिपति र्बालावस्थोऽप्यलं परिरक्षितुम्;
न खलु वयसा, जात्यैवायं स्वकार्य्य-सहो गुणः॥ (१९)

आर्य्य तालव्य!

कञ्चु। आज्ञापयतु देवः।

राजा। मद्वचनादमात्यपर्वतं ब्रूहि, सम्भ्रियताम् आयुष्मतो राज्याभिषेकः।

[कञ्चुकी दुःखेन निष्क्रान्तः। सर्वे दृष्टिविघातं रूपयन्ति]

राजा। [आकाशमवलोक्य] कुतो नु खलु, भोः विद्युत्-सम्पातः?।

[निपुणमवलोक्य]

अये! भगवान् नारदः।

गोरोचना-निकष पिङ्ग-जटाकलापः
संलक्ष्यते शशिकलामल-वीतसूत्रः।

---

(१९) शमयति गजानन्यानित्यादि। गन्धद्विपः कलभोऽपि सन् शिशु-रपि सन् अन्यान् गजान् शमयति निवारयति; तथा भुजङ्गशिशोः सर्पशिशोर्विषम् वेगोदग्रं सत् प्रभवतितरां अधिपतिः राजा बालावस्थोऽपि सन् भुवं पृथिवीं परिरक्षितुं शासितुमलं समर्थः। अयं स्वकार्य्यसहः स्वकार्य्यसाधन-समर्थो गुणः न वयसा न वयोवृद्धिजनितः परन्तु जात्यैव। हरिणीवृत्तम्।

मुक्तागुणातिशय-संभृत-मण्डनश्री-
हैंम-प्ररोह इव जङ्गम-कल्पवृक्षः ॥ (२०)

अर्घोऽर्घस्तावत् ।

उर्व । इदं भअवदो अग्घं । (ठ)

नारदः । [प्रविश्य] । विजयतां विजयतां मध्यम-लोकपालः ।

राजा । भगवन् ! अभिवादये ।

उर्व । पणमामि । (ड)

नारदः । अविरहितौ दम्पती भूयास्ताम् ।

राजा । [जनान्तिकम्] अपि नामैवं स्यात् ? [प्रकाशम्] । और्वशेयः पुत्रो वः प्रणमति ।

नारदः । आयुष्मान् आस्तामयम् ।

राजा । अयं विष्टरो गृह्यताम् ।

[सर्वे उपविशन्ति]

राजा । [सविनयम्] भगवन् ! किमागमनप्रयोजनम् ?

(ठ) इदं भगवतोऽर्घ्यम् ।
(ड) प्रणमामि ।

---

(२०) गोरोचनानिकषस्य निकषोपरि पतितरेखावत् पिङ्गः कपिशो जटाकलापो यस्य स । तथा शशिकलावदमलं शुभ्रं वीतसूत्रं यज्ञोपवीतं यस्य स । तथा मुक्तागुणैः मुक्ताहारैः अतिशयं सम्भृता अत्यर्थं वर्द्धिता मण्डनश्रीर्यस्य अतएव हैमप्ररोहः सञ्जातस्वर्णाङ्कुरः जङ्गमः गमनशीलः कल्पवृक्ष इव । नारद इति भावः । वसन्ततिलकं वृत्तम् ।

नारदः। राजन्! श्रूयतां महेन्द्रसन्देशः।

राजा। अवहितोऽस्मि।

नारदः। प्रभावदर्शी मघवा वनगमनाय कृतबुद्धिं भवन्त-मनुशास्ति।

राजा। किमाज्ञापयति?

नारदः। त्रिकालदर्शिभिः आदिष्टः, सुरासुर-विमर्दो भावी; भवांश्च सांयुगीनः सहायः; तेन न त्वया शस्त्र-न्यासः कर्त्तव्यः; इयञ्च उर्वशी यावदायुषस्ते सहधर्मचारिणी भवतु। (२१)

उर्व। अम्हे! सल्लं विअ हिअआदो अवणीदं। (ढ)

राजा। परमनुगृहीतोऽस्मि परमेश्वरेण।

नारदः। युक्तम्।

तव कार्य्यमसौ कुर्य्यात्, त्वञ्च तस्येष्टकार्य्यकृत्।
सूर्य्यः संवर्द्धयत्यग्नि मग्निः सूर्य्यं स्वतेजसा॥

[आकाशमवलोक्य] रम्भे! उपनीयतां मन्त्रेण सम्भृतः कुमारस्याभिषेकः।

रम्भा। [प्रविश्य] अअं से अहिसेअ-सम्भारो। (ण)

नारदः। उपविश्यता-मय-मायुष्मान् भद्रपीठे।

(ढ) आश्चर्य्यं, शल्यमिव हृदयादपनीतम्।

(ण) अयमस्याभिषेक सम्भारः।

---

(२१) त्रिकालदर्शिभिरित्यादि। सुराणां देवानामसुराणां दैत्यानाञ्च विमर्दः संग्रामः। सांयुगीनः संयुगे युद्धे साधुः समरकुशलः।

[रम्भा कुमारं भद्रपीठे उपवेशयति]

नारदः । [कुमारस्य शिरसि कलसमावर्ज्य] । रम्भे ! निर्वर्त्त्यतामस्य शेषो विधिः ।

रम्भा । [यथोक्तं निर्वर्त्त्य] वच्छ ! पणम भअवदं पिदरो अ । (त)

[कुमारः सर्वान् प्रणमति]

नारदः । स्वस्ति भवते ।

राजा । वंशवर्द्धनो भव ।

उर्वशी । पिदुणो दे वअणाणि होन्तु । (थ)

[नेपथ्ये वैतालिकद्वयम्]

प्रथमः । विजयतां विजयतां युवराजः ।

अमरमुनि रिवात्रिः स्रष्टु, रत्रेरिवेन्दु-
र्बुध इव शिशिरांशोर्बुधस्येव देवः ।
तव पितुरनुरूपस्त्वं गुणैर्लोककान्तै-
रतिशयिनि समाप्ता वंश एवाशिषस्ते ॥ *

द्वितीयः । तव पितरि पुरस्तादुद्भावा स्थितेयं
स्थितिमति च विभक्ता त्वय्यनाकल्पधैर्य्ये ।
अधिकतरमिदानीं राजते राजलक्ष्मी-
र्हिमवति जलधौ च प्राप्ततोयेव गङ्गा ॥ (२२)

(त) वत्स ! प्रणम भगवन्तं पितरौ च ।
(थ) पितुस्ते वचनानि भवन्तु ।

---

* मालिनीवृत्तम् ।

(२२) पुरस्तात् पूर्वं तव पितरि बद्धभावा जातानुरागा सती स्थिता इयं

रम्भा। दिट्ठिआ सही पुत्तअस्स जुअराअ-सिरीं पेक्खिअ भत्तुणो विरहे ण वट्टदि। (द)

उर्व। साहारणो ज्जेव णो अब्भुदओ।

[कुमारं हस्ते गृहीत्वा]

जाद! जेट्ठमादरं वन्देहि। (ध)

राजा। तिष्ठ; सममेव तत्रभवत्याः समीपं यास्यामस्तावत्।

नारदः। आयुषो यौवराज्यश्रीः स्मारयत्यात्मजस्य ते।
अभियुक्तं महासेनं सैनापत्ये मरुत्वता॥

राजा। अनुगृहीतोऽस्मि मघवता।

नारदः। भो राजन्! किं ते भूयः प्रियं करोतु पाकशासनः?।

राजा। अतःपरमपि प्रियमस्ति यदि, भगवान् पाकशासनः प्रसादं करोतु ततः।

(द) दिष्ट्या सखी पुत्रकस्य युवराजश्रियं प्रेक्ष्य भर्त्तुर्विरहे न वर्त्तते।

(ध) साधारण एव नोऽभ्युदयः। जात! ज्येष्टमातरं वन्दस्व।

राजलक्ष्मी पुनः स्थितिमति लोकमर्य्यादाभिज्ञे अनाकल्पधैर्य्ये अपरिमेयधैर्य्यशालिनि त्वयि विभक्ता इदानीं अधिकतरं राजते। उपमानान्तरं प्रयोजयति। हिमवति हिमालये जलधौ च समुद्रे च प्राप्ततोया गङ्गेव। मालिनीवृत्तम्।

[भरतवाक्यम्]

परस्पर-विरोधिन्यो रेकसंश्रय-दुर्लभम्।
सङ्गतं श्रीसरस्वत्योर्भूयादुद्भूतये सताम्॥ (२३)

अपिच।

सर्वस्तरतु दुर्गाणि ; सर्वो भद्राणि पश्यतु।
सर्वः कामान-वाप्नोतु, सर्वः सर्वत्र नन्दतु॥

[इति निष्क्रान्ताः सर्वे]

इति श्रीकालिदासकृते विक्रमोर्वशीनामत्रोटके पञ्चमोऽङ्कः।

समाप्तोऽयं ग्रन्थः।

---

(२३) सतां साधूनामुद्भूतये वृद्धये परस्परविरोधिन्योः श्रीसरस्वत्योरेकसंश्रये एकाधारे दुर्लभं सङ्गतं मिलनं भूयात्। विद्वांसो धनिनो भवन्तु इत्यर्थः।

इति पण्डित कुलपतिना श्रीजीवानन्दविद्यासागर-
भट्टाचार्य्येण विरचिता विक्रमोर्वशीव्याख्या
समाप्ता।

---

६९ उत्तररामचरितनाटक सटीक १
७० कर्पूरमञ्जरीनाटिका सटीक ॥०
७१ चण्डकौशिकनाटक सटीक ॥०
७२ चैतन्यचन्द्रोदयनाटक सटीक २
७३ धनञ्जयविजयनाटक सटीक ।०
७४ नागानन्दनाटक सटीक ॥०
७५ नागानन्दनाटक मूल ।०
७६ प्रबोधचन्द्रोदयनाटक सटीक १
७७ प्रसन्नराघवनाटक जयदेवकृत १
७८ प्रियदर्शिका नाटिका सटीक ॥०
७९ वसन्ततिलक भाण नाटक ।/
८० बालरामायणनाटक सटीक ३
८१ विक्रमोर्वशी नाटक (सटीक) १
८२ विद्धशालभञ्जिकानाटिका सटीक॥०
८३ वेणीसंहारनाटक सटीक ॥०
८४ मल्लिकामारुतनाटक सटीक २
८५ महानाटक हनुमन्नाटक सटीक १॥
८६ महानाटकम् (हनुमन्नाटकम्) ॥०
८७ महावीरचरितनाटक सटीक १॥०
८८ महावीरचरितनाटक मूलमात्र ॥०
८९ मालतीमाधवनाटक सटीक ॥०
९० मालविकाग्निमित्रनाटक सटीक १
९१ मुद्राराक्षसनाटक सटीक १
९२ मृच्छकटिकनाटक सटीक १॥०
९३ रत्नावलीनाटिका सटीक ॥०
९४ शकुन्तलानाटक सटीक १
९५ काव्यप्रकाश अलङ्कार सटीक ४
९६ काव्यादर्श सटीक (अलङ्कार) १
९७ काव्यदीपिका अलङ्कार सटीक ॥०
९८ कुवलयानन्द अलङ्कार सटीक २
९९ चन्द्रालोक प्राचीन अलङ्कार ।०
१०० दशरूपकम् (अलङ्कार) १
१०१ साहित्यदर्पण सटीक अलङ्कार १॥
१०२ साहित्यदर्पणम् (मूलमात्र) ॥०
१०३ काव्यालङ्कारसूत्रवृत्तिवामनकृत ॥०
१०४ वाग्भटालङ्कार ।०
१०५ सरस्वतीकण्ठाभरण सटीक ३
१०६ सङ्गीतपारिजात[सङ्गीतशास्त्र]१॥०
१०७ छन्दोमञ्जरी वृत्तरत्नाकर सटीक ॥
१०८ श्रुतबोधः (छन्दोग्रन्थ) सटीक /
१०९ पिङ्गलछन्दः शास्त्र वृत्तिसहित १॥
११० महानिर्वाणतन्त्रम् सटीक ४
१११ सारदातिलक तन्त्रम् ३
११२ मन्त्रमहोदधि तन्त्र सटीक ३
११३ रुद्रयामल तन्त्र २
११४ इन्द्रजालविद्यासंग्रहः २
११५ कामन्दकी नीतिसारः ॥।०
११६ चाणक्यशतकम् सटीक /
११७ शुक्रनीतिसारः सटीक २
११८ गयाश्राद्धादिपद्धतिः १
११९ तुलादानादिपद्धतिः (वङ्गाक्षरैः)४
१२० धर्मशास्त्रसंग्रहः १०
१२१ वीरमित्रोदय (स्मृतिशास्त्र) ५
१२२ मनुसंहिता कुल्लूकभट्टकृत टीका-
सहित ३
१२३ वेदान्तदर्शन सभाष्य सटीक ६
१२४ भामती(वेदान्त)वाचस्पतिमिश्रकृत३
१२५ वेदान्तपरिभाषा ॥०
१२६ वेदान्तसार सटीक ॥०
१२७ विवेकचूडामणि वेदान्त ।/
१२८ पञ्चदशी (सटीक) वेदान्त १॥०
१२९ सिद्धान्तबिन्दुसारः (वेदान्त) ॥०
१३० पूर्णप्रज्ञदर्शनम् सभाष्य ॥।०
१३१ साङ्ख्यदर्शन (भाष्यसहित) २
१३२ सांख्यसूत्र अनिरुद्धवृत्तिसहित ॥०
१३३ साङ्ख्यसार ।०
१३४ सांख्यतत्त्वकौमुदी सटीक २
१३५ सांख्यकारिका गौड़पादभाष्य ॥०

१३६ मीमांसादर्शनम् भाष्यसहित १२
१३७ मीमांसापरिभाषा ।०
१३८ शाण्डिल्यसूत्र सभाष्य ॥०
१३९ जैमिनीय (न्यायमालाविस्तर:) ६
१४० अर्थसंग्रह (लौगाक्षिमीमांसा) ।०
१४१ न्यायदर्शन सभाष्य सवृत्ति २॥०
१४२ भाषापरिच्छेद: मुक्तावली ॥०
१४३ भाषापरिच्छेदमुक्तावली दिनकरी १॥
१४४ शब्दशक्तिप्रकाशिका (न्याय) ॥०
१४५ कुसुमाञ्जलि सटीक (न्याय) ।०
१४६ उपमानचिन्तामणि: /
१४७ आत्मतत्त्वविवेक (बौद्धाधिकार) २
१४८ अनुमानचिन्तामणि: सटीक ४॥
१४९ तर्कामृत (जगदीशकृत) न्याय ।०
१५० तर्कसंग्रह ई अनुबादसहित ॥०
१५१ पातञ्जलदर्शन (सभाष्य सटीक) २
१५२ पातञ्जलदर्शन भोजवृत्तिसहित १
१५३ वैशेषिकदर्शनम् सटीक ३
१५४ सर्वदर्शनसंग्रह: [दर्शनशास्त्र] १
१५५ आथर्वणोपनिषद् सभाष्य ३
१५६ आरण्यसंहिता सभाष्य ॥०
१५७ ईश केन कठ प्रश्न मुण्ड माण्डूक्य उपनिषद् (सटीक सभाष्य) ३
१५८ गायत्री व्याख्या ॥०
१५९ गोपथब्राह्मण (अथर्ववेदस्य) १
१६० छान्दोग्य उपनिषद् सटीक सभाष्य ३
१६१ तैत्तिरीय ऐतरेय श्वेताश्वतर सभाष्य २
१६२ दैवत तथा षड्विंशब्राह्मणसभाष्य २
१६३ निरुक्त सभाष्य सटीक १२
१६४ नृसिंहतापनी सभाष्य २
१६५ बृहदारण्यक सटीक सभाष्य ७
१६६ मुक्तिकोपनिषत् /
१६७ शुक्लयजुर्वेदसंहिता सभाष्य ३

१६८ शुक्लयजुर्वेदस्य प्रातिशाख्य सभाष्य २
१६९ सामवेदसंहिता सभाष्य ४
१७० अग्निपुराणम् १
१७१ अध्यात्मरामायणम् सटीक २
१७२ कल्किपुराणम् १
१७३ गरुड़पुराणम् १
१७४ सटीक वाल्मीकिरामायण बालकाण्डम् १
१७५ विष्णुपुराणम् सटीक ३
१७६ ब्रह्मवैवर्त्तपुराण सम्पूर्ण ४
१७७ मत्स्यपुराणम् २
१७८ मार्कण्डेयपुराणम् १॥०
१७९ लिङ्गपुराणम् २
१८० श्रीमद्भगवद्गीता सभाष्य सटीक ४
१८१ अष्टाङ्गहृदय (वाग्भट) वैद्यक ३
१८२ चक्रदत्त (वैद्यक) १॥०
१८३ चरकसंहिता (वैद्यक) सम्पूर्ण ६
१८४ माधवनिदान सटीक १॥०
१८५ भावप्रकाश (वैद्यक) ५
१८६ मदनपालनिर्घण्टु: (वैद्यक) ॥०
१८७ रसेन्द्रचिन्तामणितथारससारसंग्रह ६
१८८ शार्ङ्गधरसंहिता (वैद्यक) १
१८९ सुश्रुतसंहिता सटीक (वैद्यक) १०
१९० सुश्रुतसंहिता मूलमात्र (वैद्यक) ४
१९१ चिकित्सासारसंग्रह वङ्गसेनकृत ५
१९२ गणिताध्याय: भास्कराचार्य्यकृत १
१९३ गोलाध्याय: भास्कराचार्य्यकृत ।०
१९४ बृहत्संहिता वा वाराहीसंहिता २
१९५ भावकुतूहल (ज्योतिष) ।०
१९६ लीलावती भास्कराचार्य्यरचित ।०
१९७ बीजगणित भास्कराचार्य्यरचित ॥०
१९८ सूर्य्यसिद्धान्त सटीक ६

कलिकाता संस्कृतविद्यामन्दिरे बि, ए, उपाधिधारिण:
श्रीजीवानन्दविद्यासागर-भट्टाचार्य्यस्य सकाशात् लभ्यानि।

33885